काशिकावृत्ति टीका

पद्यमञ्जरी (२ योऽध्यायः)

पत्राणि १०१

नं०: ४

काशिकावृत्तिटीका

पद्यमञ्जरी (२योऽध्यायः)

पत्राणि १०१

द्वितीयो

~~प्रथमोध्यायः~~

१०१ पत्राणि

नं. ४

नं ६-५८

[illegible]

लिपि ८ १९२२ [illegible]

२



का॰प॰२१ श्रीगणेशाय नमः॥ ॥समर्थः पदविधिः॥ ॥परिभाषेयमिति। नाधिकारः पदविधिग्रहणात् अन्यथा वसमासानां प्रणगव
ज्ञावादीनां पदविधित्वाभिचारादनर्थकं तत्स्यात्। यतिः सर्वतः पूर्वत्र परत्र अवाहिते चानंतरे च भाष्यते कार्यमनयेति करणेणाख्युह्लइत्सकार
१ प्रत्ययः। भावसाधनत्वाद्वा। भेदोपचारात् स्त्रेप्रयुज्यते। इदंशब्दस्य सूत्रेप्रयुक्तस्यापि विधेयपरिभाषाशब्दसामानाधिकरण्यात् स्त्री लिंगता। समर्थ इ
ति ननु यः कश्चित्पदविधिरिति सामान्यनिर्देशो नैव तत् हृस्मभूताख्यामि ह कां किं सर्वग्रहणेन नैतदस्ति यः कश्चिद्ब्राह्मणानानीयतामित्युक्ते स्त्रिया
दिनिवृत्तिः प्रतीयते न त्वासिः। प्रथमपठितमपि समर्थशब्दमुल्लंघ्योद्देश्यसमर्पकत्वबलाद्दार्थेनक्रमेण प्रथम भाविनेपदविधिशब्दमारभ्यास्याभि
धिशब्दः कर्मसाधनइति दर्शयति विधीयत इति विधिरिति। कार्यमित्यर्थः। पदानामिति शेषलक्षणा षष्ठी पदानां सतांयत्कार्यं विधीयत इत्यर्थः।
पदे तु भावसाधनो विधिशब्दः आश्रीयेत विधानं विधिरिति। ततः पदेषु कधोगलक्षणा कर्मणि षष्ठी पदानामसतां निष्पादनं पदविधिरिति तत्र समा

॥ॐ नमः॥ श्रीगणेशाय नमः॥ ॥समर्थः पदविधिः। परिभाषेयं यः कश्चिदिह शास्त्रे पदविधिः स समर्थः सम
र्थो वेदितव्यः विधीयत इति विधिः पदानां विधिः पदविधिः समासादिः समर्थः शक्तः॥ ॥श्रीः॥ ॥

स्तद्धितसुब्धातुवृत्तयो न संगृहीताः स्युः तत्र हि पदानां सतां समासादिकार्यं विधीयते न पुनः पदत्वं। ननु च कर्मसाधनपक्षेपि विभक्तिविधानम
संगृहीतं स्यात् पदानामेव हि तत्र विधीयंते न तु पदानां सतां किंचित्। उच्यते कर्मणि द्वितीयेत्यादिना तु नियमः क्रियते न पदं विधिः अथ वा येकवा
क्य तयास्यादिसूत्रेण विभक्तीनां विधानं एवमपि कारकविभक्तिषु नावत्क्रियाकारकयोरविनाभूतः संबंधः उपपदविभक्तीनां त्वंतरंगंतरेण युक्तः द
सादीनामुपसर्गविभक्तीनां च नेर्विशइत्यादीनामेकवाक्यतापंमित्रशाकतां पंच पदविधित्वमस्त्येव उपपदानामुपसर्गाणां च पदत्वात्। समा राम॰
सादिरित्यादिशब्देन तद्धितदसादीनां ग्रहणं तद्धिता अपि सुवंतात् उत्पद्यंते समर्थानां प्रथमाद्वेत्यत्र तु समर्थग्रहणस्य प्रयोजनं तत्रैव वक्ष्यामः।
एवमपि सुप्तोः सामर्थ्यं इत्यादीनामपि। समर्थः शक्त इति। तत्रैव समर्थशब्दस्य रूढत्वात्। स्वकार्यनिष्पादने समो हि लोके समर्थ इत्युच्यते अर्थप्रति १
पादनं च शब्दानां स्वकार्यं तत्साधनत्वेन चाधिकृतालौकिका वैदिकाश्च यस्य कस्यचिन्मतिपादने समर्थाः उच्यन्ते चेदं समर्थ इति तत्र सामर्थ्याद्वि
शेषो वगम्यते। स तु विशेषः प्रत्यासत्तेरेकार्थीभावरूपस्साह ॥

विग्रहवाक्यार्थाभिधान इति। विशेषेणागृह्यते ज्ञायतेऽनेन समासार्थ इति विग्रहः। ताद्दृशं च तद्वाक्यं चेति विशेषणसमासः। पदानां विशेषेण ग्रहणं विग्रहः
तदर्थं वाक्यं विग्रहवाक्यं अश्वघासादिवत् षष्ठीसमासः। अथवा अवयवोपचारेण विग्रहार्थं वाक्यं विग्रह इति विशेषणसमासः। तद्यथा राजपुरुष इत्यस्य समासः
तदर्थं विग्रहवाक्यं राज्ञः पुरुष इति अस्य योऽर्थस्तदभिधाने राजपुरुषशब्दः समर्थः। अतोऽपि तत्प्रतीतिः सा च राजविशिष्टः पुरुषः। समर्थो वेदितव्य
इति। साधुत्वेन विशेषः यः पदविधिः स विग्रहवाक्यार्थाभिधाने समर्थः स साधुर्भवतीत्यस्मिन्पक्षे तेषां सार्थं नार्थान्तरं साधीयः पश्यामः। ननु सामर्थ्य
प्रयोगतोऽनु सर्वेषां न पुनरीदृशं विशेषवाक्यार्थाभिधाने समर्थानां सत्त्वेन तत्राश्रये लभ्यते। अत एवास्मिन्व्याख्याने यदि तु इष्टः सम्बन्धाव्या
नान्तरमाह अथवेति। अत्र पक्षे उपचरितलक्षणः समर्थशब्दस्तदाह समर्थपराश्रयत्वादिति। समर्थानि पदान्याश्रयो यस्य स तथोक्तः। अन्वयीष्व
समर्थशब्दो न रूढस्तमाह समर्थानां पदानां संबद्धार्थानां संसृष्टार्थानामिति। यः पदानां विधिः स समर्थानां वेदितव्यः समर्थानामिति कोऽर्थः सं

विग्रहवाक्यार्थाभिधेयः शक्तः स समर्थो वेदितव्यः। अथवा समर्थपराश्रयत्वात्समर्थः सम
र्थानां पदानां संबद्धार्थानां संसृष्टार्थानां च विधिर्वेदितव्यः॥ १ ॥ श्रीः॥ ॥ श्रीः॥ ॥

बद्धार्थानां संसृष्टार्थानां चेत्यर्थः। तत्र वाक्ये संबद्धार्थतामपेक्ष्याह तत्र सामर्थ्यं च अन्योन्यापेक्षा व्यपेक्षा। आकांक्षासंनिधियोग्यत्वेषु सत्सु पः
परस्परसंबंधः सा व्यपेक्षा। वाक्ये हि राज्ञ इति पदमनियतसंबंधव्यपेक्षयोद्भूतसंबंधं विशेषणभूतमर्थमाचष्टे स संनिहितं योग्यं च पुरुषमपेक्षते मम
यमिति पुरुष इत्यनेनापि पुरुषः स्वनिष्ठो विनिधीयमानः स संनिहितं राजानमवच्छेदकत्वेनापेक्षते मम स्येति अतो विशेषणविशेष्यभावेन
संबंधः। अनियतसंबंधिविषयत्वाच्चापेक्षायाः योऽपि संनिहितो योग्यश्च तेन तेन संबध्यते राज्ञः पुरुषश्चाश्वश्च। राज्ञो देवदत्तस्य च पुरुष इति वा
क्यान्तरस्य। समासे तु संसृष्टार्थता एकार्थीभावो हि तत्र सामर्थ्यं हि तत्रो हि राजपदं राजानमभिधाय न तावति पर्यवस्यति पुरुषमप्याचष्टे यथा ग
गायां घोष इति गंगापदं तीरं यदि तु तावत्येव पर्यवस्येत् ततो यथा वाक्ये राज्ञः पुरुषोऽश्वश्चेति द्वाभ्यां संबंधो भवति तथा राजपुरुषोऽश्वश्चेत्यत्रापि स्यात् त
स्य विशेषणसंबंधोऽपि स्यात् ऋद्धस्य राजपुरुष इति यथा ऋद्धस्य राज्ञः पुरुष इति तथा पुरुषपदमपि राजविशिष्टमेव पुरुषमाचष्टे न पुरुषमा
त्रं यदि तथा स्यात्ततो यथा वाक्ये राज्ञः पुरुषो देवदत्तस्य चेति द्वाभ्यां संबंधो भवति तथा राजपुरुषो देवदत्तस्य चेत्यपि स्यात्। अतोऽपदस्य विशेषणस

भाष्ये क्वाप्यपरे विशेषाः। सुब्लोपो व्यवधानं यथेष्टमन्यतरेणाभिसंबंधः। स्वरभेदश्च संख्याविशेषोऽव्यक्ताभिधानमुपसर्जनविशेषणं चयोगश्चेति। तद्य
कौ॰प॰२१ था सुपः अलोपश्च भवति वाक्ये राज्ञः पुरुषो नीलमुत्पलमिति। समासे तु द्वयोरेकार्थीभावे विशिष्टार्थवृत्तेः पृथगर्थाभावात्तद्भावतस्तद्विभक्तिर्निवर्त
ते सैव च स्वाभाविकी निवृत्तिः शास्त्रेणान्वाख्यायते सुपो धातुप्रातिपदिकयोरिति प्रसमयलक्षणेन न लोपादिः यत्कार्यं यथाख्यातिरिति पृथगर्थीभा
२ वे तु पृथग्विभक्तिर्न भवति यथा वर्णेषु। व्यवधानं च पृथगर्थत्वे एव दृष्टं राज्ञः कृद्धस्य पुरुष इति समासे तु न दृष्टं यथा राजपुरुषस्य पदे न मध्ये पदांतरं प्र
क्षिप्यते प्रयोगानियमश्च पृथगर्थत्वे दृष्टः राज्ञः पुरुषः पुरुषो राज्ञ इति समासे तु न दृष्टो यथा पुरुषयदेवर्णेषु स्वरभेदोऽपि पृथगर्थत्व
एव दृष्टो राज्ञः पुरुष इति द्वावपि निःस्वरेण प्रयुज्येते अभेदेन दृष्टो यथा पुरुष इति द्वौ चैकस्वरेण दृश्यते। किंच संख्याविशेषो वगम्यते
पृथगर्थेषु राज्ञः राज्ञोः राज्ञां पुरुष इति वृत्तौ त्वभेदैकत्वसंख्या गम्यते तदेतदुत्तरपदस्येत्रोपपादयिष्यामः। अव्यक्तं चाभिधानं पृथगर्थेषु। ति

। वक्ष्यति द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः। कष्टं श्रितः कष्टश्रितः। समर्थग्रहणं किं पश्य दे
वदत्त कष्टं श्रितो विष्णुमित्रो गुरुकुलं। तृतीया तत्कृतार्थेन गुणवचनेन। शंकुलया खंडः शंकुलाखंडः। सम
र्थग्रहणं किं किं करिष्यसि शंकुलया खंडो देवदत्त उपलेन॥ ॥३॥ ॥

इति ब्राह्मणस्य कंबल इति वृत्तौ त्वव्यक्तमभिधानं तिष्ठति ब्राह्मणकंबल इति संदेहो भवति संबुद्धिर्वा स्यात् षष्ठीसमासो वेति न चात्र स्वरान्निर्णयः वा
क्येप्यामंत्रिते निघातः कंबलश्च दृष्टो प्रत्ययादित्वात् दंतोदात्तः समासेऽप्यंतोदात्तता। उपसर्जनविशेषणं चाप्यात्मनि च योगश्च भवति पृथगर्थेषु रा
ज्ञो गोश्चाश्वस्य कंबलश्चेति वृत्तौ त्वेकार्थीभावे इति निबंधानसमुच्चयस्याभावाद्वाक्याद्योऽनिवर्तति राज्ञो गवाश्वकंबला इति। तदेतैर्विशेषैर्विज्ञा एक॰
यते संभिन्नो भयरूपः पंचस्तकवद्विभाग्यान्नोहं तावदर्थ इति तेन राज्ञः पुरुषमानय राजपुरुषमानयेति वयपद्येक एवानीयत इति कार्य २
योगिनोर्भेदस्तथाप्यभिधानप्रकारो भिद्यते यथा ब्राह्मणाः शतं भोज्यंतां ब्राह्मणानां शतं भोज्यतामिति तद्देवं वृत्तिवाक्ययोरर्थाभिदा नइ
ति स्थितं एवं च तत्र तत्र वा वचनं चिंत्यप्रयोजनं भिन्नार्थयारस्त्वावाक्यस्य बाधाः प्रसंगात्। अन्ये तु जहत्स्वार्था वृत्तिरिति वदंतो वृत्तिपदानामा
नर्थक्यमेवाहुः॥ ॥७॥ ॥

तत्तु न रोचयामहे। किं राजपुरुष इत्यत्र राजार्थो न गम्यते ओमिति चेत्पुरुषमात्रानयनं प्राप्नोति। अथ गम्यते किं निबंधना तत्प्रतीतिः न तावत्समा
सस्य तत्र शक्तिः कल्प्या राजशब्दनिबंधनायामपि तस्यामनर्थिभावात्। न च वाक्ये राजपदं श्रुतमस्ति पुनः समासे श्रूयमाणमपि येऽस्ति तावत्येव प्र
तिपद्यते राजार्थः अतो न जहत्स्वार्थः अतो न जहत्स्वार्था वृत्तिः अर्थाभिधानप्रक्रीयाभेदः शेते देवसंप्रत्ययः। तत्र संबद्धार्थानां मे स्पष्टार्थानामि
ति सामर्थ्यद्वयमपि। स्थितं परिभाषाप्रवृत्तौ हेतुर्न्नम्यतरत्। यतो माभूद्व्यपेक्षामात्राश्रयेऽणा साप्ये अस्यापि वृत्तिः। यद्येवं परांगवद्भावे विभ(७
क्तिविधाने च समानप्रवृत्तितत्त्वैकार्थीभावस्य संभवात्समाप्रवृत्तिः परांगवद्भावेन विभिन्नग्रहणं नोदयिष्यति। विभक्तिविधानेऽपि क्रियाका
रकयोर्व्यपेक्षा विनाभाविनी क्वचिद्युक्तग्रहणं क्वचिद्योगग्रहणं क्वचिन्नीयमानयोगस्याक्षेप इति न कोऽपि दोषः। अत एवानंतरमपि प
रांगवद्भावमुक्त्वा समासमुदाहरति विस्तीतीति समर्थग्रहणं किमिति। सूत्रे किमर्थमित्यर्थः न हि केवलेन पदविधिग्रहणेन किं विक्रियते।
पश्येत्यादि। ननु च श्रितादिभिः द्वितीयां विशेषयिष्यामः श्रितादियोगे या द्वितीयेति एवमपि व्यपेक्षाप्रसंगः महत्कष्टं श्रित इति भवति तत्र
श्रितादिनिमित्ता द्वितीया समर्थग्रहणेन तु सति न भवति। यद्यप्यत्र वाक्यावस्थायां व्यपेक्षालक्षणं सामर्थ्यमस्ति तथाऽवस्थायां तु नैकार्थी
भावः संभवति एकार्थीभावे हि विशेषणानां संबंधो न संभवतीत्युक्तम्। कथं तर्हि देवदत्तस्य गुरुकुलमिति साक्षेपे अस्य वृत्तिः नात्र गुरुणा दे
वदत्तस्य संबंधः किं तर्हि समुदायेन गुरुकुलं कस्य कुलेन संबंधस्त्यर्थाज्जुरुणापि योगो भवति उक्तं च समुदाये न संबंधा येषां गुरुकुलादि
ना संबद्धाः शब्दावयवास्तेऽपि युक्तेति तद्वत्तां संहेति। अथवा पारिशेष्यात्संबंधिसमानेन सहैकार्थीभावः स्यादर्थ परिशिष्टे सम्बंधिशब्दस्य प्रतियोगिने
ति भवति भवति तद्रूपे अस्यापि वृत्तिः उक्तं च संबंधिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते स्वार्थवत्साव्यपेक्षास्य वृत्तावपि न हीयत इति। किं त्वं
करिष्यसीत्यादि। अत्र शकं वक्तुं तत्कृतार्थेन इति तच्छब्दः प्रकृतपरामर्शी यत्तदोर्नित्यसंबंधात्तेन तदर्थेन यः। कृतो गुरुणा हननेनेति अत्र वय
स्य समासः शंसते शकुलये ति न तदर्थेन कृतं खंडनं यदर्थेन वहतां खंडनमुपलेनेति न तस्य समासः शंकातरजिनमभविष्यतीति। तस्मान्महत्सा

का॰सं॰ ३ ।गच्छ त्वं सूपायेति। गत्यर्थकर्मणीति चतुर्थी। यद्वा क्रियार्थोपपदस्य च कर्मणीति। एवमाहर्त्तुं गच्छेति। अत्राप्यतदर्थत्वाद्देवदारुणेन भविष्यतीति सा
पेक्षं प्रत्युदाहरन्निममहते यूपाय दार्विति। यणादेशो नित्यश्च तु न भवतीति। द्वावप्येतौ वर्णविधी। नित्यस्तु क्व दीर्घादिरपयमेवापरस्तु पदान्ताद्वेति वि
कल्पितस्तु कस्य पदाभिधिनास्त्र न भवति। अन्ये तु यणादेशो नित्यश्च तु न भवतीत्यकारप्रश्लेषं वर्णयन्ति। तः पदान्ताद्वेति विकल्पितस्तु न भवतीति व्या
चक्षते। अन्वसो पदविधिर्नेत्याह। तत्रान्तग्रहणेन कर्त्तव्यं प्रकृतेन दीर्घेणायदस्य विशेषणाद्दीर्घान्तस्य पदस्येति सिद्धं एवं सिद्धे तदन्तग्रहणासेतन्म

।चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। यूपाय दारु यूपदारु। समर्थग्रहणं किं। गच्छ त्वं यूपाय दारु देवदत्तस्य गेहे। पंचमी भ
येन। वृकेभ्यो भयं वृकभयं। समर्थग्रहणं किं। गच्छ त्वं मा वृकेभ्यो भयं देवदत्तस्य यज्ञदत्तात्। षष्ठी। राज्ञः पुरुषो राजपुरुषः। स
मर्थग्रहणं किं। भार्या राज्ञः पुरुषो देवदत्तस्य। सप्तमी शौण्डैः। अक्षेषु शौण्डः अक्षशौण्डः। समर्थग्रहणं किं। शक्तस्त्वमक्षेषु शौण्डः
पिबति पानागारे। परस्मैग्रहणं किं। वर्णविधौ समर्थपरिभाषा मा भूत्। तिष्ठतु दध्यशान त्वं शाकेन। तिष्ठतु कुमारी छत्रं हर देवद
त्त। यणादेशो नित्यश्च तु न भवति॥ ॥सुबामन्त्रिते पराङ्गवत्स्वरे॥ ॥सुबन्तमामन्त्रिते परतः पराङ्गवद्भवति। स्वरे स्वरल
क्षणे कर्त्तव्ये। तादात्म्यातिदेशोऽयं। सुबन्तमामन्त्रितमनुप्रविशति। वक्ष्यति। आमन्त्रितस्यादिरुदात्तो भवति। समुपकस्यापि यथा
स्यात्॥ ॥श्रीः॥ ॥

योजनं पदान्तस्य दीर्घस्य वर्णस्य विधिस्तु न यथा स्याद्दीर्घान्तस्य पदस्य मा भूदिति॥ ॥सुबामन्त्रितस्य पराङ्गवदेकदेशवद्भवतीति तद्ग्रहणेन गृह्यत इ रा॰म॰
त्यर्थः। तादात्म्यातिदेशोऽयमिति। अङ्गशब्दः स्वावयववचनत्वात्। तस्यामन्त्रितस्यात्मा तदात्मा तस्य भावस्तादात्म्यं तत्स्वभावत्वमित्यर्थः। ए ३
तदेव स्पष्टयति सुबन्तमिति। अनुप्रविशति ग्रन्थं भवति। सुबन्तामन्त्रितसमुदाय एकस्मिन्नामन्त्रिते संपन्ने यः स्वरः शक्यते कर्त्तुं स कर्त्तव्य इत्य
र्थः। कः पुनरसौ आद्युदात्तत्वं। समुदायस्यावयवदात्तत्वे निघातः॥ ॥छ छ॥ ॥छ छ॥ ॥ ॥ ॥

कुंडेनाटन्निति । नन्वत्र सति तावत् एकस्मादेशे समुदायस्याद्युदात्तत्वं शेषनिघातश्च अन्यस्यापि कुंडशब्दोनन्विषयस्यानिमंत्रितस्य तस्याद्युदात्तः प
दात्परस्यामंत्रितं निहन्यते । यदा तु अटन्नित्येतस्यादेशो वर्त्तते तदा नास्ति निघात इति द्वयोराद्युदात्तत्वं स्यात् । किं च पुल्लिंगोपि कुंडशब्दोस्ति य
मौजीवतिकुंडः स्यान्म तेन त्रीरिगोलक इति कुंडीति च जात्यं यदा स्त्रियां तेन टापि भवति । परशुना वृश्चन्निति । आ ऊ परयोः स्वनिश्च भ्रां डि
ष्वेति कुप्रत्ययांतत्वादंतोदात्तः परशुशब्दः । मद्रशब्दो मदेश्वेति रक्प्रत्ययांतः । कश्मीरशब्दोपि तावादित्वादंतोदात्तः । सुवृत्तस्य परांगवद्भा
वे तन्निमित्तग्रहणं । तस्यामंत्रितवाक्यस्यार्थस्य यन्निमित्तं तदभिधाय्येव सुवंतं परांगवदित्यर्थः । उदाहरणेषु तृतीयांतस्य नावन्निमित्तत्व
मस्त्येव षष्ठ्यंतस्याप्यस्ति स्वस्वनिमित्तं हि राजन्नादिशब्दानिमित्ता वा । एवं गोषु स्वामिन्नित्यत्रापि भवति । तन्निमित्तत्वाभावे तु न भवति । म

कुंडेनाटन्नहन् । परशुना वृश्चन् । मद्राणां राजन् । कश्मी
राणां राजन् । सुविति किं । पीड्योपीड्यमान ॥ ॥३॥ ॥

त्स्यांदंडं वृषभो राजाय मद्भिरिंद्र सख्येतेऽन्यस्तु माणामिरिंद्र माधिनं । एतेनाग्ने ब्रह्मणा वावृधस्व स्त्रेणाग्ने स्वायुः संभरस्व । मित्रेणाग्ने मि
त्रधेये यतस्व । सुविति किमिति तन्निमित्तग्रहणादेव सिद्धे तस्य सिद्धो निरास इति प्रश्नः । पीड्यो पीड्यमानेति । न हि सत्त्वकारो वार्त्तिककारवचनेना
तिप्रासमिनिवारणं मन्यत इति भावः । पीड अवगाहने चुरादिणिच् । उभयत्र कर्मणि लट् । एकत्रोत्तमैकवचनं मिट् । अपरत्र शानच् । पाके णि
लोपः । तास्यनुदात्तेदिति इटोनुदात्तत्वं । यकः प्रत्ययस्वरः । एकादेश उदात्तेनोदात्त इत्येकार उदात्तः । पीड्यमानेत्यत्रामंत्रितनिघातः । ननु च
समर्थग्रहणात् तत्रैवात्र न भविष्यति अत्रापि सामर्थ्यं कथं संबोधनपदं क्रियाया एव विशेषकं तथा च व्रजानि देवदत्तेत्यत्रामंत्रितनिघा
तो भवति । उक्तं च संबोधनपदं यच्च तत्क्रियाया विशेषकं । व्रजानि देवदत्तेति निघातोत्र तथा सतीति । अथवा हेतुहेतुमद्भावलक्षणोत्र संबं
धः हे पीड्यमान त्वं सीड्या अहमपि पीड्ये इति ॥ ३ ॥

गेहे गार्ग्य इति गेहशब्दं उच्चारितादनंतरोद्दातः एकस्यामासनादिकायां क्रियायां द्वयोरपि कारकत्वान्न द्वारेणास्तिसामर्थ्यं परग्रहणां किमिति।
संनिधानादामंत्रितस्यैवत्तविष्यतीतिप्रश्नः। पूर्वस्यमाभूदिति। निमित्तभावएवामंत्रितस्यापष्ठी। एतयापूर्वस्यापिस्यादितिभावः। एवंचपूर्व
स्यामंत्रितत्वमतंत्रं गार्ग्यः कुंडेनाटन्नित्यादावपिभवति। संनिधानादामंत्रितत्वमपितंत्रमितिचेत्पद्येवंयामेवसंनिहितामितिनपूर्वंप्रसंग
त्वप्रहणः। देवदत्तकुंडेनाटन्नित्यत्रपूर्वंप्रसंगात्वेसतिमतिसमुदायस्याद्युदात्तत्वे शेषनिघातः अटन्नित्यामंत्रितनिघातइतिसंग्रहः। परग्र
हणेतुसतिदेवदत्तशब्दस्यामंत्रितायुदात्तत्वं तथाकुंडेनाटन्नित्यस्यापिनिघातस्तुनभवतिआमंत्रितं पूर्वमविद्यमानवदितिदेवदत्तशब्द
स्याविद्यमानत्वात् छंदसितुपरमपिपूर्वस्याविद्यमानवद्दिष्यते आतेपितमरुतां सुम्नमेतुपितारित्यनेनसहमरुतामित्यस्याविनिघातः। यथा

।आमंत्रितइतिकिं। गेहेगार्ग्यः। परग्रहणंकिं। पूर्वस्यमाभूत्। देवदत्तकुंडेनाटन्। अंग
ग्रहणंकिं। यथामृत्पिंडीभूतः स्वरंलभेत। उभयोराद्युदात्तत्वंमाभूत्। वत्काराणंकिं॥ ॥

मृत्पिंडीभूतइति यथालभेतेत्यर्थान्वयः। अमृत्पिंडोमृत्पिंडः संपन्नोमृत्पिंडीभूतः तत्रसुबंतस्यमृत्पिंडत्वनापरिणामासंभवादेकीभाव
प्रतिपादनपरमेतत् मृत्पिंडइवैकतामापन्नइत्यर्थः। यद्वापिंडीशब्दोप्यस्तिप्रविश्यपिंडीमित्तितस्यार्थप्रयोगः भूतशब्दउपमार्थः पितृभूतइति
यथा। किमर्थंपुनरेवंभूतस्यस्वरप्राप्तयेयलइत्यत आह उभयोरपीति। असत्यंगग्रहणेकार्यव्यपदेशशास्त्रादागमस्यतमातिदेशः स्यात्
यथापरस्यकार्यमामंत्रितस्यस्वरः आमंत्रितव्यपदेशः स्वरशास्त्रेवातथासुबंतस्यापितद्भवतीतिएवंचोभयोराद्युदात्तत्वेस्यात्। ननुचपद
त्परस्यनिघातादुभयोरद्युदात्तत्वंमाभूदितिवाच्यं। सत्येआमंत्रितस्यपादादित्वेत्वेनदुष्टं। वत्कारणंकिमितिपस्त्रपरशब्दप्रयोगादेव
वत्सर्थोलप्स्यतइतिप्रश्नः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीलक्ष्म्यानमः॥ ॥

स्वाश्रयमपि प्रथा स्यादिति ॥ नानेन का विकल्पत्वमस्योच्यते एवं हि विषयविभागो न स्यात् एतेन कांगवद्भवतिकन्ने तिना पिकाद्याचिकत्त्वं कदाचित्स्याद्व
कदाचिन्नेति एवं हि सर्वत्र विकल्पः स्यात् तस्मादयमत्रार्थः असतिवद्भूहणे आमकुंडेनाटन्निति स्थिते अटन्निसस्य निघाते प्राप्ते कुंडेनेत्यस्या
नुप्रवेशात्कुंडेनाटन्नित्येकमामंत्रितं स्यात् अनेन च तदेकांतरमिति प्रतिषेधाभावान्निघात एव स्यात् बह्वृणेनु सति अटन्नित्यस्य तावदेकांतरत्वा
न्निघातः प्रतिषेधे आद्युदात्तत्वं प्राप्तं तत्स्यात् [illegible] हणे कुंडेनेत्यस्यानुप्रवेशात्समुदायस्याद्युदात्तत्वं भवतीति तदेवं समुदायस्यानेकांतरत्वेपि अट
न्नित्यस्य एकांतरत्वं बहूणे न लब्धं तेनैव समुदायस्य निघातनिहति राद्युदात्तत्वं भवति । कस्ये सिंचन्निति । अत्र परांगवद्भावे सति एकप
दात्तत्वप्रसंगः स्वाश्रयं परादित्वं भविष्यति सर्वानिति देशे बुध्यति हृदं स्वाश्रयं भवति । किंच नात्राति देशे कंस कारस्य किंचिच्छास्त्रीयं का
र्यमस्ति अनोपि स्वाश्रयं भवत्येव यथा न मतेरं हः स्वयमेवेत्यत्र यकृ प्रतिषेधे शपुः । इदं तर्हि विमर्मनमनन् अत्र परांगवद्भावे सति समानपदस्थ

स्वाश्रयमपि यथा स्यात् । आमकुंडेनाटन् । आमए कांतरमामंत्रितमनंतिक इत्येकांतरतामवृत्ति । स्वरइति किं । कूपेसिं
पिकादाचिकत्वंकरात्रि चर्मनमम् । षत्वणत्वे प्रतिपरांगवन्न भवति । सुवंतस्य परांगवद्भावे समानाधिकरणस्योप
संख्यानमननंतरत्वात् । तीक्ष्णाया सूच्या सीव्यन् तीक्ष्णोनपरशुना वृश्चन् । अथधर्मानां प्रातिषेधो वक्तव्यः । नचैर

॥ धीयाननीवैरधीयान ४

त्वास्मत्वं स्यात् । सत्यपि समानपदत्वे पूर्वपदात्संज्ञायामग इति नियमात् इह संज्ञायां न भविष्यति । ना
यं नियमस्य विषयः पूर्वपदशब्दो हि समासावयवे रूढः । तेन समास एव नियमः अयथा तु पूर्वपदं पूर्वपदं सर्वपदस्यादित्यविशेषेण नियमो
आख्यायेत ततः स्वरग्रहणं शक्यमकर्तुं अक्रियमाणे च तस्मिन्समानाधिकरणस्योपसंख्यानमित्येतदपि शक्यमकर्तुं कथं परस्य परांगवद्भावे
सति चिणोलुड् न्यायेन विषयभेदाल्लक्षणस्याप्रवृत्तेः पूर्वस्यापि परांगवद्भावो भविष्यति सति तु स्वरग्रहणे नास्त्यत्र परांगवद्भावे प
रांगवद्भावो न सिद्ध्यतीति कर्तव्यं । न च सति स्वरग्रहणे परशुना वृश्चन्नित्यत्र वृश्चन्निति प्रातिपदिकं न च प्रत्ययलक्षणेना प्रत्यय इति
प्रतिषेधः न ङि संबुद्ध्योरिति निषेधाल्लिंगात्तत्र परांगवद्भावे न प्रातिपदिकानुप्रवेशात्तु योधातु प्रातिपदिकयोरिति सुब्लुक् प्रसज्ये
न स्वरग्रहणेतु सति सुब्लुक्किं कर्तव्यो परांगवद्भावाभावः । नैनद्ह्रीस्ति(?) परांगवदित्यामंत्रितं संनिधानात्परशब्देन गृह्यते तत्स्यस्य सुबं

तेकांतत्वात्सुबंतकार्य एव परांगवद्भावो न प्रातिपदिककार्ये ।
उच्चैरधीयानेति । उच्चैर्नीचैः शहोस्वरादि षु तो दात्तोपठितोऽ
धिकरणेशक्तिमाधा ना च तस्मिन्नि मित्तं च ॥ ४ ॥ ॥

का.१२. ५

॥ ॥प्राक्कडारात्॥ ॥यथ यस्मात् इत्युः इति अनन्तरसूत्रातिक्रमेण किंचित्कारणं। ननु प्रत्ययपरस्त्वादिवत् समासस्त्वेव स्वरितत्वादधिकारो लभ्यते किं प्राग्व
चनेन तत्राह शेषं प्राग्वचनमिति। प्राक्कडारादित्यवधिनिर्देशः इत्यर्थः। संज्ञासमावेशार्थमिति। अन्यथैकसंज्ञाधिकारात् परत्वात् अव्ययीभावादि नि
र्देशे तु सति न त्वामर्थ्यालाभग्रहणमावर्त्तितेन प्राक्समासं संज्ञा भवतीति समासाः संज्ञोऽव्ययीभावादिसंज्ञाश्चेति समावेशसिद्धिः। अथवा कडारा
दिति पंचम्यो वर्णा इति तिरिक्त शब्दो अध्याहरिष्यते तेन च परा एत्य स्यात् अध्याहारप्रसंगः तदध्याहारे हि दिक्समासे बहुव्रीहौ तत्पुरुषे समासेऽद्वंद्वे
च समासे स्यात् घनुपपन्नं स्यात् कडाराः कर्मधारये इति नाम समाससंज्ञाया अभावात् तस्मात् प्रागित्येवाध्याहरिष्यते नार्थः प्राग्वचनेन
तत्राह प्राग्वचनमिति॥ ॥सह सुपा॥ ॥सहवचनं किमर्थं यावता नान्तरीयकत्वात् सहार्थी मासेऽस्य। तेन यथाह द्वौ इत्यनेनेति सहभूतयोः समा

॥ ॥प्राक्कडारात्समासः॥ ॥कडारसंशब्दनात्प्राक् यानित ऊर्ध्वमनुक्रमिष्यामस्ते समाससंज्ञा वेदितव्याः। व
क्ष्यति यथा सार्वश्रेयथाद्यं ब्राह्मणानामंत्रयस्व। प्राग्वचनं संज्ञासमावेशार्थं। समासप्रदेशाः तत्पुरुषसमा
सः इत्येवमादयः॥ ॥सहसुपा॥ सुबिति वर्त्तते सहेति च सुपेति च एतदधिकृतं वेदितव्यं। यदित ऊर्ध्वमनुक्रमिष्यामस्त
त्रेदं सुबन्तं सुबंतेन सह समस्यते। द्वितीयाश्रितेति द्वितीयान्तं श्रितादिभिः सह समस्यते। कष्टश्रितः। सहग्रहणं योगवि
भागार्थं तिङापि सह यथा स्यात्॥ ॥

समसंज्ञा यथा स्यात् एकैकस्य मा भूत्। अन्यथा पुत्रेण सहागतः पितेत्यत्र यथा द्वयो
स्याः सामर्थ्ये न संबंधः एवं समाससंज्ञापि प्रत्येकमेव स्यात् सहग्रहणे तु सहभूतयोरेका संज्ञा भवति। किंच स्यात् प्रत्येकैकस्य संज्ञा स्या
त् इह भक्ष्यादयः इति समासान्तः प्रसज्येत द्वौव स्वपो स्यातां। तत्र द्विः समासाश्च तत्र तु समासः स समासश्चेत्येकशेषो व्याख्यास्यते तेन समा
ससमूहस्य संज्ञा विधिर्नियमार्थ इति वाक्यस्य न भविष्यति अन्यथा त्वेकैकस्य समासस्य प्रत्ययेन त्वादिद्व्यर्थसमासग्रहणं स्यात् समासा
न्तश्च विषयादिसूत्रात् प्रातिपदिकादित्यनुवर्त्तते समूहस्य च प्रातिपदिकत्वं न त्वेकैकस्य समासस्येति समासान्ताद्विरेक त्वादिविधौ यास समूहादेव सिद्ध
र्थसंज्ञा यथा विज्ञायेत यस्मिन् सुपदायेष दृष्टयं यस्यां समस्यते स समासः। इत्यस्यैवं च पक्षे करणे अजन्तस्मादनर्थकं सहग्रहणं तत्राह सहग्रहणं

एम॰ ५

।अनुगचलदिति। तत्र सुबिलोकत्वस्याविवक्षितत्वादेः पूर्वंसप्रयासः यग्वादनोः तत्र नित्यसमासत्वादेः शाकल्याभावः समासांतोदात्तत्वं तु न भवतीति
दुः। तिउ- इति निपातनात् अनोर्न निर्गताविति निपातनात् केवलमेव उदात्तत्वमिति यो लिपटः स्वरितत्वं। अस्येतु सति शिष्टं समासांतोदात्तत्वं भवतीत्या
हुः। विभक्तिस्तु समासपि समासत्वेन प्रातिपदिकत्वेन भवति निर्देः कात्वस्योक्तत्वात्। यद्वा क्वचन ग्रहणमुक्तेष्वेकत्वादिषु यथा स्यादिति प्रथ
मेकवचनं हल्ङ्याब्भ्यो दिलोपः एवं चैकपद्यादामनुगचलदेवं इत्ने साम एकांतरमामंत्रितमनंतिक इति निपातप्रतिषेधो भवति। योगविभा
गश्चेष्टसिद्ध्यर्थ इत्यतिप्रसंगो नोद्भावनीयः॥ ॥अव्ययीभावः॥ ॥इहलघ्वर्थसंज्ञाकरणमित्येकाक्षरसंज्ञाकार्या किमर्थं महती क्रिय

।अनुगचलत्। अनुगावर्षत्॥ ॥अव्ययीभावः॥ ॥अव्ययीभाव इत्यधिकारो वेदितव्यः। यानित ऊर्द्ध्वम
नुक्रमिष्यामः अव्ययीभावसंज्ञास्ते वेदितव्याः। वक्ष्यति यथा: सादृश्ये यथा हद्रं ब्राह्मणानामंत्रयस्व। अन्व
र्थसंज्ञा वेयं महती पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति। अव्ययीभावप्रदेशा अव्ययीभावश्चेत्येवमाद
यः॥ ५ ॥ श्रीः॥ ॥
तइत्याह अन्वर्थसंज्ञाचेयमिति। अनव्ययमव्ययं भवतीत्यव्ययीभावः भवतेर्ण्यन्त उपसंख्यानमिति णप्रत्ययः। अन्वर्थत्वे किं सिध्यतीत्या
शाह तेनेति। पूर्वपदग्रहणमव्ययस्योपलक्षणार्थं सूपप्रतिशाकप्रतीत्यादावुत्तरपदार्थप्राधान्यान्नस्यात्तस्मादव्ययीभावे। अव्ययार्थः
प्रधानमिति सूच्यते। एवं त्वव्ययानव्ययसमुदायोऽव्ययधर्मत्वाभादव्ययं भवतीति किं सिद्धं भवति समद्रामद्राः सप्तगुद्राइत्यादावुत्तरपद
र्थप्राधान्येऽव्ययीभावस्यातिप्रसंगः परितो भवति। पारेगंगं द्विमुनि उन्मत्तगंगमित्यादौ च वचनादव्ययीभावः। एवं चानव्ययमव्ययं भवती
त्यन्वर्थतयैवाव्ययकार्यस्याप्तित्वादव्ययीभावश्चेत्येतदपि न वक्तव्यं। लघ्वक्षरोपचाराः प्रयोजनमिति परिगणनं वक्ष्यामित्येवमर्थं
तदिति चेन्न अत्रैव परिगणाय। अन्वर्थत्वेन वाविशिष्टकार्यविषयमव्ययत्वमनुमीयतां॥ ५ ॥ ॥श्रीः॥ ॥

।। ।।ग्रन्थः।।   ।।श्रुतत्वाद् अपरस्येव विभक्त्यादयो विशेषणत्वेन समासस्येत्याह विभक्त्यादिष्विति। समस्यत इति। यद्यपि समास इति संज्ञामात्रं वि
धीयते तथाप्ययमनुबन्धो धनायभिन्नयोः शब्दयोः संश्लेषः प्रक्रियायां क्रियत इति समस्यत इत्युक्तं। वचनग्रहणं प्रत्येकमभिसंबध्यत इति। तच्च क
र्मसाधनं विभक्त्यादिभिः समानाधिकरणं विभक्त्यादिषु वाच्येषु यदव्ययं वर्त्तते विभक्त्यादीनर्थान् अव्ययमेव वक्ति द्योतयतीत्यर्थः। विभक्तिश
ब्देन कारकशक्तिरभिधीयते विभज्यतेनया प्रातिपदिकार्थ इति कृत्वा। स्त्रीष्वधिकृत्येति। स्त्रीषु कथा प्रवर्त्यत इत्यन्वयः। अधिकृत्येति
प्रस्तुत्येत्यर्थः। संनिधानाच्च स्त्रियः प्रस्तुत्येति। यामते स्त्रीविषया कथा प्रवर्त्यत इत्यर्थः। प्रायेणानुप्रवर्त्तत इति पाठः। तत्राभिन्नकर्तृक

।।अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसा
दृश्यसंपत्तिसाकल्यान्तवचनेषु। सुपसुपेति च वर्त्तते। विभक्त्यादिष्वर्थेषु यदव्ययं वर्त्तते तत्समर्थेन सुबन्तेन स
ह समस्यते। अव्ययीभावश्च समासो भवति वचनग्रहणं प्रत्येकं संबध्यते। विभक्तिवचने तावत्। स्त्रीष्वधि
कृत्य कथा प्रवर्त्तते। अधिस्त्रि। अधिकुमारि। सप्तम्यर्थो व्ययं विभक्तिः। समीपे। कुंभस्य समीपं उपकुंभं।
उपमणिकं। समृद्धिः। ऋद्धेराधिक्यं समृद्धिः। मद्राणां समृद्धिः सुमद्रं। सुमगधं वर्त्तते। व्यृद्धिर्ऋद्धेरभावः।

त्वात्क्त्वाप्रत्ययस्यानुपपत्तिः पुरुषाः प्रस्तुवन्ति कथाः प्रवर्त्तन्त इति। अत्राहुः अधिकृत्य या कथा सा स्त्रीषु प्रवर्त्तत इत्यर्थः तत्र प्रस्तावनेकथनेच
कर्तुरेकत्वात्सिद्धः क्त्वाप्रत्यय इति। अन्ये त्वाहुः कृत्यस्य या कथा कर्त्तव्यकथेत्यर्थः सा स्त्रीषु अधिप्रवर्त्तते स्त्रीष्वधीति च प्रक्रियावाक्यं न तु लो
कप्रयोगार्हं समासस्य नित्यत्वात्। अधिस्त्रीति। अव्ययीभावश्चेति नपुंसकत्वात् ह्रस्वो नपुंसक इति ह्रस्वः। सप्तम्यर्थे व्ययमिति विभक्तिवच
नतां दर्शयति। उपकुंभमिति। कुंभस्योप इति प्रक्रियावाक्यं षष्ठ्यन्तेन समासः। दुःशकं   ।।   ।।छ।।   ।।छ।।   ।।   ।।

दुर्यवनमिति। मनुष्यजातिवचनौ शकयवनशब्दौ। किमर्थं पुनर्व्वृद्धिग्रहणं अर्थाभावइत्येव सिद्धं न सिध्यति येन समस्यते तद् इत्थं स्याभावोऽर्थाभावः नत्वात्र श
कानामभावः किं तर्हि तदीयायाः ऋद्धेः अर्थाभावइत्यर्थग्रहणं यत्र धर्म्मिस्वरूपस्यैवाभावस्तत्र यथा स्यात् धर्ममात्रप्रतिषेधे माभूत् तत यथा ब्राह्मणो न ब्राह्म
णः पुत्रादित्वेन कस्यचिद् ब्राह्मणत्वं प्रसज्यप्रतिषेधेति नायं ब्राह्मणो यस्मिन्नपि स्त्रीरूपं न यति इतरेतराश्रमं च माभूत् गौरश्वो न भवतीति अत्रापि वस्तुत्वं तद
ति विधत्ते न धर्मिस्वरूपं। अतिशीतमिति। अर्थाभावः कालानवच्छिन्नोऽभावः अत्रापि प्रतीयते इह तु संप्रत्यभावइत्यस्य यस्य भेदेनोपादानं। अतितैसृ
कमिति। तिसृकाना मयामः तिसृभावे संज्ञायां कन्नुपसंख्यानं तत्र भवं तैसृकमाच्छादनं तच्च कालविशेषे उपभोग्यं उष्णोऽशीते वा अतिशब्दो नेदा

दुर्यवनं वर्त्तते। अर्थाभावः। अभावो मक्षिकाणां निर्म्मक्षिकं निर्मशकं वर्त्तते। अत्ययोऽभूतत्वमतिक्रमः। अतीतानि
हिमानि निर्हिमं। निःशीतं वर्त्तते। असंप्रति। उपभोगस्य वर्त्तमानकालप्रतिषेधः। अतितैसृकं। तैसृकं। तैसृकमा
च्छादनं तस्यायमुपभोगकालो न भवतीत्यर्थः। शब्दप्रादुर्भावः प्रकाशता शब्दस्य। इतिपाणिनि। तत्पाणिनि। पाणि
निशब्दो लोके प्रकाशत इत्यर्थः। पश्चात्। अनुरथं पादातं। रथानां पश्चात्। यथार्थे यदव्ययं वर्त्तते। तत्समस्यते। यो
ग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति यथार्थाः। अनुरूपं रूपयोग्यं भवतीत्यर्थः। प्रत्यर्थं। यथाशक्ति। आनु
पूर्व्यमनुक्रमः। अनुज्येष्ठं प्रविशन्तु भवन्तः। ज्येष्ठानुपूर्व्या॥ ६ ॥

नीमित्यस्यार्थे वर्त्तते उपभोगक्रिया च वृत्तौ ऽसंभावादेवांतर्भवति यथा दध्युपसिक्त ओदनो दध्योदन इति तद्वारेण पूर्वोत्तरपदयोः सामर्थ्यं नि
दानीमुपभोगार्हं तैसृकमाच्छादनमित्यर्थः आच्छादनापेक्षस्यापि तैसृकशब्दस्यागमकत्वात् समासः नात्र तैसृकस्य कालानवच्छिन्नोऽभावो
नापि संप्रति तस्याभावः किं तर्हि तदुपभोगस्येत्यर्थाभावादस्य यावत्संप्रतिनिषिध्यते। तत्पाणिनीति तच्छब्दे निपातनोऽप्यस्ति। प्रत्यर्थमिति।
अर्थमर्थं प्रतीति वाक्यमप्यत्र भवति भाष्यप्रयोगात्। यदिवा नात्राव्ययं वीप्साद्योतकं किं तर्हि कर्मप्रवचनीयत्वात् संबंधमवच्छिनत्ति वीप्सा
तु द्विर्वचनद्योत्या। अनुपूर्वस्य भाव आनुपूर्व्यं ब्राह्मणादित्वात् ष्यञ् ष्यञः षित्करणात् स्त्रियामपि भवति तस्य प्रयोगः अनुज्येष्ठं तु पूर्व्येति॥ ६॥

का॰प॰ ।सचक्रमिति। सह शब्दस्य समासः अव्ययीभावे चाकाल इति सभावः। एवमुत्तरेष्वप्युदाहरणेषु। गुणभूतेपीत्यादि। यदि सादृश्य इति नोच्येत
७ पूर्वपदार्थप्रधानोव्ययीभाव इति यदा सादृश्यविशेष्यत्वात्प्रधानं तदैव स्यात् सादृश्यं किंत्वेतद्गुणभूतेन स्यात्। सदृशः किंत्वेति। सादृश्य
वतः प्राधान्यदर्शनेन सादृश्यस्य गुणभावं दर्शयति ससखीति। पूर्ववद्भावः। अथ चिन्तयति मात्राः शृगालः किखी अप्रसिद्धोदाहरणे चि
रंतन प्रयोगात्। संपत्तिशब्दस्य समृद्धौ रूढत्वात् पुनरुदाहरणान्तरमर्थमित्याशंक्याह संपत्तिरनुरूप आत्मभाव इति। सब्रह्मबाभ्रवाणामिति।

।यौगपद्यमेककालता सचक्रं धेहि। युगपच्चक्रं धेहीत्यर्थः। सादृश्यं तुल्यता। किमर्थमिदमुच्यते यथार्थे इत्ये
व सिद्धं। गुणभूतेपि सादृश्ये यथा स्यात्। सदृशः सख्या ससखि। संपत्तिरनुरूप आत्मभावः समृद्धेरन्यः। सब्र
ह्म बाभ्रवाणां। सक्षत्रं शालंकायनानां। साकल्यमशेषता। सतृणमभ्यवहरति। सतुषं। न किंचिदभ्यवहार्यं प
रित्यजतीत्ययमर्थोऽधिकार्यवचनेन प्रतिपाद्यते। अन्तवचने। अन्त इति परिग्रहापेक्षया समाप्तिरुच्यते। सा
ग्न्यधीते। सेष्टि पशुबन्धं। पशुबन्धान्तमधीत इत्यर्थः। इयं समाप्तिरसकलेऽप्यध्ययने भवतीति साकल्यात्पृथ रा॰म॰
गुच्यते॥ ॥श्रीः॥ ॥

तेषामनुरूप एव स्वभाव इत्यर्थः। सतृणमिति। न चात्र तृणत्यागो वास्तव इत्याह न किंचिदिति। तृणभक्षणमधिकोर्थः तद्वचनेन किंचि ७
दभ्यवहार्यं न परित्यजतीत्ययमर्थः प्रतिपाद्यते तृणानि भक्षयन्कथमन्यत्परित्यजेदिति। परिग्रहापेक्षयेति। इदानीमेतावान्प्रदेशोऽध्येत
व्य इति यावतः प्रदेशस्य परिग्रहस्तदपेक्षया समाप्तिरन्तः। स चासकलेप्यध्ययने भवतीति भावः। साग्नीति। अग्न्यादयः शब्दास्तदर्थे
ग्रंथे वर्तन्ते तदानीं परिगृहीतस्य प्रदेशस्याग्न्यादिरन्तो न तु ततः परेणाध्ययनं नास्ति तत्र च न साकल्यमित्याहेयमिति॥ ॥ ॥

॥यथाऽसादृश्ये॥ ॥सादृश्ये समासस्य पूर्वेणैव सिद्धत्वात्संदेहार्थं सादृश्ये यथेत्यवचनाच्चानजोऽत्र प्रश्लेषः। असादृश्य इति किमिति। तत्र
किमनर्थमित्यर्थः यथा देवदत्त इति। देवदत्तस्य यज्ञदत्तं प्रत्युपमानत्वं यथाशब्दो द्योतयति तत्रोपमानस्योपमेयापेक्षत्वेऽपि यथा देवदत्त इत्यत्र पो
सामर्थ्यात्स्वरस्वरेण समासप्रसंग इति भावः। अथ पूर्वेणात्र सादृश्य इति वा यथार्थ इति वा कस्मान्न भवतीत्याह पूर्वेणैषेति॥ ॥यावदव
॥ ॥यावन्त्यमत्राणीति। यावदित्यव्ययं चानियतपरिच्छिन्नं तच्च निघते। अतो नित्यसमासेऽपि तच्छितां तेन निगृह्यते॥ ॥सुप्प्रतिना॥ ॥अस्त्यत्र किं

॥यथाऽसादृश्ये। यथेत्येतदव्ययमसादृश्ये वर्त्तमानं सुपा सह समस्यते अव्ययीभावश्च समासो भवति। यथावृद्धं
ब्राह्मणानामंत्रयस्व। ये ये वृद्धाः। यथाभिरूपं। यथाध्यापकं। असादृश्य इति किं। यथा देवदत्तस्तथा यज्ञदत्तः। य
थार्थे यदव्ययमिति पूर्वेणैवास्ति समासः वचनमिदं सादृश्यप्रतिषेधार्थं॥ ॥यावदवधारणे। यावदित्येतदवधारणे
वर्त्तमानं सुपा सह समस्यते अव्ययीभावश्च समासो भवति। अवधारणमियत्तापरिच्छेदः। यावदमत्रं ब्राह्मणाना
मंत्रयस्व। यावंत्यमत्राणि संभवंति पंच षड्वा तावत आमंत्रयस्व। अवधारण इति किं। यावद्दत्तं तावद्भुक्तं नावधारया
मि कियन्मया भुक्तमिति॥ ॥सुप्प्रतिना मात्रार्थे। मात्रा बिंदुः स्तोकमल्पमिति पर्यायाः मात्रार्थे वर्त्तमानेन प्रति
ना सह सुबंतं समस्यते अव्ययीभावश्च समासो भवति। अस्त्यत्र किंचित् शाकं शाकप्रति। सूपप्रति। मात्रार्थ इति
किं। वृक्षं प्रति विद्योतते विद्युत्। सुबिति वर्त्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थं ७

चित्सूपप्रति किंचिदित्यव्ययं सूपप्रतीत्युल्लिंगेन समानाधिकरणं। सुबिति वर्त्तमाने इति। सुबामंत्रिते इत्यतः। अव्ययनिवृत्त्यर्थमिति। पूर्वं
हि सुब्ग्रहणमव्ययग्रहणेन संबद्धं तथा च पूर्वसूत्रेऽव्ययस्यैव ग्रहणात् अव्ययेन सह विग्रहः स्यात्। स्वरादीनां च दोषाणामन्यमहर्दिवाम
गान्त्रिरात्रिरिति तिष्ठद्गु प्रभृतिविषये सत्वप्रधानत्वादर्शनादत्राव्ययत्वे प्रतिरतिरेवेत्यव्ययस्यैव समासः स्यात्॥ ७ ॥ ॥ ॥

॥ ॥ अक्षशलाका ॥ ॥ अक्षशलाकासंख्याशब्दा इति । अक्षशलाकाशब्दौ संख्यानां चित्तश्चाशब्दा इत्यर्थः । क्वचित्तु अक्षशब्दः शलाका
शब्दः संख्याशब्दाश्चेति पाठः । कितवव्यवहार इति । कितवा द्यूतकारास्तेषां व्यवहारः अक्षशलाकानां पातनेन तत्रैवोपसमास इष्यते एतच्चा
भिधानस्वाभाव्याल्लभ्यते । सर्वे उत्ताना इति । शलाका नाम पिग्रहकृतलास्ते सर्वे च सर्वोऽप्यव सर्वे उत्ताना वाप्यवउत्तानाश्च उत्तानाः अवाञ्चश्चावाञ्च
श्चावाञ्चः पुमान्स्त्रियेति पुंसः शेषः तस्यैवास्येति पातयितुरित्यर्थः । विपातः पराजयः अन्यथापातने सति जयो यस्य इति पातः सर्वे उत्तानाः पं
तन्त्यवाञ्चो वेति ततोऽन्यादृशेषु केषुचिदुत्तानेषु केषुचिदवाक्षु पतत्स्वित्यर्थः । अक्षेणेति । द्व्यावत्ये क्षयाकर्तरि तृतीयाः परमेणेति । अति

। अक्षशलाकासंख्याः परिणा ॥ अक्षशब्दः शलाकाशब्दः संख्या च परिणा सह समस्यन्ते अव्ययीभावश्च
समासो भवति । कितवव्यवहारे समासोऽयमिष्यते । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति । त
त्र यदा सर्वे उत्तानाः पतन्त्यवाञ्चो वा तदा पातयिता जयति । तस्यैवास्य विपातोऽन्यथा पाते सति जायते । अ
क्षेणेदं न तथा वृत्तं यथा पूर्वं जये अक्षपरि । शलाकापरि । एकपरि । द्विपरि । त्रिपरि । परमेण चतुःपरि । पञ्च
सु त्वेकरूपासु जय एव भविष्यति । अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् । कितवव्यवहारे ॥ ॥

शयेनातः पातित्यर्थः । पञ्चपरीति न भवतीति पावत् । अस्योपपादनं श्लोकेनाक्षिपते पञ्चसु त्वेकरूपेष्विति । अत्रापि पुंसः शेषः ए
करूपाश्चिति मायेण पाठः । तत्र शलाकानामेव ग्रहणे जय एव भविष्यतीति । लक्ष्यो र्थो मिग्यः यतः पञ्चस्वेकरूपेषु जय एव भवतीति
न परमेण चतुःपरीत्यन्वयः । अक्षादयस्तृतीयान्ता इति । अस्य व्याहन्तावयं समासः स्थिते तत्र चाक्षादीनां कर्तृत्वात्तृतीयैव युक्ते
ति भावः । पूर्वोक्तस्येति । पूर्ववृत्तस्येत्यर्थः । अनेकार्थत्वाद्धातूनां वचिरिह वर्तने वर्तते तदेव यथा न तदिति तच्छब्देन पराम्रष्ट
ते पूर्वजये वृत्तमक्षादेर्यथा तद्वृत्तमभूत् परिसंख्याने तथा न भवतीत्येवं समासो भवतीत्यर्थः । एवेत्यिस्येति सामान्यायेऽस्मेकव
वचनं जयफले अक्षादीनां यदेकरूपं वर्तनं तद्विपरीतवर्तने परि
णा द्योत्ये समास इति पाठः ॥ ॥

एम ४
८

।एकत्वे शलाकयोरिति।अक्षशलाकाशब्दयोरेकवचनांतयोः समासस्तदर्थः।।दूरमप्यभिधानस्वाभाव्यादेकत्वं लभ्यते।अन्यथा एजयुरूपस्त्यादि
विकाभेदैकत्वमवगम्यते।न तु एकत्वं।प्रायेणानुकितवव्यवहारे।चएकत्वे अक्षशलाकयोरिति।ल्लोकरूपेण षष्ठ्यतेन त्रार्थेतिरंस्पर्शे हि
नाकार्यप्रसंगाच्च।कितवव्यवहार इति किं।अक्षेणेदं न तथा वृत्तं यथा पूर्वं शकटेन।एकत्व इति किं।अक्षाभ्यामक्षैर्वा इदं न तथा वृत्तं।अक्षा
दय इति किं।आमतो रोदं न तथा वृत्तं यथा पूर्वं।जये पराजयोरिति वचनात् सुबंतमात्रेण न भवति।। ।।अपपरि।। ।।ननु बहिः शब्देन योगेन
केन चित्पंचमी विधीयते तत्कथं तस्य पंचम्यंतेन समासः बहिर्ग्रामात्।ग्रामाद्दिक्षत्र समासार्थी च न समासेन भवितव्यमत आह बहिः

।एकत्वे ऽक्षशलाकयोः।। ।।विभाषा।।विभाषेत्ययमधिकारो वेदितव्यः।यदित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा
भवति।वक्ष्यति अपपरिबहिरंचवः पंचम्या।अपत्रिगर्त्तं वृष्टो देवः।अपत्रिगर्त्तेभ्यः।। ।।अपपरिबहिरंचवः पंच
म्या।।अपपरिबहिस्अंचु इत्येते सुबंताः पंचम्यंतेन सह विभाषा समस्यंते अव्ययीभावश्च समासो भवति।अपत्रि
गर्त्तं वृष्टो देवः।अपत्रिगर्त्तेभ्यः।परित्रिगर्त्तं।परि त्रिगर्त्तेभ्यः।बहिर्ग्रामं।बहिर्ग्रामात्।प्राग्ग्रामं।प्राग्ग्रामात्।बि
हिः शब्दयोगे न पंचमीभाव्यस्य एतदेव ज्ञापकं।। ।।आङ्मर्यादाभिविध्योः।।आङ् इत्येतन्मर्यादायामभिविधौ व
र्त्तमानं पंचम्यंतेन सह विभाषा समस्यते अव्ययीभावश्च समासो भवति।आपाटलिपुत्रं वृष्टो देवः।आपाट
लिपुत्रात्।अभिविधौ।आकुमारं यशः पाणिनेः।आकुमारेभ्यः ८

शब्देनेति।न च वचनसामर्थ्याद्बहिः शब्दस्य पंचम्यंतेन समासो भवति इति वाच्यं पंचमीग्रहणात्।इहत्वपपरिशब्दौ परस्परसाहचर्याद्वर्ज
नार्थौ गृह्येते तौ च कर्मप्रवचनीयौ तद्योगे च पंचम्येव विहिता।अंचतिरप्यपरिसाहचर्याद्व्ययमेव गृह्यते तद्योगे पंचम्युत्तरपदलक्षणा पं
चम्येवाश्रितं तेन पंचमीग्रहणं ज्ञापयति षष्ठी विषये बहिर्योगे पंचमी भवतीति।। ।।आङ्मर्यादा।। ।।मर्यादाभिविध्योरिति।शंकामक
नुकथं पंचम्यंतेन वर्त्तते आङ् च कर्मप्रवचनीयस्तद्योगे पंचमी विहिता एतयोश्चैवार्थयोराङः कर्मप्रवचनीयसंज्ञा।आङ्मर्यादावचन इ

ति तत्र हि वचनग्रहणं मर्यादोक्तिमात्रे यथा स्यात् इत्यभिविधावपि भ
वतीति तत्रैव वाभिविधिग्रहणमेवास्तु ॥ ८ ॥ ॥ ॥

का॰ प॰
९

॥ ॥लक्षणेनाभि॥ ॥अभ्यग्निप्रत्यग्नीति। अग्निमभि अग्निं प्रतीति विग्रहः अभिरभागे लक्षणेत्थंभूतेति चाभिप्रत्योः कर्मप्रवचनीय
त्वाद्द्वितीया। तत्राग्निर्लक्षणं तेन हि शलभानां यानं लक्ष्यते अभिप्रती च लक्ष्यलक्षणाभावं द्योतयितुमाभिमुख्यमपि द्योतयतः। स्रुघ्नं प्रति
गत इति। स्रुघ्नादागतस्तमेव प्रतिगतः प्रतिनिवृत्त इत्यर्थः अत्र प्रतिगमनं प्रतिकर्मत्वेन विवक्षितत्वात् स्रुघ्नो लक्षणं न भवति। येनाग्नि
स्तेन गत इति। येन देशेनाग्निर्गतस्तेनेति प्रतीति भवति गमनस्याग्निर्लक्षणं नाभिमुख्यं चास्ति येनेतेन शब्देनोरग्निशब्देन सह समासः
स्यात्। अभ्यङ्काः प्रत्यङ्का इति। अभिनवोऽङ्क आसां प्रतिनवोऽङ्क आसामिति बहुव्रीहिः अङ्कोऽत्र भवति गवां लक्षणं नाभिमुख्यं तु
नास्ति। ननु च सति संभवे व्ययार्थप्रधानेऽव्ययीभाव इत्युक्तं कथमत्र प्रसंगः एवं तर्ह्येतत् ज्ञापयति भवत्यत्र प्रकरणे बहुव्रीहिविषये

॥लक्षणेनाभिप्रती आभिमुख्ये॥ लक्षणं चिह्नं तद्वाचिना शब्देन सह अभिप्रती शब्दावाभिमुख्ये वर्त्तमानौ विभाषा समस्ये
तेऽव्ययीभावश्च समासो भवति। अभ्यग्नि शलभाः पतन्ति। अग्निमभि। प्रत्यग्नि। अग्निं प्रति। अग्निं लक्षीकृत्य अभिमुखं
पतन्तीत्यर्थः। लक्षणेनेति किं। स्रुघ्नं प्रतिगतः। प्रतिनिवृत्य स्रुघ्नमेवाभिमुख्येन गतः। अभिप्रती इति किं। येनाग्निस्तेन
गतः। आभिमुख्य इति किं। अभ्यङ्का गावः। प्रत्यङ्का गावः॥ ॥अनुर्यत्समया॥ समया सामीप्यं। अनुर्यस्य समीपवाची =
तेन लक्षणभूतेन सह विभाषा समस्यते अव्ययीभावश्च समासो भवति॥

व्ययीभाव इति तेन संख्या वंश्येनेति मुनित्रिकरणमिसेतत्सिद्धं भवति॥ ॥अनुर्यत्॥ ॥यत्समयेति षष्ठीसमासोऽयं कथं पुनः समया राम॰
शब्देन योगे षष्ठी यावता अभितः परितः समयेति द्वितीया भवति नैष दोषः समयाशब्दस्समुच्चयोऽर्थः सामीप्ये न योगे द्वितीयाऽ ९
हनु समयाशब्दश्च वा चिन्त्यनुशब्दे समयाशब्दो वर्त्तते तेनाह अनुर्यत्समया समयावाचीति। यस्य समयेति कोऽर्थः समयावाचीत्य
तदिह मुख्येनार्थेनायोगाद्द्वितीया न भवति षष्ठी च तु भवति तत्सामर्थ्यसमासः न च पूरणगुणेति प्रतिषेधः अन्यत्वात्सा
मीप्ये हि वर्त्तमानः समयाशब्दो सत्त्ववाचित्वात् समयं इह त्वनुशब्दे वर्त्तते तत्र यथा भिरभाग इत्यादावनुकरणस्यासत्त्वान्न भवति
तथास्यापि एवं च यत्समयेत्यविभक्तिकः सौत्रो निर्देशः इत्यावयियत्समयेति सूत्रानुकरणेन विभक्त्यभावः तेनेतितद्वाचिनाश

अनुवनमिति। वनस्यान्तिकमिति सामीप्यसंबंधे षष्ठीसमासः। अस्यार्थमाह वनं समयेति॥ ॥यस्य चायामः॥ ॥लक्षणेनेति वर्त्तत इति। अ-
स्याः आयामो गंगायाः इत्यस्यार्थे अनुगंगमिति स्यात्। अत्रायामवाचित्वादनु रेवायामशब्देनोक्त इत्याह अनुर्यस्यायामवाचीति। अनु-
गंगं वाराणसीति। षष्ठ्यन्तेन गंगाशब्देन समासः गंगाया अन्विति। आयामो लक्षणत्वेनानुना द्योत्यते। लक्षणस्य लक्ष्यापेक्षत्वाल्लक्ष्यं सं-
समासार्थ इत्यर्थो दुपमानोपमेयभावे समास इति वाराणस्याः सामानाधिकरण्येन गंगायाः स्वायामो यस्याः गंगेवायता वाराणसीत्यर्थः।

अनुवनमशनिर्गतः। अनुरिति किं वनं समया। यत्समयेति किं। वृक्षमनु विद्योतते विद्युत्। अव्ययं वि-
भक्तिसमीपेत्येव सिद्धे पुनर्वचनं विभाषार्थं॥ ॥यस्य चायामः॥ लक्षणेनेत्यनुवर्त्तते। आयामो दैर्घ्यं।
अनुर्यस्यायामवाचीतेन लक्षणभूतेन सह समस्यतेऽव्ययीभावश्च समासो भवति। अनुगंगं वारा-
णसी। अनुयमुनं मथुरा यमुनायामो लक्ष्यते। आयाम इति किं। वृक्षमनु विद्योतते विद्युत्॥ १ ॥

तद्वद्दीर्घायतेत्यर्थ इति केचित् तथा चानुगंगमेतत्सूत्रमित्येकशेषसूत्रे भागवृत्तिकारः अयुक्तोऽनेनेति वयं किं गंगायता वाराणसी
उतो दीर्घायतेति संदेहे इदमुच्यते अनुगंगं वाराणसीति यथा दीर्घायता गंगा तथा दीर्घायता वाराणसीत्यर्थः। गंगायामानुसारेण
वाराणस्या आयाम इत्यर्थः। यमुनायामेन मथुराया आयामो लक्ष्यत इति। न यमुना स्वरूपेण लक्षणं किं तर्ह्यायामेन मथुरापि न स्वरूपे-
णालक्ष्यं किं तर्ह्यायामेन तत्र प्रामाप्राप्तविवेकेनेदमुच्यते यमुनायामेन मथुराया आयामो लक्ष्यत इति॥ १ ॥ ॥ ॥

का॰प॰
१०

॥ तिष्ठद्गु ॥ समुदाया एव निपात्यन्त इति गणे तथा पाठ एव तेषां निपातनं तेन न शतृशानज्वा अपि भवति सुपो धातुप्रातिपदिकयोरिति च प्रक्रि-
याकार्यं न कर्तव्यमिति भावः। अव्ययीभावसंज्ञानि भवन्तीति। समाससंज्ञापि विधेया अन्तोदात्तत्वं च प्रातिपदिकसंज्ञा च यथा स्यादिति। तिष्ठ-
द्गु कालविशेष इति। कालविशेष इत्येतत्तु तैरपि संबध्यते अत एवोक्तं एते कालशब्दा इति। एतावान् कालविशेष इत्यस्याधिकार इत्य-
र्थः। विभक्त्यन्तरेण न संबध्यन्त इति। अव्यतिरिक्त एव प्रातिपदिकार्थे प्रयोगात् एषां कर्तृत्वे नान्यत्रेत्यर्थः। अन्यपदार्थे च वर्तन्त इति। तिष्ठद्गु
आयतीगवमित्येतेष्वप्ययं विधिः। अन्यथा कालशब्दत्वायोगात्। चकारोऽवधारणार्थ इति। अनेकार्थत्वान्निपातानाम्। अपरः समासो न
भवतीति। वृत्त्यन्तरेण भवतीत्यर्थः। आ तिष्ठद्गु जपन्संध्यामिति तु पञ्चम्या अव्ययादिति लुक्। समासः। तिष्ठद्गु वहद्ग्विति। लटः शत्रादेशो

॥ तिष्ठद्गुप्रभृतीनि च ॥ तिष्ठद्ग्वादयः समुदाया एव निपात्यन्ते तिष्ठद्गुप्रभृतीनि शब्दरूपाणि अव्ययीभावसंज्ञानि भवन्
ति तिष्ठद्गु कालविशेषे तिष्ठन्ति गावो यस्मिन्काले दोहनाय स तिष्ठद्गु कालः। खलेयवादीनि प्रथमान्तानि विभक्त्यन्त
रेणानेव संबध्यन्ते ऽन्यपदार्थे च काले वर्तन्ते। चकारोऽवधारणार्थः अपरः समासो न भवति परमं तिष्ठद्ग्विति। ति
ष्ठद्गु। वहद्गु। आयतीगवं। खलेबुसं। खलेयवं। लूनयवं। लूयमानयवं। पूतयवं। पूयमानयवं। संहृतयवं। संह्रियमा
णयवं। संहृतबुसं। संह्रियमाणबुसं। एते कालशब्दाः। समंपदाति। सुषमं। विषमं। निष्षमं। दुःषमं। अपरसमं।
आयतीसमं। प्राह्णं। प्रमृगं। प्ररथं। प्रदक्षिणं। अपरदक्षिणं। संप्रति। असंप्रति॥ ॥

निपातनान्नगोस्त्रियोरिति ह्रस्वः। आयतीगवमित्यत्र तु पुंवद्भावाभावः शत्रादेशः समासान्तश्च। खलेयवं खलेबुसमिति सप्तम्या अ-
लुक्। लूयमानयवादिषु शानजादेशः। समभूमि समपदातीति। समत्वं भूमेरिति पूर्वपदार्थप्राधान्येऽव्ययीभावः। क्वचित्तु समभूमि-
समंपदातीति पाठः तत्र पूर्वपदस्य मुमागमः। अन्ये तु संभूमि संपदातीति पठन्ति तत्र समस्यान्तलोपः सशब्दस्य वा समासः। सुषमादौ
शोभनत्वं समस्य विगतत्वं दुष्टत्वं निर्गतत्वमपगतत्वं समस्येति विग्रहः। आयतीसमम् आयती समे शत्रादेशः पूर्ववत्पुंवद्भावश्च।

स॰प॰
१०

एवं पापसमं पुण्यसममिति। शास्त्रादिषु चतुर्षु गतत्वमक्त इत्यादि विग्रहः। संगतं प्रतिगात समसं प्रति। विपरीतमसं प्रति। स्वकर्म व्यतिहार
इति। अयमेव हिरिंग्मादिषु विशेषि विधीयत इति तत्राव्ययीभावत्वं। दंडादंडीति दंडैश्च दंडैश्च प्रहृत्य सेदं युद्धं प्रवृत्तं तत्रानेनेदमिति सरूपइति
वहुव्रीहिः अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः इत्र अव्ययीभावत्वेनाव्ययत्वात्सुपो लुक्॥ ॥पारेमध्ये॥ ॥वावचनादिति। ननु
महाविभाषयैवायमव्ययीभावो विकल्पिते पक्षे षष्ठीसमासोपि भविष्यति सोपि विकल्पित इति वा समासोपि भविष्यति। उच्यते इ

।पापसमं पुण्यसमं। इच कर्मव्यतिहारे दंडादंडि। मुसलामुसलि॥ ॥पारेमध्येषष्ठ्या वा॥ ॥षष्ठी
समासे प्राप्ते तदपवादोऽव्ययीभाव आरभ्यते। वावचनाच्च षष्ठीसमासोपि पक्षेऽभ्यनुज्ञायते। पारेमध्ये
शब्दौ षष्ठ्यंतेन सह विभाषा समस्येते। अव्ययीभावश्च समासो भवति। तत्सन्नियोगेन चानयोरेकारांतत्वं निपा
त्यते। पारेगंगात्। पारेगंगं। मध्येगंगं। षष्ठीसमासपक्षे। गंगापारं। गंगामध्यं। महाविभाषया वाक्यविकल्पः
क्रियते॥ १० ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥

ह वाक्येनाभिधाने प्राप्ते चान्निरपेक्षमाणा वाक्यस्य वाधिका प्राप्नोतीति विकल्पेन वाक्यमेव पक्षेऽभ्यनुज्ञायते तत्रापवाद विकल्पो वाक्य
स्यैव प्रापकः इत्युत्सर्गस्य नित्यो वाधकः स्यात् वावचनात्सोपि पक्षेऽभ्यनुज्ञायत इति त्रैरूप्यसिद्धिः एतदेव वावचनं ज्ञापकं पक्षोत्सर्गोपि
वाद्यो महाविभाषया विकल्पितो तत्रापवादेन मुक्ते उत्सर्गेण भवतीति तेन पूर्वकायस्येत्यत्रैकदेशिसमासेन मुक्ते षष्ठीसमासो
न भवति दक्षस्यायस्यंदादिश्रित्यत्र इजा मुक्ते ऽण्न भवति। एकारांतत्वं च निपातनं यत्र सप्तम्यर्थो न संभवति पारेगंगादानयेति तद
र्थं संभवे तु तत्पुरुषे कृति बहुलमिति बहुलवचनादलुका सिद्धं॥ १० ॥ ॥

का॰प॰ ९०

११

॥ ॥संख्यावंश्येन॥ ॥एकलक्षणइति। एकस्वभावः सन्तानः संबंधः। संतानिनामेकलक्षणत्वात् संतानस्यैकलक्षणत्वं। द्वौ मुनी इति। पाणिनिकात्यायनौ त्रिमुनीति। नौ च भाष्यकारश्च जन्मना त्वेकलक्षणस्योदाहरणं एकविंशतिभारद्वाजमिति। यदा तु विद्ययास हेति लक्षणेनाभिप्रतीत्यत्र प्रकारान्तरेणाप्ययमर्थः साधितः॥ ॥नदीभिश्च॥ ॥नदीवचनैः शब्दैरिति नदीभिरिति बहुवचननिर्देशात् स्वरूपस्य संज्ञानद्याश्चाग्रहणमिति भावः। समाहारे चायमिष्यत इति। अन्यथा पुरस्तादयथादेमाघेन पूर्वकालैकेत्यस्यापवा

॥संख्यावंश्येन॥ ॥विद्यया जन्मना वा प्राणिनामेकलक्षणः संतानो वंश इत्यभिधीयते। तत्र भवो वंश्यः तद्वाचिना सु वंतेन सह संख्यासमस्यते अव्ययीभावश्च समासो भवति। द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणस्य। त्रिमुनि व्याकरणस्य। यदा तु विद्यया तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति। द्विमुनि व्याकरणं। त्रिमुनि व्याकरणमिति। जन्मना। एकविंशतिभारद्वाजं॥ ॥नदीभिश्च संख्येत्यनुवर्त्तते। नदीवचनैः शब्दैः सह संख्या समस्यते अव्ययीभावश्च समासो भवति। समाहारे चायमिष्यते। सप्तगंगं। द्वियमुनं। पंचनदं। सप्तगोदावरं॥ ॥अन्यपदार्थे च संज्ञायां। संख्येति निवृत्तं। नदीग्रहणमनुवर्त्तते। नदीभिः सह सुबन्तमन्यपदार्थे वर्त्तमानं संज्ञायां विषये समस्यते अव्ययीभावश्च समासो भवति। विभाषाधिकारेपि नित्यसमास एवायं। न हि वाक्येन संज्ञा गम्यते। उन्मत्तगंगं नाम देशः। लोहितगंगं। कृष्णगंगं। शनैर्गंगं। अन्यपदार्थ इति किं। कृष्णवेण्णा। संज्ञायामिति किं। शीघ्रकः स्यात् समाहारे तु परत्वाद् द्विगुरेव स्यात् मतश्चैकनदीत्यत्राव्ययीभावे सति तिन्निर्बंधनो नद्योर्गोदावर्योरिति समासाग्रहणमीत्यतिरिच्य प्राप्नोति नपुंसकत्वं च न स्यात्र विशेषवाचिनामेव ग्रहणमिति प्रमाणमस्ति यस्तु गोदावर्यश्च नद्याश्च स च समासान्तः स पंचनदमिसादावक्षणांश्च एकापूर्वपदे कनदमित्यपि भवति तथान्यपदार्थेप्यव्ययीभावः स्यात् इरावती को देश इति नवात्र परत्वात् ॥ ॥

॥

राम॰

११

गतत्पुरुषः॥ ॥उत्तरपदार्थप्रधान इति। पूर्वकायोर्द्धपिप्पलीत्यादौ त्वधिकारएव प्राप्तत्पुरुष इतिसंज्ञा॥ ॥द्विगुश्च॥ ॥समासांता
इति। यथापि राजाहःसखिभ्यष्टच् तत्पुरुषस्यांगुलेः संख्याव्ययादेरिति टजचौ तत्पुरुषनिबंधनौ तथापि प्रकृतिभेदाद्भेदः विवक्षायां

॥तत्पुरुषः॥ तत्पुरुष इति संज्ञाधिक्रियते प्राग्बहुव्रीहेः यानितऊर्द्ध्वमनुक्रमिष्यामस्तत्पुरुषसंज्ञा
स्ते वेदितव्याः वक्ष्यति द्वितीया श्रितातीतपतितेति। कष्टश्रितः। पूर्वाचार्यसंज्ञा चेयं महती तरं
गीकरणामुपाध्येरपि तदीयस्य परिग्रहार्था। उत्तरपदार्थप्रधानस्तत्पुरुष इति। तत्पुरुषप्रदेशाः त
त्पुरुषे कृति बहुलमिति इत्येवमादयः॥ ॥द्विगुश्च॥ द्विगुश्च समासस्तत्पुरुषसंज्ञो भवति। द्विगो
स्तत्पुरुषत्वे समासान्ताः प्रयोजनं। पंचराजी। दशराजी। द्व्यहः। पंचगवं। दशगवं ११ ॥ ॥

बहुवचनं। पंचराजमिति। उत्तरपदस्याजकारांतत्वात्स्त्रीत्वाभावः समासार्थोत्तरपदस्यांताः समासांता इति चुपश्लेयात्रादित्वात्ङ्क
चिः पंचराजीति स्त्रीलिंगस्य पाठः सभाष्यविरोधादयपाठः। द्व्यह इति अह्नष्टखोरेवेति टिलोपः रात्राह्नाहाः पुंसि। पंचगवमि
ति। गोरतद्धितलुकीति टच् पूर्ववत्स्त्रीत्वाभावः॥ ११ ॥

का॰ प॰ ८०

१२

॥ ॥ द्वितीया श्रिता ॥ ॥ श्रितादिषु गत्यर्थत्वात् कर्तरि क्तः पतिरपि सकर्मकः ते जिह्मा पंसो नरकं पतता मेति यथा अत्यस्तो ऽत्यतिक्रमो ऽनि विशेष एव प्रा
प्तिरप्यत्रा ऽनिरेव न फलं एवमापन्नेऽपि इह श्रितपतितगतेस्यं समासो न विधेयः कष्टं यः कष्टं श्रितः कष्टं तेन श्रितं भवति न तत्र बहुव्रीहिणा सि
द्धं नार्थभेदेन रूपभेदेन स्वरभेदः तत्पुरुषे त्वहीने द्वितीयेति श्रितपतितगतेभ्यः पूर्वपदे प्रकृतिस्वर एव भवति अतीतादिनिस्तु स्वर एव सि ॥
द्ध्ये विधेयः तथाहि तेषु सुस्वभाव्या अधिस्वरेणाभावे नाहीनस्वरेण अतीतानामन्त्यपोरहीन इति निषेधात् प्राप्तापन्नयोस्त्वहीने द्वितीया
नुपसर्ग इति वचनात् बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरेणान्तावन्तस्मात् श्रितादिभिरयं न समासो विधेयः ॥ तत्रायमप्यर्थः अहीने द्वितीयेति

॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ सुप् सुपेति वर्त्तते तस्य विशेषणमेतत् द्वितीया द्वितीयान्तं सुबन्तं श्रि
तादिभिः सह समस्यते तत्पुरुषश्च समासो भवति ॥ कष्टश्रितः कष्टं श्रितः नरकश्रितः ॥ अतीत । कान्तारमतीतः कां
तारातीतः ॥ पतित । नरकं पतितः नरकपतितः ॥ गत ग्रामं गतो ग्रामगतः ॥ नरकगतः अत्यस्त । तरंगानत्यस्तः तरंगा
त्यस्तः तुहिनात्यस्तः ॥ प्राप्त सुखं प्राप्तः सुखप्राप्तः ॥ आपन्न सुखमापन्नः सुखापन्नः दुःखापन्नः ॥ श्रितादिषु
गमिगाम्यादीनामुपसंख्यानं ॥ ग्रामं गामी ग्रामगामी ॥ ग्रामं गामी ग्रामगामी ॥ ओदनं बुभुक्षुः ओदनबुभुक्षुः ॥ ॥

॥ ॥ छ ॥ ॥

तदपि न वक्तव्यं भवति जातिस्वरप्रसंगस्तु यदा जातिकालसुखादिभ्यः परे श्रितादयो भवन्ति तदा पूर्वपदप्रकृतिस्वरं बाधित्वा जातिका १२
लसुखादिभ्योऽनाच्छादनादित्ययं तोदात्तत्वप्रसंगः ॥ ननु च तत्पुरुषारंभेऽपि बहुव्रीह्यर्थविवक्षायां न दोषः स्याद्यदि तु बहुव्रीहिरिति जातिस्वरः
स्यादेव एवमप्यस्ति भेदः तत्पुरुषे हीने द्वितीयेति पूर्वपदप्रकृतिस्वरो बहुव्रीहौ जातिकालेत्यन्तोदात्तत्वमिति द्वौ स्वरौ भवतः अना
रंभे तु जातिस्वर एव स्यादिति ॥ एवं तर्हि पदे तद्द्वा जात इति तद्व्याजातश्रितपतितगतेषु विधिर्वक्तव्य एवमप्यहीने द्वितीयेत्येतदपि न
वक्तव्यं मित्वस्ये वक्तव्य एतावांस्तु विशेषः तत्पुरुषारंभे तत्र पूर्वपदप्रकृतिस्वरत्वं बहुव्रीहौ तु जातिस्वर इति द्वयोः समासयोर्हि

॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥

।अत्रोच्यते जातिकालसुखादिभ्य इति निष्ठाः सह बहुव्रीहौ श्रितादीनां निष्ठे ति पूर्वनिपातप्रसंगात्स्वरभेदः तथा सर्वत्र कबपि प्राप्नोति नन्वसौ
शेषाद्विभाषेति विकल्पितः स च तत्पुरुषारंभे पि भवत्येव बहुव्रीहिरप्युपपन्नमात एवमपि बहुव्रीहावपि द्वैस्वर्यं युगपन्मात्पूर्वपदप्रकृतिस्वर
पक्षे पि बहुव्रीहित्वान् पाणास्यैकपः प्रसंगः तत्पुरुषारंभे तु नत्रैवाहीने द्वितीये ति पूर्वापदप्रकृतिस्वरपक्षे पि बहुव्रीहित्वान् पाणास्यैकपः
प्रसंगः तत्पुरुषारंभे तु तत्रैवाहीने द्वितीये ति पूर्वपदप्रकृतिस्वरः बहुव्रीहौ तु जातिस्वर एव तन्निस्समित्यंतोदात्तादेव कस्य पूर्वपदप्रकृतिस्व
रादित्यस्यैवाविशेषः। तथार्थभेदो पि गत्यर्थाकर्मकेति कर्तरि क्तो धात्वर्थस्य सर्वात्मना निष्ठितत्वे पि भवति आरूढो हस्तं देवदत्तादि तिरस्
स्य एवौ अतेकर्मणि तु भवन्न सर्वात्मना निष्ठितत्वे भवति आरूढो हस्ती देवदत्तेनेति तथेहापि कष्टंश्रित इति कष्टमनुभवन्नेवमुच्यते क

।स्वयं क्तेन। ।।स्वयमेतदव्ययं आत्मनेत्यस्यार्थे वर्तते। तस्य द्वितीयासंबंधोनुपपन्न इति द्वितीयाग्रहणमुत्तरार्थमनु
वर्तते। स्वयमित्येतत्सुबंतं क्तांतेन सह समस्यते तत्पुरुषश्च समासो भवति। स्वयंधौतौ पादौ स्वयं विलीनमाज्यं एक
पद्यमेकस्वर्यं च समासत्वाद्भवति॥ ॥१२॥ ॥छ॥ ॥

ष्टं श्रितमनेनेत्यनुभूतकष्टः श्रितशब्दो विवक्षितस्यार्थस्य साक्षाद्वाचको भवति तत्पुरुषे। बहुव्रीहौ त्वर्थात् यथा राज्ञः सखेत्युक्ते नूनं राजाप्य
स्य सखेति स एष सूक्ष्मदृशामेव विषयः। गमिगाम्यादीनामिति। उणादीनामप्यत्वेषां च संग्रहार्थमुभयोरुपादाने। ग्रामं गामीति। गमेरिनि
रित्यौणादिक इनिप्रत्ययः भविष्यति गम्यादय इति भविष्यति काले ग्रामं गामीति। आवश्यके णिनिः गमस्थ कर्मणीत्यत्र द्वितीया प्र
हणमपवादविषये पि विधानार्थमिति तद्योगे द्वितीयैव भवति। ओदनं बुभुक्षुरिति। भुजेः सन् सनाशंसभिक्ष उः न लोकाव्ययेति
षष्ठीनिषेधः। स्वयं क्तेन। ।।स्वयंधौतौ विति। धावुगतिशुद्ध्योः उदितो वेति क्त्वायां विकल्पितेट् त्वाद्यस्य विभाषेतीट्प्रतिषेधः छो
श्चूठ्नुनासिके चेत्यूठ् एत्येधत्यूठ्स्विति वृद्धिः स्वयं विलीनमिति लीङ् श्लेषणे स्वादय ओदित इति ओदितश्चेति निष्ठानत्वं कर्तृग्रहणेन गतिका
रकपूर्वस्यापि ग्रहणाद्विलीनश्शब्दः क्तांतः। एकपद्यमेकस्वर्यं समासादिति। समसनं समासः संज्ञा बतनो हेतोरित्यर्थः॥ १२ ॥ ॥

का॰प॰२१ ॥ ॥खट्वाक्षेपे॥ ॥खट्वारोहणं चेत्यादि विनिंदितो मार्गो विमार्गः भूमिशयनार्हो ब्रह्मचारी वेदाध्ययनकाले तेनाधीत्य स्नातो गुरुभिरनुज्ञातेन खट्वारोढव्याय
नान्यथा खट्वारोहणं तद्विमार्गप्रस्थानं तज्जो दाहरणमन्यस्यायेवं विधस्योपलक्षणं तेन खट्वामारोढुमाचार्य शिष्यविमार्गप्रस्थितः खट्वारूढ इत्युच्यत
१३ इत्यर्थः॥ ॥सामि॥ ॥तस्यासत्वेन चित्वादिति द्रव्याधाराद्धि कर्मशक्तिरतो द्रव्यवाचिन एव द्वितीया भवति नाद्रव्यवाचिन इत्यर्थः॥ ॥काला॥
इह कालात्यन्तसंयोग इत्येको योगः कर्तव्यः तत्र क्तेनेत्यस्य निवृत्तत्वात्सर्वत्र समासः सिद्ध्यति किमर्थं योगविभागेन क्तान्तेन समासो विधीयत

॥ ॥खट्वाक्षेपे॥खट्वाशब्दो द्वितीयान्तः क्तान्तेन सह क्षेपे गम्यमाने समस्यते तत्पुरुषश्च समासो भवति। क्षेपो निंदा। स च स
मासार्थ एव तेन विभाषाधिकारेपि नित्यसमास एवायं। न हि वाक्येन क्षेपो गम्यते। खट्वारोहणं चेह विमार्गप्रस्थानस्योपल
क्षणं। सर्व एवाविनीतः खट्वारूढ इत्युच्यते। खट्वारूढो जाल्मः। खट्वाप्लुतः। उत्पथप्रस्थित इत्यर्थः। क्षेप इति किं। खट्वामारूढः॥
सामि॥ ॥सामीत्येतदव्ययं अर्द्धशब्दपर्यायस्तस्यासत्ववाचित्वात् द्वितीययानास्ति संबंधः। तत्र सुबन्तं क्तान्तेन सह समस्य
ते तत्पुरुषश्च समासो भवति। सामिकृतं। सामिपीतं। सामिभुक्तं। एकपद्यमेकस्वर्यं च समासत्वाद्भवति॥ ॥कालाः॥
॥ द्वितीयाक्तेनेति वर्त्तते। कालवाचिनः शब्दा द्वितीयान्ताः क्तान्तेन सह समस्यन्ते तत्पुरुषश्च समासो भवति। अनत्यन्तसंयोगा
र्थं वचनं। षण्मुहूर्त्ताश्चराचराः ते कदाचिदहर्गच्छन्ति कदाचिद्रात्रिं। अहरतिसृता मुहूर्त्ताः। रात्र्यारूढाः। रात्रिसंक्रान्ताः। मा
सप्रमितश्चन्द्रमाः मासं प्रमातुमारब्धः मासप्रमितः प्रतिपच्चन्द्रमा इत्यर्थः अत्यन्तसंयोगे च॥ ॥कालाइति वर्त्तते क्तेनेति निवृत्तं।
अत्यन्तसंयोगः कृत्स्नसंयोगः। कालस्य येन संबंधिना व्याप्तिः। कालवाचिनः शब्दाः द्वितीयान्ता अत्यन्तसंयो
इत्यत आह अनत्यन्तसंयोगार्थं वचनमिति। अनत्यन्तसंयोगमेव दर्शयति षण्मुहूर्त्ता इति। चराचरा इति। चरेः पचाद्यचि चरिचलिपतिवदीनां
मुपसंख्यानमाकाम्यासस्येति द्विर्वचनमागागमश्चाभ्यासस्येति चरन्तो नवस्थिता इत्यर्थः। कदाचिदहरिति। उत्तरायणे। कदाचिद्रात्रिमिति द
क्षिणायने। तत्र तेषां षड्भिः सुद्धैर्नैरल्पो रात्रेश्च नात्यन्तसंयोगः। मासप्रमित इति मासः आदिकर्मणि क्तः कर्तरि क्तः मासं परिच्छेत्तुमारब्धवानित्य

गेगम्यमाने सुपा सह समस्यन्ते तत्पुरुषश्च समासो भवति। मुहूर्त्तं
सुखं मुहूर्त्तं सुखं सर्वरात्रकल्याणी। सर्वरात्र शोभनी॥ ॥
प्रतिपच्चंद्रमा इति। न च तेन मासस्यात्यन्तसंयोग इति भावः॥ ॥
राम॰ १३

तृतीया॥ ॥तृतीयायाम्छांदसेलुकिंगुणवचनेनेत्यनेन सामानाधिकरण्यं अर्थेनेति पृथक्पदं अत एव गुणवचनेनार्थशब्देन चेति कीदृशेन गुण
वचनेन तत्कृतेनेति तदिति सर्वनाम्ना प्रकृतस्य तृतीयांतस्य प्रत्यवमर्शः सचशब्दः नच शब्देन गुणवचनस्य करणं संभवति। ततः सामर्थ्यात्तदर्थ
कृतेनेति विज्ञायत इत्याह तृतीयांतार्थकृतेनेति यावदिति यावच्छब्दो नियाततत्वात्तत्पर्यायपर्यायतां दर्शयति अर्थद्वारकं चेदं गुणवचनस्य विशेष
णं अर्थ एव हि तृतीयार्थेन क्रियते न गुणवचनः शब्दः वचनग्रहणं किं यावता अर्थेन समासो न भवति गुणवचनेनैव भविष्यति एवं यथाविज्ञायेत
गुणमुक्तवान् गुणवचनः कृत्यल्युटो बहुलमिति भूते कर्त्तरि ल्युट् गुणमुक्तवतामिति गुणोपसर्जनद्रव्यवचनेनेत्यर्थः। तेन इह न स्यात् गुणमि
ति गुणमात्रनिष्ठेन भवति गुणश्चात्र सत्वे निविशते पेतीति लक्षितो गृह्यते न तु यस्य गुणस्याहि भावाद्द्रव्ये शब्दनिवेश इति वच्छब्दस्य तेनिमित्तं

॥तृतीया तत्कृतार्थेन गुणवचनेन॥ ॥सुप्सुपेति वर्त्तते तस्य विशेषणमेतत्। तृतीयांतं सुबंतं गुणवचनेनार्थ
शब्देन च सह समस्यते तत्पुरुषश्च समासो भवति। कीदृशेन गुणवचनेन तत्कृतेन तदर्थकृतेन तृतीयांतार्थकृतेने
ति यावत्। शंकुलया खंडः शंकुलाखंडः। किरिणा काणः। किरिकाणः। अर्थशब्देन धान्येनार्थः धान्यार्थः। त
तत्कृतेनेति किं। अक्ष्णा काणः॥ ॥

तृतीयांतार्थकृतेऽवश्यंभावी तत्संभावात्। शंकुला खंडः किरिकाणः इति खंडिभेदने करणनिमीलन इत्य
स्मो वा जिमुत्सादिताविनो क्रियारूपायां गुणे वर्त्तिलाभ नवूलोपादभेदोपचाराद्द्रव्यतद्वति द्रव्ये वर्त्तते इति गुणवचनौ भवतः। धान्येनार्थ इ
ति। अर्थ्यत इत्यर्थः प्रयोजनमर्थनं वार्थः प्रार्थनाभिलाषः सर्वत्र करणे तृतीयायाः समासः। अक्ष्णा काण इति नात्राक्ष्णा कृतं काणत्व
कि तर्ह्यन्येनैव केनापि किं चिद्विनाक्ष्णा तु केवलं काणत्वेन लक्ष्यत इति तत्कृतत्वाभावः किंचदध्यापटुरित्यत्र माषदिमेवमर्थमपि तत्कृत
ग्रहणं कर्त्तव्यं न तु पटिर्दृष्टिकृतं पाटवं विवक्षितं दध्ना कृतः पटुरिति न तो भवितव्यमेव समासेन अप्यभोजनाघये सो दध्नः करणाभवः
दध्ना भुंक्ते पटुरिति न तो सामर्थ्यादेव न भविष्यति। इहापि न हि न स्यात् कुंकुमेन लोहितं कोपेन लोहितं मुखमिति अत्रापि हि करोति क्रिय
याकरणस्य संबंधः कुंकुमेन कृतं लोहितमिति कृत हि स्यात् शंकुलया खंड इत्यादावेव स्यात् यत्र पूर्वोत्तरपदयोः क्रियाकारकेल क्षणः स

का॰ प॰ २१
१४

।गुणवचनेनेति किमिति जातिवचनेषु जातेर्नित्यत्वात्तत्कृतत्वासंभवः क्रियावचनेनेत्यपि तत एव कर्तृकरणे कृता बहुलमिति द्रव्यवाचिपि तत्कृतत्वासंभव एव नत्वाकाशस्य तत्त्वं केन वित्। क्रियते अतो गुणवचनेनैव भविष्यतीति प्रश्नः। गोभिर्वपावानिति गोसंबंधित्वाद्युपयोगादेव तत्स्वपावत्त्वं पीवरत्वमिस्ति तत्कृतत्वं न तु सो गुणवचनः ॥१३॥ ॥पूर्वसदृश॥ ॥पूर्वसूत्रे थीशब्देन समासस्य साधितत्वादिहार्थग्रहणमर्थनिर्देशार्थमिति ज्ञानंतरेणोनशब्देनैव यतेनपूर्वादिभिः समसदृशशब्दयोः एषामनुपादानात् एतद्देवेत्यादि। समसदृशशब्दाभ्यामन्यत्रेदंतयोगे तुल्यार्थैरिति तृतीयास्ति। इह तुल्यार्थयोगेपि पक्षे विधीयते तत स्तस्याः समासे मातुः सदृशो मातुः सदृश इति। सिद्धं किमर्थमिह सदृशग्रहणं तमुरुषे तुल्यार्थतृतीयेति सर्वपदप्रकृतिस्वरोयथा स्यात्। सिद्धोत्र प्रकृतिस्वरः सदृशप्रतिरूपयोः सादृश्य इति नञातत्र सदृशग्रहणमवत्रपकर्तृत्वेपि पदार्थषष्ठीसमासस्तदंतोदात्तत्वं माभूदिति।

।गुणवचनेनेति किं। गोभिर्वपावान् १३ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः॥ पूर्वसदृशसमऊनार्थकलहनिपुणमिश्रश्लक्ष्ण एतैः सह तृतीयांतं समस्यते तत्पुरुषश्च समासो भवति अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति हेतौ वा द्रष्टव्या। मासेन पूर्वः मासपूर्वः। संवत्सरपूर्वः। सदृशा मातुः सदृशः। पितृसदृशः। समामातृसमः =
पितृसमः। ऊनार्थ। माषोनं। कार्षापणोनं। माषविकलं। कार्षापणविकलं। कलह। असिकलहो वाक्कलहः॥ निपुण। वाक्निपुणः। आचारनिपुणः॥ मिश्र। गुडमिश्रः तिलमिश्रः। श्लक्ष्ण। आचारश्लक्ष्णः। पूर्वादिष्ववरस्योपसंख्यानं। मासेनावरः मासावरः। संवत्सरावरः॥ ॥कर्तृकरणे कृता बहुलं॥ ॥ तृतीयेति वर्तते। कर्तरि करणे च या तृतीया तदंतं कृदंतेन सह समस्यते बहुलं तत्पुरुषश्च समासो
ननु चेह नामनभिधानात्षष्ठीसमासो न भविष्यति नैवं शक्यं अलुक्प्र

मासेहि दोषः स्यात् षष्ठ्या। आक्रोशेदास्याः सदृशो वृषल्याः सदृश इति तस्मात् लक्षणं त्वंदं तु न लक्षणं। इदमपि कर्तृत्वं हेतुतृतीयार्थं विधयाहेतुनासदृशो विधासदृश इति न त्वत्र तुल्यार्थैरिति षष्ठी भवति प्रतियोगिन्येव हि सा विधीयते। एवमपि कृत्तत्वंतां कृतत्वात्स्वरेणैव सिद्धं योहि विधया सदृशः विधाकृतं हि तत्सादृश्यं तत्र पूर्वेणैव सिद्धः। मिश्रग्रहणे सोयमर्थः सापि ग्रहणं गुडसंमिश्राधानादित्येवमर्थं ज्ञापयका ति सिद्धं यंमिश्रं वानुपसर्गमसंधावित्यनुपसर्गग्रहणं करोति तज्ज्ञापयतिमिश्रग्रहणे सोपसर्गस्यापि ग्रहणमिति। पूर्वादिष्विति। अवरशब्दोपि सूत्रेपठितव्य इत्यर्थः॥ ॥कर्तृकरणे॥ ॥कर्तृकरण इति प्रथमाद्विवचनं द्वन्द्वोवस्तु आख्यानेन कृते कर्तरि करणे च या तृतीयेति तथा वोत्तरत्र च स्पतिकर्तृकरणे कृतेः

एम॰
१४

॥ पूर्वसदृशसमोनार्थकलहनिपुणमिश्र॥

।सर्वोपाक्षिप्यभिचारार्थमिति।अत्राप्सतिप्यासिपीहारार्थमित्यर्थः।पादहारकइति।ह्रियतइतिहारकइति कापल्युटोबहुलमितिकर्मणिण्वुल्पा
दाभ्यामित्यपादानयंचम्येतत्पुरुषसमासः।गलेचोपकइति।चुपमंदायांगतौहेतुमण्णिजंतात्कर्मणिण्वुल्अमर्त्यमित्तकादित्यलुक्त्वंकहरणमनर्थक
मन्यस्याभावात्इहकर्तृकरणेक्रियायामेवभवतः।क्रियाचधातुवाच्याधातोश्चकृदेवप्रत्ययाः कृत्वात्तिङश्चतत्रसुपेत्यधिकारात्तिङंतेनप्रसंगः।तद्धितनि
हत्यर्थेतुइहकाष्ठेःपचतितरांकाष्ठेःपचतिरूपंकाष्ठेःपचतिदेश्यंइत्यत्रेकृतत्वेप्रकृतिरिधामुक्तप्रत्ययंधिनेनेहप्रीति॥ ॥कृत्यैरधिके॥ ॥स्तुतिनिंदाप्रयुक्त
मितिस्तुत्यानिंदयावधेप्रवर्त्तिर्नस्तोतुंनिंदितुंचप्रयुक्तमित्यर्थः।अध्यारोपितार्थवचनमिति।असत्त्वेनारोपितोध्यारोपितः काकपेयेति।एवंना

।सर्वोपाधिव्यभिचारार्थंबहुलग्रहणं।अहिनाहतः।अहिहतः।करणे।नखैर्निर्भिन्नोनखनिर्भिन्नः।परशुनाछिन्नः
परशुच्छिन्नः।कर्तृकरणेइतिकिं।भिक्षाभिरुषितः।बहुलग्रहणात्किं।दात्रेणलूनवान्परशुनाछिन्नवान्इतिसमासो
नभवतिपादहारकोगलेचोपकइतिचभवति॥ ॥कृत्यैरधिकार्थवचने।स्तुतिनिंदाप्रयुक्तमध्यारोपितार्थवचनम
धिकार्थवचनंकर्तृकरणयोर्यातृतीयातदंतंसुबंतंकृत्यैःसहसमस्यतेअधिकार्थवचनेगम्यमानेतत्पुरुषश्चस
मासोभवति।कर्त्री।काकपेयानदी।श्वलेह्यः कूपः।करणे।वाष्पच्छेद्यानितृणानि।कंटकसंचेयइन्दनः।एवंसि
वायंप्रपंचः।कृत्यग्रहणेयतएयत्तोर्ग्रहणंकर्तव्यं।इहमाभूत्।काकैःपातव्याइति॥ १४ ॥ ॥

नपूर्णातीपानदीयत्रतटस्थैःकाकैरपिशक्याऽपातुमितिस्तुतिः एवंनामाल्पतोयायत्काकैरपिशक्यापातुमितिनिंदा।उभयत्रशक्यार्थेक
त्यःश्वलेह्यइति।एवंनामासन्नतोयःकूपस्तटस्थैरपिश्वभिःशक्योलेढुमितिस्तुतिः एवंनामाशुचिःकूपोपजलंश्वानएवलेढुमर्हं
तीतिनिंदाअर्हार्थेकृत्यः।वाष्पच्छेद्यानीति।एवंनामकोमलानितृणानियद्बाष्पेणापिछेत्तुंशक्यानीतिस्तुतिः एवंनामक्वथितानि
तृणानियद्बाष्पेणापिछेत्तुंशक्यानीतिनिंदा।कंटकसंचेयइति।एवंनामक्लिन्नआर्द्रेनोयत्कंटकैःशक्यःसंचेतुमितिस्तुतिः एवंना
माल्पआर्द्रोयत्कंटकैःसंचीयतइतिनिंदा।एवंसिवायंप्रपंचइति।यद्यपिस्तुतिनिंदापरत्वात्क्रियायादानस्यकर्तृकरणयोर्गोणि
त्वंतथापिबहुलवचनात्सर्वत्रैवसिद्धंतथाचकाकपीतानदीत्यत्राकृत्यैरप्यधिकार्थवचनेःसमासोदृश्यतेअतःप्रपंचएवायंना

का·१८·
१५

॥अन्नेन॥ ॥दध्योदन इति॥ ननु च नेह क्रियाश्रूयते न चान्तरेण क्रियां द्व्यर्णोपसर्गेणासंबंध इत्यसामर्थ्यात्कथं समासो न प्राप्नोतीत्याशङ्क्य
पि सामर्थ्यवचनात्समासः इहापि तर्हि स्यात् किं दध्योदनो भुज्यतामिति तत्राह वृत्तौ क्रियाया अन्तर्भावादिति। स्वभावादेवेह तावदन्तर्भूता क्रिये
ति तद्वाचकस्य संबंधस्य सद्भावात्सामर्थ्यमित्यर्थः॥ ॥भक्ष्येणामिश्री॥ ॥खरविशदमिति। खरं कठिनं विशदं भिन्नावयवं खरं च तद्विशदं च खर

॥अन्नेनव्यंजनं॥ तृतीयेति वर्त्तते। व्यंजनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति।
संस्कार्यमन्नं संस्कारकं व्यञ्जनं। दध्ना उपसिक्त ओदनः दध्योदनः। क्षीरौदनः। वृत्तौ क्रियायाश्चान्तर्भावादन्नव्यंजनयोः साम
र्थ्यं॥ ॥भक्ष्येणमिश्रीकरणं॥ ॥मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन समस्यते तत्पुरुषश्च समासो भ
वति। खरविशदमभ्यवहार्यं भक्ष्यं। तस्य संस्कारकं मिश्रीकरणं। गुडेन मिश्राः धानाः गुडधानाः गुडपृथुकाः। वृत्तौ क्रि
याया अन्तर्भावात्सर्वोत्तरपदयोः सामर्थ्यं॥ ॥चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ सुपेति वर्त्तते। तस्य विशेष
णमेतत्। तदिति सर्वनाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते। तस्मै इदं तदर्थं। तदर्थं। तदर्थ अर्थ बलि हित सुख रक्षित
इत्येतैः सह चतुर्थ्यन्तं समस्यते तत्पुरुषश्च समासो भवति। तदर्थेन॥ ॥ श्री॥ ॥श्री॥ ॥श्री॥ ॥ राम०
१५

रविशदं हनुचलनेनादनीयमित्यर्थः एवंभूतं यदभ्यवहार्यं तद्भक्ष्यमित्युच्यते तत्रैव यदन्तस्य रञ्जनं तस्य च मस्यते रूढत्वान्न भक्ष्यतीत्यन्यत्रा
पि भवति अब्भक्षो वायुभक्ष इति। गौणोऽत्र भक्षयतिरित्यन्ये॥ ॥चतुर्थी तदर्थार्थ॥ ॥अर्थः परामृश्यत इति। यद्यपि चतुर्थीति चतुर्थ्यन्तः
शब्दः संनिहितः तथापि शब्दस्य प्रतिना दर्थ्यासंभवात्तदर्थ एव परामृश्यत इत्यर्थः। इत्येतैः शब्दैः सहेति। तत्र तदर्थेन सुबन्तेनेत्यर्थं द्वारक
विशेषणं स्वरूपेण सुबन्तस्य तादर्थ्यासंभवात्। द्वितीयस्त्वर्थशब्दः पृथगेव समासमिति।

।प्रकृतिविकारभावे समास इष्यत इति। ज्ञापकान्तरं यदयं बलिरक्षितग्रहणं करोति तज्ज्ञापयति विकृतिश्चतुर्थ्यन्ता प्रकृत्या समस्यत इति अन्यथा कुबेरबलिः गोरक्षितमित्यत्रापि तादर्थ्ये संभवादनर्थकं तत्स्यात्। हितसुखग्रहणं तु हितयोगे चतुर्थी विक्तव्या च तुर्थी चाशिषीत्यतादर्थ्येऽपि चतुर्थीसंभवान्न ज्ञापकं। यदि विकृतिः प्रकृत्या समस्यते अश्वेभ्यो घासो अश्वघासः अश्वेभ्यः सुरा अश्वसुरं विभाषा सेनेति नपुंसकत्वं हस्तिभ्यो विधा हस्तिविधा अत्र विशेषः अत्र न प्राप्नोति। अश्वघासादयः षष्ठीसमासा भविष्यन्तीति न तु स्वरे विशेषो भवति चतुर्थीसमासे

।प्रकृतिविकारभावे समासोऽयमिष्यते। यूपाय दारु यूपदारु। कुण्डलाय हिरण्यं कुण्डलहिरण्यं। इह न भवति। रंधनाय स्थाली। अवहननायोलूखलमिति। चतुर्थी चास्मादेव ज्ञापकात्तादर्थ्ये भवति।। ।।१५।। ।।

हि स्यति चतुर्थी तदर्थ इति पूर्वपदप्रकृतिस्वरेण भाव्यं षष्ठीसमासे तु समासान्तोदात्तत्वेनेत्येषोऽस्ति विशेषः चतुर्थीसमासेऽपि नैव पूर्वपदप्रकृतिस्वरेण भाव्यं ज्ञापकान्तरं यदयं केचेति चतुर्थ्यन्ते पूर्वपदं प्रकृतिस्वरं भवतीत्याह तज्ज्ञापयति प्रकृतिविकारभाव एष स्वरो न भवतीति अन्यथा गोरक्षितमित्यत्रापि चतुर्थी तदर्थ इत्येव सिद्धेरनर्थकं तत्स्यात्। नैतदस्ति ज्ञापकं हितार्थमेतत्स्यात् गोहितमित्यत्र हितादर्थ्येनास्ति एवमपि हितेचेति वक्तव्ये केचेति सामान्यवचनं ज्ञापकमेव स्यात् कुबेरबलिरित्यादौ मा भूदित्येवमर्थं प्रकृ

का॰प्र॰ तिविकारभावे स्वरएषितव्यः। अश्वार्थं धनाय स्थाली सत्र षष्ठीसमासः कस्मान्न भवति। कश्चिदाह भवत्येव तद्यथा गोग्रासः लीलांबुजंक्री
१६ डासः वासभवनं नायघशालेति। अपर आह अश्वधनस्य स्थाल्याद्यर्थो नभिधानात् षष्ठीसमासो न भवतीति। उभावपि प्रजिह्मः येषु षष्ठीसमा
सइष्यते तेषु चतुर्थीसमासएवास्तु येषु तु नेष्यते तेषु तु चतुर्थीसमासस्यानभिधानान्नेष्यते। तो मा का ज्ञापनार्थं बलिरक्षितग्रहणं स्व
रस्तु चतुर्थीसमासेपि पूर्वोक्तेन प्रकारेण प्रकृतिविकारभाव एव व्यवस्थाप्यते। किंचैवं सति सूत्रमेवैतदर्थकं प्रपदार्था वाद्यावपि षष्ठीस
मासएवास्तु चतुर्थीतदर्थ इत्येतत्तु षष्ठीतदर्थ इति क्रियतां ज्ञापकाच्च स्वरस्य व्यवस्था क्रियतां। नन्वर्थभेदो भवति षष्ठीसमासे संबंधमा
त्रंगम्यते चतुर्थीसमासे तु तादर्थ्यसंबंधविशेषः। नैषोस्ति विशेषः अश्वमारणोपि चतुर्थीसमासेन दंडवारितः षष्ठीसमासः तत्रा
र्थप्रकरणादिना विशेषो वसेयः यद्येवं केवलेपि षष्ठीसमासे तथा विशेषो वगंस्यते। किंच सिद्धांतेश्वघासादिषु तावत् तदर्थप्रकार
णादिना तादर्थ्यविसायः सर्वत्रैव तथास्तु नाय्यं निनउच्यते हितशब्दे न तावत्षष्ठीसमासो न भवति तद्योगे चतुर्थीनिमित्तादि
ति चतुर्थीसमासएव वक्तव्यः तत्रश्च तत्रे चेत्यत्रापि चतुर्थीग्रहणं कर्तव्यं गोहिताभिसायर्थ एवं च गोरक्षित मित्यत्र न स्यात् च
तुर्थ्या असंभवात् षष्ठीतदर्थ इत्येतस्य प्रसंगः प्रकृतिविकारभावादित्विक्षतेनापि चतुर्थीसमासएव विधेयः अर्थशब्देनापि यो
गेतादर्थ्यसंबंधविशेषस्य नियमेन प्रतीयमानत्वाच्चतुर्थ्या भवितव्यमिति तेनापि चतुर्थीसमासएव कर्तव्यः बलिसुखग्रह रम॰
णमपि कर्तव्यं तादर्थ्यस्य समासे नियमेन प्रतीतिर्यथास्यादित्येवमर्थं तस्मादाराच्चैव्यमेव सूत्रे प्रकृतिविकारभावएव समास इत्ये १६
तत्तु प्रयोजनं चिंत्यं॥ ॥१५॥ ॥छ छ॥ श्रीः॥ ॥छ॥ श्रीः॥ ॥छ॥ श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥रम॥

अर्थेन नित्यसमासवचनमिति। अन्यथा महाविभाषाधिकाराद्ब्राह्मणार्थ इति वाक्यमपि स्यात्। सर्वलिंगता चेति। परलिंगताया अपवादः। अ
भिधेयवशेन च सर्वलिंगता न सर्वत्रेति दर्शयति ब्राह्मणार्थं पय इत्यादि सर्वथा बितिचेदि संज्ञाभाव इयङु· नङ्· प्रसंगश्च स्यादेतत्तदर्थविकृतेः प्र
ताविसत्र तदर्थे सर्थविति सूत्रे कर्त्तव्यं चतुर्थीति वर्त्तते चतुर्थी समर्थात्तदर्थेभिधेये समर्थप्रत्ययो भवतीति सकारः पदसंज्ञार्थः राजार्थः गवार्थः पित्रा
दनुदात्तत्वं रग्नेत्वार्थ इति पूर्वपदप्रकृतिस्वरेण न विधेयः प्रत्ययत्वाच्च न तेन विग्रहः तद्धितत्वाच्चातिदेशवल्लिंगता सिद्ध्यतीति। तन्न सकारस्येत्संज्ञा
भावप्रसंगात् अथादिर्जिडुडवः षः प्रत्ययस्येति डित्वकारकनिर्देशाश्रयणेनेत्संज्ञा स्यादेवमपि बुञ्छणादिषु तण्णादिष्वः सेप्रसंगः अर्थे चतुर्थ्यमि
त्यत्र चेयङु वडो स्यात्तां द्व्रीहात्वत्वकपोः प्रसंगः स्यादेतत्त यद्ब्राह्मणार्थं पय इत्यस्य ब्राह्मणोर्थः प्रयोजक इति शक्यते वक्तुमतो ब्राह्मणोर्थोस्ये
ति विग्रहे बहुव्रीहिः क्रियतां तेन चतुर्थ्यन्तेन विग्रहाभावः पूर्वपदप्रकृतिस्वरत्वमभिधेयवल्लिंगता च सिद्ध्यतीति तन्न महदर्थमित्यत्रात्व

आर्थी अर्थेन नित्यसमासवचनं सर्वलिंगता च वक्तव्या। ब्राह्मणार्थः सूपः। ब्राह्मणार्थं पयः। ब्राह्मणार्था यवागूः। बलि।
कुबेराय बलिः। कुबेरबलिः। महाराजबलिः। हितं। गोहितं। अश्वहितं। सुखं। गोसुखं। अश्वसुखं। रक्षितं। गोरक्षितं।

कपोः प्रसंगात्। तदर्थादेश उदभावप्रसंगः स्यादेतत् चतुर्थीति दर्थेत्यनेन समासविभाषार्थ इत्यनेनांशेन तदर्थवाचिन उत्तरपदस्यार्थशब्द
आदेशो विधीयते विभाषाधिकारेच अष्पार्थे रूपपदार्थेत्सुमधं भविष्यतीति तो बलिरक्षितयोरपि विभाषार्थशब्द आदेशो भवति कुबेरार्थो
बलिः कुबेरबलिरित्यादि किमर्थमिदं न पूर्वेणैव सिद्धं ज्ञापकार्थं राजन्ज्ञापयति प्रकृतिविकारभावादन्यत्र नित्योर्थादेश इति तेन रंधनार्थास्था
लीत्यादि भवति न तु रंधनस्थालीत्यादि अश्वघासादयस्तु पूर्ववत् अत्र समासे कृते उत्तरपदस्य विधायमानेनार्थशब्देन विग्रहो न भविष्यति
यस्य वस्या नेः र्थादेशस्य लिंगतास्या निवद्भावेन भविष्यति अर्थ इति पूर्वपदप्रकृतिस्वरस्तु विधेय एवेति तन्न उदकार्थो वीवध इति वीवधश
ब्दस्यार्थादेशे कृते स्थानिवद्भावेन मंथोदनादिसूत्रेणोदभावप्रसंगात् अतश्चतुर्थीति पासए व विधेयः तथा चार्थेन नित्यसमासः सर्वलि
गता च वक्तव्या न वक्तव्या ब्राह्मणायेति चतुर्थ्यन्तात्दर्थे स्यात्फलाद्दर्थशब्देन विग्रहो न भविष्यति लिंगमशिष्यं लोकाश्रयत्वाल्लिंग
स्येति सर्वलिंगता च सिद्धा। तदेतत्सर्वमपि पद्धतिभाष्ये कृतपरिश्रमः नामे सह लभे थंधाः सर्पयश्शेजिनांजसा॥ ॥ १०७॥ ॥

का॰प॰ ॥पंचमी॥ ॥भयेनेति स्वरूपग्रहणाद्व्याप्तिरिति मिलाह भयभीतभीतिभीभिरिति वक्तव्यमिति। एवं तर्हि न्यासः कर्त्तव्य इत्यर्थः। व्यारम्भानान्त
१७ र्यग्रहणे वृकेभ्यस्त्रासस्तत्रापि प्रसंग इति भावः। सत्तर्हि तथा न्यासः कर्त्तव्यो नेत्याह एवं पि बहुलग्रहणस्येति। यथा हि पादहारकइत्या
दौ बहुलग्रहणात् सर्वेषामभिचारार्थाद्भवति एवमत्रापि भविष्यतीत्यर्थः। अधर्मजुगुप्सुरिति जुगुप्साविराम इत्यधर्मस्यापादानसंज्ञा॥

॥पंचमी भयेन॥ सुप्सुपेति वर्त्तते। तस्य विशेषणमेतत् पंचम्यंतं भयशब्देन सुबंतेन सह समस्यते तत्पुरुषश्च समासो भ
वति। वृकेभ्यो भयं वृकभयं चौरभयं दस्युभयं। भयभीतभीतिभीभिरिति वक्तव्यं। वृकभीतः वृकभीतिः वृकभीः। एवं पि
वायं बहुलग्रहणस्य प्रपंचः। तथा च ग्रामनिर्गतः अधर्मजुगुप्सुरित्येवमादि सिद्धं भवति॥ ॥अपेतापोढमुक्तपतिता
पत्रस्तैरल्पशः॥ अपेतः अपोढ मुक्त पतित अपत्रस्त इत्येतैः सह पंचम्यंतं समस्यते तत्पुरुषश्च समासो भवति। अपे
तः सुखापेतः। अपोढ। कल्पनापोढः। मुक्त। चक्रमुक्तः। पतित। स्वर्गपतितः। अपत्रस्त। तरंगापत्रस्तः। अल्पश इति
समासस्याल्पविषयतामाचष्टे। अल्पा पंचमी समस्यते न सर्वा। प्रासादात् पतितः। भोजनादपत्रस्तः इत्येवमादौ न भव
ति। कर्त्तृकरणे कृता बहुलमित्यस्यैवायं प्रपंचः॥ ॥स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन॥ ॥स्तोक अंतिक दूर इत्येवम
र्थाः शब्दाः कृच्छ्रशब्दश्च पंचम्यंताः क्तांतेन सह समस्यंते तत्पुरुषश्च समासो भवति। स्तोकान्मुक्तः। अल्पान्मुक्तः। अंतिक। अं रम॰
तिकादागतः। अभ्याशादागतः। दूरादागतः। विप्रकृष्टादागतः। कृच्छ्र। कृच्छ्रान्मुक्तः। कृच्छ्राल्लब्धः। पंचम्याः स्तोकादिभ्य इत्यल १७
लुक्। शतसहस्रौ परेणेति वक्तव्यं। शतात्परे परःशताः। सहस्रात्परे परःसहस्राः। राजदंतादित्वात्परनिपातः। निपातनात्स

॥अपेतापोढ॥ ॥अल्पशब्दाद्बहुलार्थादिति शसः शसि बहुल्पार्थस्येति पुंवद्भावः कारकत्वं तु समसनक्रियायां कर्मत्वात् अत एव पंचमीसम
स्तत इति कर्मशालकारः। तत्र तु बहुलार्थो मंगलवचनमित्यादि इति तस्मात् एव निपातनात् स्त्र शसिति युक्तो अल्पार्थे पंचमीति। अल्पाभ्यः प्रकृ
तिभ्य उत्पन्नेत्यर्थः॥ १६॥ ॥छू॥ ॥

॥सप्तमी॥ ॥अत्र साहचर्याद्रूढीरिति जहत्स्वार्थायां वृत्तौ शौण्डशब्दः प्रयुज्यते यथा चक्षुत्रिणोगाः छंतीति अत्र च प्रमाणं बहुवचननिर्देशः अतोऽत्र रेणाप्यादिशावृत्तदर्थो गम्यत इत्याह शौण्डादिभिरिति गणपाठसामर्थ्यात्तु बहुवचननिर्देशोऽर्थनिर्देशार्थो बहुवचनं तस्य वा समासार्थ इति न भवति ननु चाक्षशौण्ड इत्यादौ क्रियायाः श्रवणादधिकरणत्वं नोपपद्यते न चान्यासम्भावितमित्रमस्ति नैवेतदेवत्वात्पकं शक्यमाश्रयितुं शौण्डे वृत्तेरसादावपि प्रसंगात् अत आह ईप्साविति। अन्तः शब्दोऽत्र पठ्यते तद्योगे वृत्ति न आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखे ति कर्मेतद्वर्णनान्तः अस्या विकल्पितत्वात् षष्ठीसमासो विभवति अंतर्वणं प्रनिरंत इति णत्वं। अधिशब्दः पठ्यते तस्याधिकरणप्राधान्येऽपि

सप्तमी शौण्डैः॥ सप्तम्यन्तं शौण्डादिभिः समस्यते तत्पुरुषश्च समासो भवति। अक्षेषु शौण्डः अक्षशौण्डः। अक्षधूर्तः। अक्ष कितवः। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अन्तर। अन्तःशब्दस्त्वत्राधिकरणप्रधान एव पठ्यते। अधि। पटु। पण्डित। कुशल। चपल। निपुण। वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिष्वधिकरणे सप्तमी॥ ॥सिद्धशुष्कपक्वबन्धैश्च॥ ॥सप्तमीति वर्तते। सिद्धशुष्कपक्वबन्ध इत्येतैः सह सप्तम्यन्तं समस्यते तत्पुरुषश्च समासो भवति। सांकाश्यसिद्धः। कांपिल्यसिद्धः। शुष्क। आतपशुष्कः। छायाशुष्कः। पक्व। स्थालीपक्वः। कुम्भीपक्वः। बन्ध। चक्रबन्धः। बहुलग्रहणात्सेवायमुदाहरणप्रपंचः॥ ॥ध्वाङ्क्षेण क्षेपे॥ ध्वाङ्क्षेणेत्यर्थग्रहणं। ध्वाङ्क्षवाचिना सह सप्तम्यन्तं सुबन्तं समस्यते तत्पुरुषश्च समासो भवति क्षेपे गम्यमाने। तीर्थध्वाङ्क्ष इव तीर्थध्वाङ्क्षः अनवस्थित इत्यर्थः। तीर्थकाकः। तीर्थवायसः। क्षेप इति किं तीर्थे ध्वाङ्क्षस्ति

भावः अधिस्त्रीति आधेयप्राधान्ये त्वनेन तत्पुरुषो ब्राह्मणाधीनमिति अव्ययत्वरपदात्तत्वरनिवः ब्राह्मणेष्वधीतिवाक्यं॥ ॥सिद्धशुष्क॥॥ सांकाश्यसिद्धः कांपिल्यसिद्ध इति। संकाशेन निर्वृत्तं वनं सांकाश्यं कंपिलेन निर्वृत्तं कांपिल्यं चातुरर्थिकः संकाशादिभ्यो ण्यः तत्र तपसा सिद्ध इत्यर्थः॥ ॥ध्वाङ्क्षेण॥ ॥ध्वाङ्क्षशब्दस्येति वचनात्पर्यायाणां न प्राप्नोतीत्यत आह ध्वाङ्क्षेणेत्यर्थग्रहणमिति आख्यानतो वे तद्वत्सीयते तीर्थध्वाङ्क्ष इवेति। उपमानोपमेयभावे सति क्षेपो गम्यते नान्यथेति इवशब्दः प्रयुक्तः यथा तीर्थे ध्वाङ्क्षा न चिरं स्थातारो भवन्ति एवं कार्येष्वनवस्थितस्तीर्थध्वाङ्क्ष इत्यर्थः नद्याहावनवस्थित इत्यर्थ इति। हन्तौ। तिकार्थस्यात्मभक्तारिक्षाद्

का॰ मू॰
१९

॥कृत्यैरृणे॥ ॥यत्प्रत्ययांतेनैवेष्यत इति। अल्पशब्दस्त्वनुवृत्तेरेतल्लभ्यते कृत्यैरिति बहुवचनं तत्प्रकृतिभेदाभिप्रायं। ऋणग्रहणं च नियोगोपलक्ष
णार्थमिति। नियोगोपदर्शनार्थः ऋणमव श्यदेयमिति नियोगमाहचर्यान्नियोगमात्रमुपलक्षयति। तेन किं सिद्धं भवतीत्याह इहापीति। पूर्वाह्णेगेय
मितितत्पुरुषे कृतिबहुलमित्यलुक्। यथा ऋणमवश्यं देयमेवमिदमपि दर्शद्वेवश्यंगेयमिति नियोगोस्ति॥ ॥क्तेनाहो॥ ॥दिवाहत्नमितिराक

॥कृत्यैरृणे॥ ॥सप्तमीतिवर्तते। कृत्यप्रत्ययांतैः सह सप्तम्यंतं समस्यते तत्पुरुषश्च समासो भवति ऋणेगम्यमाने। यत्प्र
त्ययेनैवेष्यते। मासेदेयमृणं। मासदेयं। संवत्सरदेयं। त्र्यहदेयं। ऋणग्रहणं नियोगोपलक्षणार्थं तेनेहापि समासो भवति।
पूर्वाह्णे गेयं साम। प्रातरध्येयोऽनुवाकः। ऋणइति किं। मासे देया भिक्षा॥ ॥संज्ञायां॥ संज्ञायां॥ संज्ञायां विषये सप्तम्यंतं सुपा
सह समस्यते तत्पुरुषश्च समासो भवति संज्ञा समुदायोपाधिः। तेन नित्यसमास एवायं। न हि वाक्येन संज्ञा गम्यते। अरण्येति
लकाः। अरण्येमाषाः। वनेकिंशुकाः। वनेबिल्वकाः। कूपेपिशाचकाः। हलदंतात्सप्तम्याः संज्ञायामित्यलुक्॥ ॥क्तेनाहोरात्रा
वयवाः॥ अहरवयवाः रात्र्यवयवाश्च सप्तम्यंताः क्तांतेन सह समस्यंते तत्पुरुषश्च समासो भवति। पूर्वाह्णकृतं अपराह्णकृ
तं। पूर्वरात्रकृतं। अपररात्रकृतं। पूर्वरात्रकृतं॥ अवयवग्रहणं किं। अहनि भुक्तं। रात्रौ वृत्तं। बहुलग्रहणान्न रात्रिवृत्तं सं
ध्यागर्जितमित्यादयः॥ ॥तत्र॥ तत्रेत्येतत्सप्तम्यंतं क्तांतेन सह समस्यते तत्पुरुषश्च समासो भवति। तत्रभुक्तं। तत्रकृतं। त
त्रपीतं। एकपद्यमेकस्वर्यं च समासत्वाद्भवति १७
पद्यमेकस्वर्यं च न भवति। ननु च दिवाशब्दोधिकरणशक्तिप्रधानस्तत्राभिहितः सोर्थो तिर्भूतः प्रातिपदिकार्थः संपन्न इति प्रथमैवास्माद्भव
तिः अतः सप्तम्यभावादेवात्राप्रसंगः नैषोस्ति नियमोधिकरणशक्तिप्रधानः इति दिवामन्यत्रापि रात्रिरित्यपि दर्शनात्। कथं रात्रिवृत्तमनुयोक्तु
मुद्यते तिकर्तकरणे कृता बहुलमिति मन्यते एवं चान्यजन्म कृतमित्यापि भवति॥ तत्र॥ ॥तत्रेत्येतत्सप्तम्यंतमिति तत्र भवान्नित्योदे

विभक्त्यंतरेपि दर्शनादधिकरणप्रतिपादने तत्रशब्दोपि सप्तम्येव
वेत्येति मन्यते॥ २७ ॥ ॥
पमं॰ १९

॥क्षेपे॥ ॥अवतप्तेनकुलस्थितं तवैतदिति चिरंतनप्रयोगः तत्रार्थमाह चापलमेतत्त्वयेत्यर्थ इति यथावतप्ते प्रदेशे नकुला न चिरं स्थातारो भवं
ति एवं कार्यार्थमुपगम्याप्यलेन चिरं तिष्ठति स एवमुच्यत इत्यर्थः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति नकुलस्थितशब्देन समासः
पूर्ववद्लुक्॥ ॥पात्रेसमिता॥ ॥युक्कारो ग्यादिपरिग्रहार्थमिति युक्कारो ग्याद्यर्थो ग्यत्रेषामपि परिग्रहो यथा स्यादित्यर्थः पात्रएव समिता

॥क्षेपे॥ क्षेपो निंदा क्षेपे गम्यमाने सप्तम्यंतं क्तांतेन सह समस्यते तत्पुरुषश्च समासो भवति। अवतप्तेनकुलस्थितं।
नवैतत्तव चापलमेतत्। अनवस्थितत्वं तवैतदित्यर्थः। उदके विशीर्णं। प्रवाहे मूत्रितं। भस्मनि हुतं। निष्फलं यत्क्रियते तत
देवमुच्यते। नसुपेऽलुक् इति वक्ष्यति सप्तम्या अलुक्॥ ॥पात्रेसमितादयश्च॥ ॥समुदाया एव निपात्यंते। पात्रेसमितादयः शब्दास्त
त्पुरुषसंज्ञा भवंति। क्षेपे गम्यमाने येषां चात्र क्तांतेन सह समासस्तेषां एवं विग्रहो वृत्तिर्दृष्टुं पाठो युक्कारो ग्यादिपरिग्रहा
र्थः पूर्वपदाद्युदात्तत्वं यथा स्यादिति। युक्कारो ग्यादिषु हि पात्रेसमितादयश्चेति पठ्यते। पात्रेसमिताः पात्रेबहुलाः। अवधा
रणेन क्षेपो गम्यते। पात्रएव समिता न पुनः क्वचित्कार्य इति। उदुंबरमशकादिषु उपमया क्षेपः। मातरिपुरुष इति प्रतिषिद्ध
सेवनेन पिंडीशूरादिषु निरीहतया। अपन्हुत्वावाह्नतिगणोऽयं। पात्रेसमिताः। पात्रेबहुलाः। उदुंबरमशकाः। उदुंबरकृ
मिः। कूपकच्छपः। कूपचूर्णकः। अवटकच्छपः। कूपमंडूकः। कुंभमंडूकः। उदपानमंडूकः। नगरकाकः। नगरवायसः। मात
रिपुरुषः। पिंडीशूरः। गेहेशूरः। मुद्रपिका। गेहेनर्दी। गेहेक्ष्वेडी। गेहेविजिती। गेहेमाडः। गेहेतप्तः। गेहेधृष्टः। गर्भतृप्तः। आख
निकबकः। गोष्ठेशूरः। गोष्ठेविजिती। गोष्ठेक्ष्वेडी। गेहेमेही। गोष्ठेपटुः। गोष्ठेपण्डितः। गोष्ठेप्रगल्भः। कर्णेटिटिभः। कर्णेचुरचुरा।
चकारोऽवधारणार्थः। तेन समासांतरं न भ

इति भोजनसमय एव संगता इत्यर्थः पात्रेबहुला इति भोजनसमय एव संबंधी भवंति नान्यका
पर्युक्तार्थाः उदुंबरमशकादिषु इति परस्तत्रैव तत्सोनास्मात्यमेवस्ती तिम्नते सोयमस्य विस्तारः पुरुष उदुंबरमशकादिरुच्यत इत्यर्थः प्र
तिषिद्धसेवनेनेति शत्रुपुभार्यादिवा पुरुषायितव्यं मातरि पुरुषायितं प्रतिषिद्धं निरीहतयेति पिंडीशूरोऽसत्यपि शूरः तत्रैव शूरो नान्यत्रेति निरी

वति परमपात्रेसमिता इति॥ ॥

हत्वा परमपात्रेसमिता इति एवं रूपं वृत्त्यंतरं न भवति परमाः पात्रे
समिता इति वाक्यमेव भवतीत्यर्थः॥ ॥ ॥ ॥

॥पूर्वकाल॥ ॥भिन्नप्रवृत्तिनिमित्तस्येत्यादि॥ भिन्नग्रहणं पर्यायनिवृत्त्यर्थम् एकग्रहणं गोरश्व इत्यादिनिवृत्त्यर्थं क्वचिद् भिन्ननिमित्तप्रयुक्तस्येति
पाठः। भिन्नेन निमित्तेन प्रवृत्तिनिमित्तेन प्रवर्त्तितस्येत्यर्थः। विशेषणं विशेष्येणेति सिद्धे पूर्वकालादीनां पूर्वनिपातार्थं वचनम्। एकशब्दस्तु दि-
क्संख्ये संज्ञायामिति नियमात् संज्ञायामेव स्यादित्यर्थमेव पूर्वकाल इत्यर्थग्रहणमिति। पूर्वः कालो ऽस्य पूर्वकालः पूर्वमनुष्ठित इत्यर्थः। स च चरमानुष्ठितम-
पेक्ष्य भवतीत्यर्थान्नैव समासो विज्ञायत इत्याह। अपरकालेनेति। स्नातानुलिप्त इति। पूर्वं स्नातः पश्चादनुलिप्त इत्यर्थः। अत्र क्रियाशब्दत्वा-

॥पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन॥ सुप् सुपेति वर्त्तते तत्र विशेषणमेतत्। पूर्वकाल ए-
क। सर्व। जरत्। पुराण। नव। केवल इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते तत्पुरुषश्च समासो भवति। भि-
न्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं। पूर्वकाल इत्यर्थनिर्देशः परिशिष्टानां स्वरूपग्रहणं।
पूर्वकालोऽपरकालेन सह समस्यते। स्नातानुलिप्तः। कृष्टसमीकृतं। दग्धप्ररूढं। एकशाटी। एकभिक्षा। सर्वदेवाः। सर्वे ॥
मनुष्याः। जरद्धस्ती। जरद्वृषः। जरद्वृत्तिः। पुराणं। पुराणान्नं। पुराणावसथः। नवान्नं। नवावसथः। केवलान्नं। समाना-
धिकरणेनेति किं। एकस्याः शाटी॥ ॥दिक्संख्ये संज्ञायां॥ समानाधिकरणेनेत्यापादसमाप्तेरनुवर्तते। दिग्वाचिनः शब्दाः ॥
संख्या च समानाधिकरणेन सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति संज्ञायां विषये। पूर्वेषुकामशमी। अपरेषु ॥२॥
कामशमी। संख्या। पञ्चाम्राः। सप्तर्षयः। संज्ञायामिति किं। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः।
साचकपाठकादिवत्पूर्वनिपातः। पर्यायत्वान्न। एकशाटीति। शाटशब्दाज्जातिलक्षणो ङीष्। एक न द्वित्वे चेति द्रष्टव्यः। सर्वमनुष्या इति
अत्र विशेषणमित्यपि समासेन दोषः तस्मात् क्रियावाचिना गुणवाचिना वा समासो दर्शनीयः एवं जरदादिष्वपि एकस्याः शाटीति। अ-
त्र भवितव्यमेव षष्ठीसमासेन तत्स्यादेकस्याः शौक्ल्यमिति प्रत्युदाहर्त्तव्यं अत्र द्विगुणेनेति प्रतिषेधः॥ ॥दिक्संख्ये॥ ॥विशेषणं

विशेष्येणेति सिद्धे नियमार्थमेतत् संज्ञायामेव नान्यत्रेति
सर्वसूत्रमिदं पादे ऽत्र दिग्वाचिन्यां समासः १८

।।तद्धितार्थ।। ।।विशेषणं विशेष्येणेति सिद्धस्य पूर्वेणानियमात्प्राप्तविधिरयं आरभ्यमाणो विषयलाभायमपि नियमः शक्यते कर्तुं अयं नियमः पूर्वो विधिरिति। एकापि सप्तमी विषयभेदाद्भिद्यत इत्याह तद्धितार्थे विषयभूत इत्यादिना। तद्धितार्थोऽभिधेय इत्येवं तु विज्ञायमाने यौवनापि ति स्यादेतत् तद्धितो दुर्लभः स्यात् तदर्थस्य समासेनैवोक्तत्वादिति भावः अस्मिन्नपि चेदर्थग्रहणं चिंत्यप्रयोजनं तद्धिते विषय इत्येवास्तु। तद्धिते परत इति तु विज्ञायमाने इतरेतराश्रयं प्राप्नोति समासात्तद्धितो विधेयः तद्धिते च समास इति किंच तद्धितार्थोऽभिधेय इत्यस्मिन्पक्षे न दोषः द्विगोर्लुगनपत्ये इति लुग्वचनं ज्ञापकं उत्पद्यते द्विगोस्तद्धित इति तथा सर्वत्र चित्तसाधारणो द्विगुरुक्तस्तत्र वर्ण्यं विशेषाभिधानाय तद्धितमुत्पद्य

।।तद्धितार्थोत्तरपदसमाहारे च।। दिक्संख्ये इत्यनुवर्त्तते तद्धितार्थे विषये उत्तरपदे च परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन सुपा सह समस्येते तत्पुरुषश्च समासो भवति। तद्धितार्थे तावत्। पूर्वस्यां शालायां भवः। दिक्पूर्वपदादसंज्ञायां ञः। पौर्वशालः। आपरशालः। उत्तरपदे।।

नन्वत्रापि शक्यमेवं वक्तुं अथैवं कस्मान्न विज्ञायते तद्धितार्थे द्विगुर्भवति तद्धितो यथा स्यादिति द्विगुर्भवतीति यथा दाशार्थं घटामहे दाशा यथा स्युरिति घटामह इति नैवं शक्यं विज्ञातुं एवं हि विज्ञायमाने तद्धितोत्पत्तये विधीयमाना समाससंज्ञा विषयान्तरे न स्यात् एवं तस्यैव समासस्य विधीयमाना द्विगुसंज्ञापि न तत्रायं चारत्निरित्यत्र इगन्ते द्विगाविति स्वरो न स्यात् तस्य तु समाहारे द्विगुस्वकार्यं यथा स्वरे विधीयमानः पुंवद्भावः षत्वणत्वयोर्न भवति तथात्रापि पौर्वशाल इति पूर्वस्यां शालायां भव इति तद्धितार्थे विवक्षिते समासस्ततस्तद्धितः।। ।।छ।। ।।छ।। ।।श्रीः।। ।।श्रीः।। ।।छ।। ।।

का॰ प॰ ॥पूर्वशालाप्रिय इति पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ प्रियशब्दे उत्तरपदे परतः पूर्वयोस्तत्पुरुषे सति समासान्तोदात्तत्वं शालाशब्दस्य
भवति असति त्वन्तरतत्पुरुषे पूर्वपदप्रकृतिस्वरत्वं पूर्वशब्दस्याद्युदात्तत्वं भवतीष्टेत। समाहारे द्विकशब्देन संभवतीति स हि समूहरूप
२० त्वाद्द्वेदानिर्बंधनः संख्यैव च भेदमाचष्टे दिक्शब्दस्तु प्रत्यर्थं नियतः विभक्तिरपि समासे निवर्त्तते। ननु पृथ्याकाकसमूह इत्यत्र विभक्त्याभा
वेपि भेदावगतिस्तथात्रापि भविष्यतीति तस्मात्प्रयोगाभावाद्दिक्संख्ये वात्र हेतुर्वक्तव्यः। पांचनापितिरिति पंचानां नापितानामपत्यमिति स

॥पूर्वशालाप्रियः॥ अपरशालाप्रियः॥ समाहारे द्विकशब्देन संभवति॥ संख्यातद्धितार्थे पांचना
पितिः॥ पंचकपालो दशकपालः॥ उत्तरपदे॥ पंचगवधनो दशगवधनः॥ ॥१९॥ ॥छ॥श॥

मासे। तद्धितार्थः पंचकपाल इति पंचसु कपालेषु संस्कृत इति समासे संस्कृतं भक्षा इत्यण्। द्विगोर्लुगनपत्ये इति लुक्। पंचगवधन इति पंचगा राम
वो धनमस्येति त्रिपदे बहुव्रीहौ कृते धनशब्दे उत्तरपदे परतः पूर्वयोस्तत्पुरुषे गोरतद्धितलुकीति टच्। अयमुत्तरपदे तत्पुरुषो महावि
भाषाधिकाराद्विकल्पेन प्राप्नोतीति नित्यो वक्तव्यः अन्यथा पंचगोधन इत्यपि स्यात्। उक्तं च द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचन २०
मिति वाक्य इष्यते प्रिय स्वाग्रपदं प्रिय इति त्रिपदे बहुव्रीहौ पूर्वयोर्द्वंद्वः स च नित्य इष्यते नित्यसमासान्तो यथा स्यादिति॥ १९॥ ॥

॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

पंचपूली ति पंचानां पूलानां समाहार इति विग्रहः न तु पंच पूलाः समाहृता इति भावसाधनो हि समाहारशब्दः समाहरणं समाहारः विप्रकीर्णाना
मेकत्र राशीकरणं पंचयापी च एतनारी त्रिपुरी सत्रै कस्मिन् सरो क्रियायां समस्त चयादिष्टदेशानामपि बुद्ध्या राशीकरणं भवति। अथ कर्मसाधमे को दोषः इह
पंचकुमार्यः समाहृताः पंचकुमारीति कुमार्यर्थप्राधान्यात् समासशास्त्रे चाप्रथमानिर्दिष्टत्वादेकविभक्तित्वाभावाच्चोपसर्जनत्वाभावाद्धो स्त्रिया उ
पसर्जनस्येति ह्रस्वो न स्यात् का ममत्र नपुंसक ह्रस्वत्वं सिद्धं इह पंचखट्वाः समाहृताः पंचखट्वमिति टाबंत इति स्त्रीलिंगपक्षे ह्रस्वाभावाद्द्विगो
रिति ङीप् न स्यात् भावसाधने तु समासार्थे समाहारे नानाविभक्तिभिर्युज्यमाने पिकुमारीशब्दस्य नित्यं षष्ठ्येव योगः स्यैकविभक्तिकत्वात् सिद्धमु
पसर्जनत्वं तस्माद्भावसाधनः द्विगुरेकवचनमित्येतत् तु स नपुंसकमिति वक्ष्यामीत्यारभ्यते। कथं पंचपूलीमानयेत्युक्ते पूलानामानयनं नान्तरेण
द्रव्यानयनं भावानयनं संभवति यथा तन्तोरन्तरेण पात्रानयनमसंभवान्नयनं संभवति एवमपि समाहारग्रहणमनर्थकं भावसाधनो हि समाहारशब्दः स

।समाहारे। पंचपूली दशपूली। पंचकुमारि दशकुमारि। सनपुंसकमिति नपुंसकत्वे ह्रस्वो नपुंसके प्रातिपदि
कस्येति ह्रस्वत्वं॥ ॥छ॥ ॥

मूहपर्यायः समूहश्च तद्धितार्थः तत्र तद्धितार्थस्य वसिद्धं यद्येवं तद्धितोत्पत्तिः प्राप्नोति उत्पन्नस्य तद्धितः द्विगोरिति लुग्भविष्यति लुकृते प्राप्नु
वंति पंचपूली अपरिमाणविस्ताचितेति ङीप्प्रतिषेधः प्राप्नोति पंचगावं गोरतद्धितलुकीति टच् न प्राप्नोति। नैष दोषः अपरिमाणे सत्र नतद्धि
तलुकीत्यस्य समाहार इति वक्तव्यं तन्नियमार्थं अविशेषेण द्विगो ङीप् भवति अपरिमाणं ताद्धित्ता वितकं बल्पा तास्य समाहार एवेति पंचा
नामश्वानां समाहारः पंचाश्वी कुमा भूत पंचभिरश्वैः क्रीता पंचभिर्गोभिः क्रीतः पंचगुः पटः एवमपि पंचकुमारी सत्र लुक्कृता तद्धित लुकीति स्त्रीप्रत्यय
स्य लुक् प्राप्नोति तस्मात् तद्धितनिवृत्त्यर्थं समाहारग्रहणं पृथक् समाहारग्रहणात् समासस्यैव समाहारो वाच्यो न तद्धितस्येति आख्यानात् तद्धि
तो नोत्पद्यत इति सिद्धमिष्टं। इह पंचानां गोत्राणां समिति पंचगुः पुरुष इति मत्वर्थस्य तद्धितार्थत्वादयं समासः प्राप्नोति न बहुव्रीहिरशेषत्वात् तस्य
नु चित्रघादिस्वकाशोपत्रादिके हार्से नत्तः स्यति वा समिन्नमासे मतुपः श्रवणं स्यात् अघा गृह्यते यदा द्विगो लुग्पि नास्ति तस्मान्मत्वर्थप्र
तिषेधो वक्तव्यः॥ ॥छ॥ ॥छ॥ ॥

का.प्र० संख्यापूर्वः॥ ॥कश्चिदंनतरोपेक्ष्यतेयत्रैतदुच्यतेऽनंतरस्य विधिर्वा भवति प्रतिषेधो वेति क्वचित्समुदायः प्रधानषट्खक्रादिभ्यश्च मत्र व श्यत स्मात्को भावि
२१ तितद्दिहसमुदायोपेक्षते अनंतरो वेति संशये ऽनंतरस्याह तद्धितार्थस्यादिश्चयं भावः समुदायापेक्षायां संख्यापूर्वयद् समानाधिकरणसमास मत्र परि
ग्रहे द्विधुनिका करणे समयी भावस्यापि स्यादितीगंते द्विगावितिस्वाप्रसंगः समानाधिकरणा तत्पुरुषापेक्षायामपि एकशाटीसत्रापि स्यात् संख्या
शब्दोपादानेन विहित तत्पुरुषपरिग्रहे पि दिक्संख्ये संज्ञायामित्यस्याधिग्रहणात्प्रसंग इत्यत्र द्विगुस्वरप्रसंगः योगविभागश्चानर्थकः दिक्संख्ये

॥संख्यापूर्वो द्विगुः॥ तद्धितार्थोत्तरपदसमाहारे चेत्यत्रयः संख्यापूर्वः समासः स द्विगुसंज्ञो भवति। तद्धितार्थे ता
वत्। पंचसु कपालेषु संस्कृतः पंचकपालोऽष्टकपालः संस्कृतं भक्षा इती हारणा आगतस्य द्विगोर्लुगनपत्ये
इति लुक्। उत्तरपदे पंचनावप्रियः। नावो द्विगोरिति समासांतो भवति। समाहारे पंचपूली। द्विगोरिति ङीप्भवति
॥द्विगुप्रदेशाः द्विगोरित्येवमादयः॥ २० ॥

संज्ञा तद्धितार्थोत्तरपदसमाहारेष्वेकयोगः कर्त्तव्यः स्यादिति कथमेकाप्यपीति अत्र स्येकश्चासावप्रपश्चेति भूर्क्कालेतिसमासे कृते द्विगुत्वे सत्यका प्र०
रांतोत्तरपदो द्विगुः स्त्रियांभाष्यत इति द्विगोरितीकारः सिध्यति नान्यथानेचैकशाटीनिव ज्जाति ङीषनेन समासः शाका नेकत्तुं केवलस्याश्च पशब्दस्य पुल्लिं २१
गत्वात्। उच्यते अत्रानेनैव सूत्रेण समाहार एव समासः नन्वनेकविषयः समाहारो नेकस्यासंभवति संभवतिकथं इहैकमप्यश्पं कश्चित्लपरेणादद
दनेकं मन्यते तथादानश्रद्धातिशयाद्दपुस्य महत्त्वाद्वा ऽनेकस्मिन्नः संभ्रमः तमेकस्मिन्नपि करोतीति अनेन प्रतिग्रहीता कृपणो व्याख्यातः। तत्रारोपि
तबहुत्वाश्रयः समाहार इति सिद्धं॥ २० ॥ ॥

॥कुत्सितानि॥ ॥कुत्सितानीति कुत्सनमवक्षेपणं गर्हा पापहि समस्ते च कारस्थानुक्तसमुच्चयार्थत्वात् तुल्यमानेऽर्थः। बहुवचननिर्देशादुभयत्रार्थग्रहणमित्याह कुत्सितवाचीनीति वैयाकरणखसूचिरिति खसूचयतीति खसूचिः। यः पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयति खं निरीक्षते अहो निर्मलं गगनमिति स एवमुच्यते अत्र व्याकरणस्य वेदितृत्वेन प्रवृत्तमपि प्रतिभानाभावेन निष्फलत्वात् कुत्स्यते। याज्ञिककितव इति कितवस्त्वसौ इति धनमात्रप्रसक्तेन जात्यादिनिरपेक्षो द्यूते प्रवर्तमानः कितवः इह तु कितव इव कितवः यो याज्ञिको याज्यस्य धनसत्तामेवापेक्षते न पात्रमर्हति स याज्ञिककितव

॥कुत्सितानि कुत्सनैः॥ कुत्सितवाचीनि सुबन्तानि कुत्सनवचनैः सुबन्तैः सह समस्यन्ते तत्पुरुषश्च समासो भवति। शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते। विशेषणं विशेष्येणेति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः। वैयाकरणखसूचिः। निःप्रतिभ इत्यर्थः। याज्ञिककितवः। अयाज्ययाजनतृष्णापरः। मीमांसकदुर्दुरूढः। नास्तिकः। कुत्सितानीति किं। वैयाकरणश्चौरः। न ह्यत्र वैयाकरणत्वं कुत्स्यते। कुत्सनैरिति किं॥ ॥

यद्यप्युच्यते तदा ह्ययाज्ययाजकस्तृष्णापर इति। मीमांसकदुर्दुरूढ इति दुर्दुल उत्क्षेपे दुः पूर्वः। औणादिकः कूटप्रत्ययः बहुलमन्यत्रापीति णिलुक् लक्षणेऽके विषये तत्स्मरणाद् दुर्दुरूढ इति भवति वैयाकरणश्चौर इति कथमेतत् प्रत्युदाहरणं यावता चौरत्वेन गर्ह्यमाणत्वाद् अस्त्येव वैयाकरणकुत्सा तत्राह न ह्यत्रेति। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तकुत्सायां समासेन भवितव्यं अत्र च वैयाकरणः कुत्स्यते चौरत्वेन न तु वैयाकरणत्वे॥

।।कुत्सितो ब्राह्मण इति अत्र विशेषणं विशेष्येणेति भवितव्यमेव समासेन यत्नित्येष्यते बकुलग्रहणं शाणं।। ।।उपमानानि।। ।।उपमानानि।। ।।उ
पमीयतेऽनेनेत्युपमानम् इति उपपूर्वो माङः करणे ल्युट् समास इति दर्शयति भाष्येतु मानस्य हि मीयमानम् उपमानम् इति सर्वथा कथनमात्रं अव्ययीभावे उपमानानी
ति स्यात् सिद्धिप्रसंगादिति भावः उपपूर्वकस्य माङः सादृश्यहेतुकेऽपरिच्छेदे रूढः येन वस्त्वंतरं सादृश्येन परिच्छिद्यते तदुपमानं तद् यथा गौरिव गवय इति गौः
कारणं पुरुषः परिच्छेत्ता सहितो गौः सादृश्येनावयवं परिच्छिनत्ति गोसदृशो गवय इति सामान्यवचनैरिति समानस्य भावः साधारणपर्यायः ततश्चातुर्वर्ण्यो

।।कुत्सितो ब्राह्मणः।। ।।पापाणके कुत्सितैः।। ।।पापाणकशब्दौ कुत्सनाभिधायिनौ तयोः पूर्वेण समासे परनिपा
तः प्राप्तः। पूर्वनिपातार्थमिदमारभ्यते। पापश्च अणकश्च एते सुबंते कुत्सितवचने सह समस्येते तत्पुरुषश्च समासो भवति
।पापनापितः। पापकुलालः। अणकनापितः। अणककुलालः।। ।।उपमानानि सामान्यवचनैः।। उपमीयते
ऽनेनेत्युपमानं। उपमानवाचीनि सुबंतानि सामान्यवचनैः सुबंतैः सह समस्यंते तत्पुरुषश्च समासो भवति। उपमा
नोपमेययोः साधारणो धर्मः सामान्यं तद्विशिष्टोपमेयवचनैरयं समासः।। ।।२१।। ।।छ।। ।।छ।। ।।

दित्वात्स्वार्थे ष्यञ् साधारणो धर्मः सामान्यं तच्चोपमानस्य श्रुतत्वात् तस्योपमेयाये क्षापात्तयोरेव साधारणो धर्मो विज्ञायते इत्याह उपमानोपमेययो
रित्यादि तद्विशिष्टोपमेयवचनैरिति तेन साधारणेन धर्मेण विशिष्टं यदुपमेयं तद्वचनैः ननु साधारणधर्मवाचनैरित्यर्थः वचनग्रहणाच्चोपमर्थोल
भ्यते सामान्यमुक्तवंतः सामान्यवचनाः ये सामान्यमुक्त्वा तद्वतिद्रव्ये पर्यवस्यंति तेनाथोक्ताः यथा गुणमुक्त्वा गुणवचन इति तच्च सामान्यवदुप
मानस्य सम्बन्धिशब्दत्वात्तदाक्षिप्तमुपमेयमेव विज्ञायत इति सूक्तं तद्विशिष्टोपमेयवचनैरिति।। ।।२१।। ।।छ।। ।।छ।। ।।

।शस्त्रीश्यामेति। अत्र श्यामगुणविशिष्टत्वेन प्रसिद्धत्वादुपमानं शस्त्री उपमेया देवदत्ता तयोः साधारणो धर्मः श्यामत्वं तदभिधायत श्चिशिष्टायां श्यामा शब्दः पर्यवस्यतीति भवति सामान्यवचनः। ननु च समानाधिकरणेनेति निवर्त्तते इह च शस्त्री शब्दः शस्त्र्यां वर्त्तते श्यामाशब्दस्तु देवदत्तायां यदाह उपमा नवाचीनि सुबंतानि तद्विशिष्टोपमेयवचनैरिति तथा विग्रहवाक्ये इव शब्दः प्रयुक्तः शस्त्रीवच्छ्यामेति श लेवचन सामर्थ्यात्तु वैयधिकरण्येपि समा सः प्रयोगे वं मृगीव चपला मृगचपलाहंसीव गद्गदा हंसगद्गदा पुंवत्कर्मधारयेति सामानाधिकरण्य लक्षणः पुंवद्भावो न प्राप्नोति नैष दोषः जा त्यंतरनिवृत्तिपरायां चोदनायां स्त्रीत्वमकिंचित्करं तत्र कुकुरांडं मृगक्षीरमित्यादिवदिदमपि सिद्धं ननु चान्यदेव चापलं स्त्रियाः अन्यदेव पुंसः सस्जातिमात्रोपादानेपि प्रकरणादिवशात्स्त्रीत्वं प्रत्याय्यते तेन चेव हिंगत्वात्स्त्रीप्रत्ययस्यनिमित्तं अन्यथा पुंवद्भावेन निहतौ स्त्रीप्रत्ययस्य तेनापि कथं विशेषावगतिः अस्त्वेवं पदितु मृगीव चपलेति स्त्रीप्रत्ययांतस्य समासः क्रियते तदा मृगीचपलेति प्राप्नोति निहितेन समासो दंडवारितः

॥शस्त्रीइव श्यामा शस्त्रीश्यामा देवदत्ता। कुमुदश्येनी। हंसगद्गदा। न्यग्रोधपरिमंडला। उपमानानीति किं। देव

दत्ता श्यामा। सामान्यवचनैरिति किं। कालाइव नंदुलाः। पर्वता इव बलाहकाः॥ ॥श्रीकृष्णाय नमः॥ ॥

समानाधिकरणोपिका श्चिद्वाच्ये तएवं तर्हि समानाधिकरणसमास एवायं शस्त्री चासौ श्यामा चेति कथं पुनर्देवदत्तायां शस्त्रीशब्दो जातिवचनोत्य मौसादृश्यनिमित्तात् तद्धर्मोपचारः यथा गौर्वाहीक इति प्रयोगे वं शस्त्री शब्दोप्युपमेये पसंक्रांतस्तु पमान वाचित्वं नोपपद्यते सत्यं श्रविस्याश्रये णरूपमा नत्वं द्रष्टव्यं इव शब्दप्रयोगात्तु पमानप्रदर्शनार्थः न प्रक्रियावाक्यमिति नकश्चिद्दोषः ननु श्यामगुणातेन साधर्म्येण शस्त्रीशब्दो देवदत्तायां प्र युज्यते इति श्यामशब्दो न प्रयोगार्हः। नन्वबहवो हि शस्त्र्यां गुणाः तीक्ष्णत्व सूक्ष्मत्वादयः श्यामेति तत्र न सति श्यामपदे कथमिदं प्रतीयाम श्यामगुणे न शस्त्रीत्वमारोपितमिति ननु सदपि श्यामपदं देवदत्तामुपस्थाप्य चरितार्थमिति नैव शस्त्रीगुणो निर्दिश्यते नैतदस्ति नैव मत्र वचनं व्यज्यते यात्श्या मा शस्त्रीवेति कथं तर्हि शस्त्रीव श्यामा देवदत्तेति अस्यां तु वचनव्यक्तावविवक्षितत्वेन तावदुपमेये पनि श्याचे न प्रतीयते उपमेय निष्ठो गुण उपमानस्य शस्त्रीव अथवा चंद्रमुखी स्यादवनिर्दिष्टोपि गुणः प्रियदर्शनत्वादिः प्रसिद्धिवशादुपमाननिमित्तत्वेन प्रतीयते तदो पमेयेपि नावच्छुतः कथमुपमा

का॰प॰२० ॥उपमितमित्यत्र भूतकालो न विवक्षितः इत्याह उपमेयमुपमितमिति सामर्थ्यादिति उपमेयमुपमानापेक्षमित्येतत्सामर्थ्यं। न चेत्सामर्थ्यं न चेत्सामान्य
वाचीति यद्बाधकरणं दिविशालित्वमिति नः साधारणो गुणः प्रतीयते तेन तदा समासः यदा तु गुणो न तस्यावच्छेदाय विशिष्टः साधारणो गुणवचनः शब्दः प्रयुज्य
२३ ते तदा न समासः इत्यर्थः पुरुषोऽयं व्याघ्र इवेति उपमानप्रदर्शनमेतत् अत्र हि वैयधिकरण्यात्समासस्याप्रसङ्गः यदा तु व्याघ्रशब्दस्ताद्रूप्यात्पुरुषे वर्तते

॥उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। उपमेयमुपमितं तद्वाचि सुबन्तं व्याघ्रादिभिः सामर्थ्यात् उपमानवचनैः स
ह समस्यते तत्पुरुषश्च समासो भवति न चेत्सामान्यवाची शब्दः प्रयुज्यते। विशेषणं विशेष्येणेति परनिपाते प्राप्ते विशे
ष्यस्य पूर्वनिपातार्थ आरंभः पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः। पुरुषसिंहः। सामान्याप्रयोग इति किं। पुरुषो व्याघ्र
इव शूरः। व्याघ्र। सिंह। रुक्ष। रुषभ। चंदन। वृष। वराह। हस्तिन्। कुंजर। रुरु। पृषत। पुंडरीक। बलाहक। आकृति
गणश्चायं। तेनेदमपि भवति। मुखपद्मं। मुखकमलं। करकिशलयं। पार्थिवचंद्रः इत्येवमादि॥ २२ ॥ ॥

तदा सामानाधिकरण्ये सति समासः अत एवोक्तं विशेषणं विशेष्येणेति प्राप्त इति। पुरुषोऽयं व्याघ्र इव शूर इति ननु सामान्यशब्दप्रयोगे सति तत्र ऐसा हाम॰ २२
सादृश्यसामर्थ्यादेव न भविष्यति एवं तर्हि एतज्ज्ञापयति भवति प्रधानस्य सापेक्षस्यापि वृत्तिरिति तेन राजपुरुषोऽभिरूपः औपगवः शोभन इत्यादि सिद्धं भव
ति स्यात् यसिद्धं एवार्थे लिंगदर्शनमिदं प्राधान्यादेवानकोपकार्यत्वसंभवात् पुरुषव्याघ्रोऽभिरूप इति भवत्येव शौर्ये इत्यत्र समानधर्मेणाभिरूप्यं अत एव
सामान्यप्रयोग इत्युक्तं न तु गुणाप्रयोग इति ॥ २२ ॥

॥विशेषणं॥ ॥भेदकमिति॥ अत्र सिद्धिन्नन्तीतिवत्करणस्य कर्तृत्वविवक्षायां ल्युट् विशेषणमिति विशिष्यतेऽनेनेति विग्रहः विशेष्यतेऽनेनेति विशेषणं क
रणे ल्युट् इह साधारणाकारेण प्रतिपन्नं बहुप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्य एकस्मिन्प्रकारेऽवस्थापयति तत्सदृं विशेषणं भेदकमिति चोच्यते
व्यवस्थाप्यमानं विशेष्यं भेद्यमिति च । ननु च विशेषणं विशेष्यमिति च संबन्धिशब्दावेतौ तत्र च विशेषणमित्युक्ते गम्यत एव विशेष्येणेति एवं विशे
ष्येणेत्युक्ते गम्यत एव विशेषणमिति तत्किमर्थमुभयमुपादीयते । यत्र पूर्वोत्तरपदयोर्द्वयोरपि प्रत्येकं विशेषणविशेष्यभावः तत्रैव यथा स्या
त् यथा नीलोत्पलमिति अत्र हि नीलार्थो भ्रमरादिसाधारणरूपेण प्रतिपन्न उत्पलार्थेनोत्पले व्यवस्थाप्यते उत्पलार्थोऽपि हि रक्तादिसाधारणरू

॥विशेषणं विशेष्येण बहुलं॥ भेदकं विशेषणं भेद्यं विशेष्यं । विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिक
रणेन सुबन्तेन सह बहुलं समस्यते तत्पुरुषश्च समासो भवति । नीलोत्पलं । रक्तोत्पलं । बहुलवचनं व्यवस्थार्थं ।
क्वचिन्नित्यसमास एव । कृष्णसर्पो लोहितशालिः । क्वचिन्न भवत्येव रामो जामदग्न्यः । अर्जुनः कार्तवीर्यः । क्व
चिद्विकल्पः । नीलमुत्पलं । नीलोत्पलं । विशेषणमिति किं । तक्षकः सर्पः । विशेष्येणेति किं । लोहितस्तक्षकः ॥

पेण प्रतिपन्नो नीलार्थेन नीले व्यवस्थाप्यत इति भवति प्रत्येकमुभयभावः यत्र तु स नास्ति न तत्र समासो भवति यथा प्रत्युदाहरणे तक्षकः सर्प इ
ति न हि तक्षकः सर्पत्वं व्यभिचरतीति ननु व्यभिचरति क्रियानिमित्तकोऽपि तक्षकशब्दोऽस्ति तक्ष्णोतीति तक्षक इति सत्यमस्ति । न त्वसौ नामधेयेन ग्राह
ने तुल्यकक्षतां । द्रागेव दृष्टोऽप्रतिभा क्रियाशब्दे विलंबिता इह तु शिंशपा वृक्ष इति शिंशपाशब्दस्य फलेऽपि वृत्तेर्नैव वृक्षव्यभिचारात् द्रव्यस्यैव समासः न
न चात्र वृक्षप्रतीतिपूर्विका फलप्रतीतिरपि न बहिरंगा स्यात् यथैव बहिः पञ्चालास्यः शब्दो जनपदे तो जनस्य दृश्यत्व साधारणा नाम्नोऽन्ययोगमपेक्ष
ते तद्दृष्टेनोपपद्यतो वाच भगवान् लुब्योगाप्रख्यानादिति । इह तर्हि कथमथ जयाय नु मेरुमहीभृत इति न मेरुर्महीभृत्त्वं व्यभिचरतीति निरंकुशाः कवयः ।
यदि तर्हि यत्र प्रत्येकमुभयभावा तत्र समासः उभयोरपि विशेषणत्वमिति प्रथमानिर्दिष्टत्वादुपसर्जनत्वे सति पूर्वनिपातनियमः स्यात् नीलो

का॰प॰८०

२५

नैष दोषः उपसर्जनमित्यन्वर्थसंज्ञेयमप्रधानमुपसर्जनमिति अर्थतश्चाप्राधान्यं तदिह द्रव्यगुणोपनिपाते द्रव्यं प्रधानमप्रधानं गुणः द्रव्यं
हि क्रियासिद्धौ साक्षादुपयुज्यते गुणास्तु द्रव्यावच्छेदद्वारेण अतो गुणवचनस्यैव पूर्वनिपातः न द्रव्यवचनस्य न नीलोत्पलशब्दोपि जातिशब्दः न द्रव्य
शब्दः यदि तु जातिविशिष्टे द्रव्ये पर्यवसानाद्द्रव्यशब्दत्वं हन्तैवं नीलशब्दोपि गुणविशिष्टे द्रव्ये पर्यवसानान्न द्रव्यशब्दः स्यात् अत्रोच्यते उत्पलेः
प्रभृत्याविनाशाज्जातिर्द्रव्यं न जहाति शब्दे न च द्रव्यमतिरेकेण जातिः प्रकाश्यते शाबलेयो बाहुलेयो गौरिति न तु भवति शाबलेयस्य गौरि
ति तस्माज्जात्यात्मकमेव द्रव्यं प्रतीयत इति जातिशब्दोऽव्यतिरेकेणावस्थाप्यते गुणाः पुनः सत्येव द्रव्ये कदाचिदुपयन्ति कदाचिदपयन्तीति परस्प
रमुक्ता इति व्यतिरिक्ता अपि द्रव्यात्स्वशब्दैः प्रकाश्यन्त इति न गुणात्मकं द्रव्यं भवतीति न गुणशब्दो द्रव्यशब्दत्वेनावस्थापयितुमर्हतीति अत ए
वमुक्तं छागमालभेतेति चोदनायां श्वेताभावे कृष्णश्छाग आलभ्यते न तु छागाभावे पिष्टपिण्ड आलभ्यत इति भवति क्रियाद्रव्ययोः सन्नि
पाते प्येवमेव द्रष्टव्यं पाचकब्राह्मण इति यत्र तु गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चोपनिपातः तत्रानियम एव भवति खञ्ज
कुब्जः कुब्जखञ्जः पाचकपाठकः पाठकपाचकः खञ्जयाचकः याचकखञ्ज इति शिंशपावृक्ष इति द्रव्यशब्दयोरेवोपनिपाते विवक्षात्वस्य
व्यापकत्वान्महाविषयत्वाद्वृक्षस्य प्रथमत एवोपलम्भाच्च प्राधान्यं शिंशपात्वस्य तद्विपर्ययादप्राधान्यमिति न तत्राप्यनियमः विशेषणमि
ति किमिति विशेष्यशब्दस्य संबुद्धिशब्दत्वादेव विशेषणमिति लभ्यत इति प्रश्नः तक्षकः सर्प इति ननु तक्षकशब्दोपि विशेषणं भवत्येवागम
म्यते विशेष्यशब्दस्य संबुद्धिशब्दत्वादेव पूर्वपदस्य विशेषणत्वे लब्धे पुनर्विशेषणग्रहणमुत्तरपदस्यापि विशेषणत्वप्रतिपत्त्यर्थं विशेष्येणापि विशेष
णं समस्यते तच्च द्विः विशेष्यं विशेषणमिति न चात्रोत्तरपदं विशेषणं तक्षकस्य सर्पत्वाव्यभिचारात् लोहितस्तक्षक इति न चात्र तक्षको विशेष्यः
तस्य लोहितत्वाव्यभिचारात् यद्येवं लोहितो विशेषणं न स्यात् तस्यापि विशेष्यापेक्षत्वात् एवं तर्हि पाठक्रमादार्थक्रमो बलीयानिति त
क्षको लोहित इत्यादौ द्रष्टव्यः अत्र हि तक्षको विशेषणं भवति लोहितत्वस्य तक्षकत्वव्यभिचारात् । यद्येवं लोहितत्वस्य विशेष्यत्वमपि स्यात्
अस्त्येव तस्य विशेष्यत्वं पूर्वपदस्य तु विशेष्यत्वाभावान्न समुदाहरणत्वं एवं च कृत्वा तक्षकः सर्प इत्येतदेवास्मिन्नपि प्रश्ने प्रत्युदाहरणं भव

पण॰

२५

॥पूर्वापर॥ ॥पूर्वस्यैवायंप्रपंचइति गुणक्रियाशब्देनसहसमासेपूर्वादीनांपूर्वनिपातनियमार्थंतुनभवतिबहुलग्रहणेनैवसिद्धत्वादि
तिमन्यते॥ ॥श्रेण्यादयः॥ ॥एकेनशिल्पेनपण्येनवायेजीवंतितेषांसमूहःश्रेणिः तत्रपृथक्स्थितानांश्रेणीकरणेयथास्यात्तश्रेणिस्था

॥पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च॥ पूर्व अपर प्रथम चरम जघन्य। समान। मध्य। मध्यम। वी
र इत्येते सुबंताः समानाधिकरणेन सुपा सह समस्यंते तत्पुरुषश्च समासो भवति। पूर्वपुरुषः। अपरपुरुषः। प्रथमपुरुषः
।चरमपुरुषः।जघन्यपुरुषः।समानपुरुषः।मध्यपुरुषः। मध्यमपुरुषः। वीरपुरुषः।पूर्वस्यैवायंप्रपंचः॥ ॥श्रे
ण्यादयः कृतादिभिः॥श्रेण्यादयः सुबंताः कृतादिभिः समानाधिकरणैः सह समस्यंते तत्पुरुषश्च समासो भव
ति।श्रेण्यादिषु च्व्यर्थवचनं।अश्रेणयः श्रेणयः कृताः श्रेणिकृताः एकीकृताः।श्रेण्यादयः पठ्यंते।कृतादिरा
कृतिगणः।च्व्यंतानां तु कुगतिप्रादय इत्यनेन नित्यसमासः।श्रेणीकृताः।श्रेणि।एक।पूग।कुंडमराशि।विशि
ष्ट।निचय।निधन।इंद्र।देव।मुंड।भूत।श्रवण।वदान्य।अध्यापक।ब्राह्मण।क्षत्रिय।पटु।पंडित।कुशल।चपल
।निपुण।कृपण।श्रेण्यादिः।कृत।मित।मत।भूत।उक्त।समाज्ञात।समाम्नात।समाख्यात।संभावित।अवधा
रित।निराकृत।अवकल्पित।उपकृत।उपाकृत।इतिकृतादिः॥ ॥

नामेवतुदंडादिरूपेणाकरणेमाभूदित्याहश्रेण्यादिषुच्व्यर्थवचनमितिश्रेण्यादयः पठ्यंतइतितेनतत्रादिशब्दोव्यवस्थावाचीकृतादिराकृतिगण
इतिप्रयोगदर्शनेनाकृतिग्राह्योगणआकृतिगणः।अत्रादिशब्दः प्रकारेच्व्यंतानामित्यादिपरत्वादितिभावः आकृतिगणोप्युदाहरणस्वरूपे
णाकृतिपयान्यवतिष्ठतमनेत्यादि॥ ॥

का॰पद॰ ॥क्तेननञ्॥ ॥विशिष्टशब्दोयमधिके वर्त्तते तत्राधिक्यं कचित्तावधारणं तद्यथा देवदत्तो यज्ञदत्तात्स्वाध्यायेन विशिष्टः स्वाध्यायेनैव वि
२५ शिष्टोन्ये गुणाः समा इति गम्यते क्वचित्त्रिरवधारणं तद्यथा देवदत्तो यज्ञदत्तात्स्वाध्याये न विशिष्टः स्वाध्यायेन तावद्विशिष्टोन्ये गुणाः समा भूयो
सो वानेन तन्निरूप्यते वाक्यस्यैकरूपत्वेर्थप्रकरणादिना विशेषनिर्णयः तत्र निरवधारणपक्षे सिद्धं चतद्भुक्तं चेत्यत्रापि स्यात् क्तान्तयोः प्रकृति
भेदेपि नञ् तावदधिक इति विशिष्टग्रहणं चानर्थकं स्यात् क्तेन समानमानञित्येव वाच्यं स्यात् अतः सावधारणपक्षमाश्रित्याह नञेव विशेषो

॥क्तेन नञ्विशिष्टेनानञ्॥ नञेव विशेषो यस्य सर्वमन्यत्प्रकृत्यादिकं तुल्यं तन्नञ्विशिष्टं तेन
नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह अनञ् क्तान्तं समस्यते तत्पुरुषश्च समासो भवति।
कृतं च तदकृतं च कृताकृतं। भुक्ताभुक्तं। पीतापीतं। उदितानुदितं॥ ॥२४॥ ॥

एम॰ २५
यस्येति। प्रकृत्यादिकमित्यादिशब्देन प्रत्ययोपसर्गयोर्ग्रहणं तत्र सिद्धं च तद्भुक्तं चेति प्रकृतिस्तुल्या कर्त्तव्यमकृतमिति प्रत्ययः प्रकृतं चाप्र
कृतं चेत्युपसर्गः एवं च पूर्वपदमपि क्तान्तमेव लभ्यत इत्याह नञ् क्तान्तमिति। अनञिति शक्यमकर्तुं न हि पूर्वपदे सनञि उत्तरपदेन
अधिको भवति कृतं चाकृतं चेति। अवयवधर्मेणाप्यं समुदायस्य व्यपदेशः एकमेव च वस्त्वेकदेशकरणात्कृतं च भवत्येकदेशाकर
णादकृतं चेति नात्र कश्चिद्विरोधः॥ २४ ॥ ॥

।यदि तर्हि सावधारणोपक्रम आश्रीयते एवं सति यस्य नुडयं तोऽधिक इडागमो वा तेन सह समासो न स्यादिति तत आह नुडिटाविति नुडिड्ग्रह
णमागमोपलक्षणं यस्य तुल्यता तेन छिन्नाच्छिन्नमिति तु गधिकस्यापि ग्रहणं अशितानशितेनेत्यत्र अशभोजने अस्मात् लुडपि
क्लिष्टाक्लिशितेनेति क्लिशः क्त्वानिष्ठयोरिति पक्षे इट् तत्र तु इट्प्रत्ययान्तमकः इट्प्रत्ययेत क्तस्तु क्लिशनजपक्ष इति सर्वेषामुत्तरपदे तन्न भवितः।
इह तु छाताच्छितमिति शाच्छोरन्यतरस्यामितीत्वे कृते तेनाधिक्यात् समासो न प्राप्नोति अत्र केचिदाहुः नुडिड्ग्रहणमर्थाभेदकस्य विकार
मात्रस्योपलक्षणं तेनेहापि समासो भवतीति त्वाततागमोऽमित्र तु निष्ठान्तत्वस्य सिद्धत्वादेकत्वाभावः गौणत्वात् समानाधिकरणस्य

॥नुडिटौ तद्वत्कलान्येव भेदकौ। अशितानशितेन जीवति। क्लिष्टाक्लिष्टाक्लिशितेन वर्त्तते। कृता
पकृतादीनामुपसंख्यानं। कृतापकृतं। भुक्तविभुक्तं। पीतविपीतं। गतप्रत्यागतं। यातानुयातं। क्र
याक्रयिका। पुटापुटिका। फलाफलिका। मानोन्मानिका॥ ॥

एवं णानप्राप्नोतीत्यारंभः पूर्वनिपातनियमार्थश्च कृतमिति वयास्याद कृतकृतमिति मा भूत्। कृतापकृतमिति एकदेशस्येष्टस्य कर
णादेकदेशस्य चानिष्टस्याकरणादेकमेव वस्तु कृतं च भवत्यपकृतं च। भुक्तं च दृतप्यवहृतत्वात् हि भुक्तं चाशोभनत्वात् भुक्तविभुक्तं
विशब्दोऽत्राशोभनत्वे यो नयपति विरूपवचन। एवं पीतविपीतं गमनगतं प्रत्यागमनं प्रत्यागतं तत् शुष्पमुवाप्रत्यागमनेन सहचरितं ग
मनं गतप्रत्यागतं पातं च रतनुयातं च तदानीमेव पुनर्गमनात् यातानुयातं। क्रयाक्रयिकेति अल्प इति कप्रत्ययः तदन्तश्च समा
वास्त्रियां वर्त्तते क्रयाक्रयिके सत्येषामपि दृश्यत इति दीर्घः महान्क्रयः क्रयशब्दे नोच्यते गोबलीवर्दन्यायेन एवं पुटापुटिका फला

॥ फलिकाफलिकामानोन्मानिके ॥

का॰ प॰ २६

शाकपार्थिवादीनामिति सिद्ध्यतीति शेषः। पृषोदरप्रसंगार्थं च। केचित्तु पार्थिवे इति पदं नित्यं पठित्वा ईश्वरः पार्थिवः न स्वेश्वर इत्यर्थः। तस्य व्यवहार्ये तु शाकं प्रियत्वात् प्रधानं तत्र साहचर्यादेव तद्धर्मे शाकलाभादुत्तरपदलोपो न कर्तव्यः समासस्तु कर्मधारयो गौण्या लक्षणया सामानाधिकरण्यस्य।। ।।सन्महत्।। ।। पूज्यमानैरिति वचनादिति। पूज्यमानभावः पूजायेत्यर्थ इति भावः। अत एव सदिति सत्स्वरूपग्रहणं न ज्ञानस्थानयोः नहि ते पूज्या भवन्ति। उत्कृष्टो गौरिति उत्कृष्ट इत्यर्थः। महाजनो महोदधिरित्यादौ पूजाभावे ऽपि विशेषणं विशेष्येणेति समासः। वचनं तु पुरातं क्रियाशब्दैरपि समासे सदादीनामेव पूर्व

समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च। शाकप्रधानः पार्थिवः शाकपार्थिवः। कुतपसौश्रुतः। अजातौल्वलिः।। ।।सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।। ।।सत् महत् परम उत्तम उत्कृष्ट इत्येते पूज्यमानैः सह समस्यन्ते तत्पुरुषश्च समासो भवति। पूज्यमानैरिति वचनात् प्रशंसावचनाः सदादयो विज्ञायन्ते। सत्पुरुषः महापुरुषः परमपुरुषः उत्तमपुरुषः उत्कृष्टपुरुषः। पूज्यमानैरिति किं। उत्कृष्टो गौः कर्दमात्।। ।।वृन्दारकनागकुञ्जरैः पूज्यमानं।। वृन्दारक नाग कुञ्जर इत्येतैः सह पूज्यमानवाचि सुबन्तं समस्यते तत्पुरुषश्च समासो भवति। पूज्यमानमिति वचनात् वृन्दारकादयः प्रशंसावचना गृह्यन्ते। गोवृन्दारकः अश्ववृन्दारकः। गोनागः अश्वनागः। गोकुञ्जरः अश्वकुञ्जरः। पूज्यमानमिति किं। सुषीमो नागः २५

निपातनियमार्थं।। ।।वृन्दारक।। ।।वृन्दारकशब्दो देवजातिवचनः इतरौ हस्तिजातिवचनौ तत्रोपमानत्वे सति प्रशंसावचनता संभवतीति तत्र व्याघ्रादेराकृतिगणत्वात् सिद्धे समासे प्रशंसार्थमिदं यथा स्यात् निन्दायां मा भूदिति एवमर्थं वचनं इह मा भूत् माणवको ऽयं नागोपमो न्यग्भूत इति। सामान्यप्रयोगो ऽपि यथा स्यादित्यन्ये सुषीम इति सर्पो ऽयं नागविशेषस्य यद्येवं विशेषणं विशेष्येणेत्यधिकारादेवात्र न भविष्यतीति न त्वयं नागः सुषीमो ऽस्ति सत्संप्रत्युदाहरणादिति पर्यदर्शिता माणवको ऽयं नाग इति प्रत्युदाहरणं।। २५।।

राम॰ २६

॥कतरकतमौ॥ ॥कतरकठइतिगोत्रंचरणयोः सहेतिजातिः तथाचप्रत्युदाहरणमिति पूर्ववृत्तिरूपमत्रमुपपन्नंभवतीतिशेषः॥ ॥पो
टायुवति॥ ॥उभयव्यंजनेति।अज्यतेनेनस्त्रीत्वादिकमितिव्यंजनं स्तनादि उभयोः स्त्रीपुंसयोर्व्यंजनंयस्याः सातथोक्तानपुंसकंपोटेत्यर्थः

॥कतरकतमौजातिपरिप्रश्ने॥कतरकतमौजातिपरिप्रश्नेवर्त्तमानौसमर्थेनसुपासहसमस्येतेतत्पुरुषश्चस
मासोभवति॥कतरकठः।कतरकालापः।कतमकठः।कतमकालापः।ननुकतमशब्दएवजातिपरिप्रश्न
एवव्युत्पादितः कतरशब्दोपिसाहचर्यात्तदर्थइतिविग्रहीष्यतेकिंजातिपरिप्रश्नग्रहणेन।एतज्ज्ञापय
ति।कतमशब्दोऽन्यत्रापिवर्त्ततइति।तथाचप्रत्युदाहरणं।कतरोभवतोर्देवदत्तः।कतमोभवतांदेवद
त्तः॥ ॥किंक्षेपे॥ ॥किमित्येतत्क्षेपेगम्यमानेसुपासहसमस्यतेतत्पुरुषश्चसमासोभवति।किंराजायो
नरक्षति।किंसखायोभिद्रुह्यति।किंगौर्योनवहति।किमःक्षेपइतिसमासांतोनभवति।क्षेपइतिकिं।कोरा
जापाटलिपुत्रे॥ ॥पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तै
र्जातिः॥ उभयव्यंजनापोटेत्यभिधीयते।गृष्टिरेकवारप्रसूता।धेनुःप्रत्यग्रप्रसूता।वशावंध्या।वेहद्गर्भघाति
नी।वष्कयणीतरुणवत्सा।पोटादिभिः सहजातिवाचिसुबंतंसमस्यते।तत्पुरुषश्चसमासोभवति।इभपोटा।इ
भयुवतिः।अग्निस्तोकः।उदश्वित्कतिपयं।गोगृष्टिः।गोधेनुः।गोवशा।गोवेहत्।गोवेहत्।
गोवष्कयणी।कठप्रवक्ता।कठश्रोत्रियः।कठाध्यापकः।कठधूर्त्तः।जातिरितिकिं।देवदत्तः प्रवक्ता।धूर्त्तग्रहणमकुत्सार्थं॥ ॥ ॥

पोटाशब्दस्तुतत्रापिस्त्रीलिंगःप्रवर्त्तते शब्दानांचित्रशक्तित्वात् उभयेयथापुमान्‌ धूर्त्तग्रहणमकुत्सार्थमितिकुत्सायांतुकुत्सि
तानिकुत्सनैरितिसिद्धमितिभावः तत्रकठधूर्त्तइतियः कठः सधूर्त्तइत्यर्थोनतुकठत्वंकुत्स्यते॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का०प०२०

२७

॥प्रशंसावचनैश्च॥ ॥रूढिशब्दाः प्रशंसावचना गृह्यन्त इति प्रशंसयेति यत्करणे वचनग्रहणात् इह ग्रहणं रूढिशब्दानां प्रशंसामात्रवाचिनां तेन ये यौ
गिकाः प्रशस्तशोभनरमणीयादयो ये च विशेषवचनाः शुचिमद्वादयो ये च जातिशब्दाः सन्तः प्रयोगात् प्रशंसां गमयन्ति सिंहो माणवक इति ते सर्वे
न गृहीता भवन्ति मतल्लिकादय इति मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजो प्रशस्तवाचकान्यमूनीत्यमरः। आविष्टलिङ्गत्वादिति। नियतलिङ्गत्वा
दित्यर्थः। स्वलिङ्गोपादाना इति स्वस्यैव लिङ्गस्योपादानं येषु ते तथोक्ताः प्रशंसावचनयोगे पुवत्तासेकयोगे कर्तव्ये योगविभाग श्रिष्मप्रयोजनः॥
॥युवा खलतीति॥ ॥संज्ञाग्रहणोपग्रहणोग्रापि यताः खलतिरित्यादावेव तु स्यान्न च तस्य जरतीशब्देन सामानाधिकरण्येन च गार्ग्यायणी युवति

प्रशंसावचनैश्च॥ ॥जातिरिति वर्त्तते जातिवाचि सुबन्तं प्रशंसावचनैः सह समस्यते तत्पुरुषश्च समासो भवति।
रूढिशब्दाः प्रशंसावचना गृह्यन्ते मतल्लिकादयस्ते चाविष्टलिङ्गास्ततोऽलिङ्गोपि जातिशब्देन स्वलिङ्गोपादाना एव स
मानाधिकरणा भवन्ति। गोप्रकाण्डं। अश्वप्रकाण्डं। गोमतल्लिका। अश्वमतल्लिका। गोमचर्चिका। अश्वमचर्चिका।
जातिरिति किं। कुमारीमतल्लिका॥ ॥युवा खलतिपलितवलिनजरतीभिः॥ ॥समानाधिकरणैः सह युवशब्दः
समस्यते तत्पुरुषश्च समासो भवति। जरतीभिरिति स्त्रीलिङ्गनिर्देशः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहण
मिति ज्ञापनार्थः। युवा खलतिः युवखलतिः। युवतिः खलती युवखलती। युवा पलितः युवपलितः। युवपलिताः
युवतिः पलिता युवपलिता। युवा वलिनः युववलिनः। युवतिर्वलिना युववलिना। युवा जरन् युवजरन्। युवतिर्

रत्ति स्त्रियां युवसंज्ञाप्रतिषेधादतो युवेति स्वरूपग्रहणमित्याह युवशब्द इति। खलत्यादिभिः समानाधिकरणैरिति कथं पुनर्युवशब्दस्य जातीशब्देन सामा
नाधिकरण्यं पुंल्लिङ्गस्य स्त्रीलिङ्गेन सतस्तत्राह स्त्रीलिङ्गनिर्देश इति अस्यां हि परिभाषायां सत्यां युवशब्दस्य ग्रहणे युवतिशब्दस्यापि ग्रहणादुपपद्यते युव
तिजरतीशब्दयोः सामानाधिकरण्यम् असत्यां तु नोपपद्यत इत्यर्थापत्त्या परिभाषा ज्ञाप्यते। युवखलतीति खलतिकारादिकृदिकारादक्तिनः सर्वतो क्तिन्नर्थादित्येके इति
ङीष् वलिशब्दः पामादिः युवजरन्निति जरच्छब्दात् केचिदाचार्यैरनबोधिता इति पुंल्लिङ्गेनापि समासो भवतीति भावः युवतिर्जरतीति कथं रूढशब्दा
चिनोः सामानाधिकरण्यं अन्योन्यधर्मोपलम्भात्तद्रूपत्वारोपाद्भविष्यति। यद्येवं भिन्नलिङ्गयोरप्येवमेव सामानाधिकरण्यसंभवात्कथं परिभाषाज्ञापनमिति चेत् युव

जरती युवजरती ४६॥
शब्दस्य पूर्वनिपातनियमार्थं वचनमनियमो हि गुणशब्दत्वात्स्यात् ४६॥
२७ सू०

।कृत्यतुल्याख्या॥ ॥तुल्यपर्यायाश्चेति। आख्याग्रहणं स्वरूपनिराकरणार्थमिति भावः। भोज्योष्णमित्यादावनियमेन प्राप्ते पूर्वनिपातनियमार्थं
वचनं तुल्यमहानिति सन्महदित्यस्याकृतत्वात्तुल्याख्येषु समावेशाभावात्तुल्यमहत्स्वेव परत्वात्प्रथमेव समासो युक्त इति भावः। भोज्य ओदन इति
प्रतिषेधसामर्थ्याद्विशेषणमित्यपि न भवति॥ ॥वर्णो वर्णेन॥ ॥विशेषणविशेष्ययोरिति वर्तते तत्र द्वयोः स्वरूपग्रहणे न विशेषणतामे
वेत्यवर्णश्चासौ वर्णश्चेति किं स्यादत्र तं किमपि चेतं अथैकत्र विशेषणरूपस्यान्यत्र च ग्रहः शुक्लः श्यामो वर्ण इति न स्यादतो विशेषणं शु

कृत्यतुल्याख्या अजात्या॥ कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च सुबन्ताः अजातिवचनेन समस्यन्ते तत्पुरुषश्च
समासो भवति। भोज्योष्णं। भोज्यलवणं। पानीयशीतं। तुल्याख्याः तुल्यश्वेतः। तुल्यमहान्। सदृशश्वेतः।
सदृशमहान्॥ अजात्येति किं। भोज्य ओदनः॥ ॥वर्णो वर्णेन॥ ॥वर्णविशेषवाचि सुबन्तं वर्णविशे-
षवाचिना सुबन्तेन समानाधिकरणेन सह समस्यते तत्पुरुषश्च समासो भवति। कृष्णसारंगः। लोहितसा-
रंगः। कृष्णशबलः। लोहितशबलः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

क्लस्य वर्णत्वाव्यभिचारात् तस्मादुभयत्र विशेषग्रहणमित्याह वर्णविशेषवाचीत्यादि कृष्णसारंग इत्यादिना नानावर्णसमाहारः सारंगः
तथा शबलः तस्य वर्णान्तरसमाहारेऽपि भावात् कार्षाण्यन्वयो नियतो न स्यादिति कृष्णो विशेषणमेवं लोहितशब्देऽपि द्रष्टव्यं ननु च कृष्ण
शब्दोऽत्रावयववृत्तिर्न समुदाये तस्य साङ्गत्वात् तत्कथमेवमवयवे(?)ते कृष्णशब्दस्य समुदायवृत्तिना सारंगशब्देन सामानाधिकरण्य
मत आह॥ ॥छ॥ ॥

अवयवद्वारेणोत्सादि। कृष्णावयवसंबंधात्समुदाय एव कृष्णाऽयमत इत्यर्थः अत एवात्र गौणत्वमाभाषितं क समानाधिकरण्यमिति सूत्रारंभः। ननु तत्तीयात कृतेने
सैवात्र सिद्धः समासः कथं सारंगशब्दो गुणवचनः सारंगश्च सारंगत्वं कृष्णावयवकृतमित्यस्यैव सिद्धिः तत्रायमभिप्रायः वर्णो वर्णेष्विनेनेति सर्वपदप्रकृ
तिस्वरोनवक्तव्यो भवतीति तत्पुरुषे तुल्यार्थतृतीयेत्यनेनापि सिद्धत्वात् तत्स्वरूपं वक्तव्यं एतत्प्रतिषेधार्थ इह माभूत् कृष्णो तोलोहितेनेत्यतः इदं तु न वक्तव्यं। इ
मापि वक्तव्यं इहापि यथा स्यात् स्फुल्लबभ्रुः कृष्णाभ्रुः श्रीहरितभ्रुः कः बभ्रुकपिलः यस्य कश्चिदवयवः स्फुल्लः कश्चिद्बभ्रुः स समुदायोऽवयवशब्दा
भ्यां न योक्त इति नात्र तात्पर्यं तत्सम्भवः। अत्र च कस्मसारंगशब्दो यत्रैकोऽवयवशब्दोऽपरः समुदायशब्दस्तत्रावयवस्याप्रधानत्वादुपसर्जनत्वात्पूर्वनिपात

अवयवद्वारेण कस्मशब्दः समुदायेवर्त्तमानः समानाधिकरणो भवति॥ ॥कुमाराश्रमणादिभिः॥ ॥कुमार
शब्दः श्रमणादिभिः सह समस्यते तत्पुरुषश्च समासो भवति॥ यत्र स्त्रीलिंगाः पठ्यंते श्रमणा प्रव्रजिता कुलटेत्येवमादयस्
तैः सह स्त्रीलिंग एव कुमारशब्दः समस्यते येनु पुंलिंगाः अध्यापको भिरूपकः पंडित इति तैरुभयथा प्रातिपदिक
ग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति॥ कुमारश्रमणा कुमारश्रमणा॥ श्रमणा। प्रव्रजिता। कुलटा। गर्भिणी।
तापसी। दासी। बंधकी। अध्यापका। अभिरूपका। पंडिता। पटु। मृदु। कुशला। चपला। निपुणा॥ ॥२७॥ ॥

तस्योत्स्वयवशब्दयोः पर्याय इति द्वयमेवं इह यस्मिन्प्रयोगे वीरैः पुरुषैस्तद्वान् ग्रामः प्रतिपाद्यते तमिष्टस्तत्र प्रथममेवान्यपदार्थी विवक्षाकार्यवीराः
पुरुषा अस्मिन्संतीति वीरपुरुषको ग्राम इति बहुव्रीहिरेवानिसंयथा स्यात् अन्यथा पूर्वमनये। सैनेन्यपदार्थे वीराः पुरुषा वीरपुरुषा इति कर्मधारये कृते पश्चा
द्यत्यपदार्थविवक्षायां मत्वर्थीयेन तिवीरपुरुषवान्ग्राम इत्याद्यनिष्टमपि कदाचित्स्तु षडूपेतत्सर्वशब्दस्यान्तकार्यते कर्मधारयोऽपीष्यते तस्माच्च
मत्वर्थविवक्षायां मतुबिनिठनादिति ठनं बाधित्वा इनिरेव भवतीति वक्तव्यं सर्वधनं सर्वधनं तदस्यास्तीति सर्वधनी सर्वबीजी सर्वकेशी यत्र कर्मधार
योजातिविशेषवचनः तत्र कर्मधारयान्मत्वर्थीयो भवति कृष्णसर्पवान्वल्मीकः लोहितशालिमान्ग्रामः गोखरवद्दरायं गोरमगवादिति न
हि वहुव्रीहिणा तज्जात्यानठद्धेरेशकं प्रतिपादयितुं॥ ॥कुमारः। कुमारशब्दस्य पूर्वनिपातनियमार्थवचनं २७ ॥ ॥ ॥

चतुष्पादः॥ ॥चतुष्पाज्जातिरिति। केचिदाहुः योयादि सत्राज्जातिग्रहणमनुवर्त्तमिति। अपरे त्वाहुः पेशद्यांतरनिषेधे सामर्थ्य तुष्पाद्यावि
नस्तरावांतरं गत्वाहृत्य तेन तु कालाः स्याद्यो योगिकाः शब्दांतरस्तेनिषान्नाश्चतुष्पाद्विषया इति। गर्भिणी इत्यस्य परनिपातार्थं वचनं॥ ॥मयूरव्यं
सका॥ ॥मयूरव्यंसक इति। व्यंसको धूर्तः मयूरश्चासौ व्यंसकश्चेति व्यंसक शब्दस्य गुणवचनत्वात् पूर्वनिपाते प्राप्ते वचनं एवं छात्रव्यंसकादीनां प
वन मुंड उपर्येतानां अपरे त्वाहुः मयूर इव व्यंसक छात्र इव व्यंसकः कंबोज इव मुंडः यवन इव मुंडः उपमानसमासोयं उपमानानि सामान्य व

चतुष्पादो गर्भिण्या। चतुष्पाद्वाचिनः सुबंताः गर्भिणी शब्देन समर्थेन तेन सह तत्पुरुषश्च समासो भवति। गोगर्भिणी। अ
जागर्भिणी। चतुष्पाज्जातिरिति वक्तव्यं। इह मा भूत्। कालाक्षीगर्भिणी। स्वस्तिमतीगर्भिणी। चतुष्पाद इति किं।
ब्राह्मणीगर्भिणी॥ ॥मयूरव्यंसकादयश्च॥ समुदाया एव निपात्यंते। मयूरव्यंसकादयः शब्दाः तत्पुरुषसंज्ञा भ
वंति। चकारोऽवधारणार्थः परममयूरव्यंसक इति समासांतरं न भवति। मयूरव्यंसकः। छात्रव्यंसकः। कंबोजमुं
डः। यवनमुंडः। अथ इसि। हस्तेगृह्य। पादेगृह्य। लांगूलेगृह्य। पुनर्दाय। एहीडादयो न्यपदार्थे एहीडं वर्तते। ए
हिवाणिजा क्रिया। अपेहिवाणिजा। प्रेहिवाणिजा। एहिस्वागता। अपेहिस्वागता। प्रेहिस्वागता। एहिद्वितीया।
अपेहिद्वितीया। प्रोहकटा। अपोहकटा। प्रोहकर्दमा। अपोहकर्दमा। उद्धरचूडा। आहरचेला॥ ॥छ॥ ॥

च नेरिति पेदासे इत्युनर्विधानं तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरो माभूदिति मत्युपमानसंज्ञत्वेन विहिते समासे विधीयतइ
ति पुनर्दायेति पुनश्च न सो छंदसीति गतिसंज्ञा वार्त्तिककारीयेति गणकारेणोदं पठितं। एहि इडे यस्मिन् कर्मणि तदेहीडं एवमेहियवं ए
हिवाणिजेति यस्यां क्रियायां सा एहिवाणिजा एवमपेहिवाणिजा प्रेहिवाणिजा एहिस्वागतमिति यस्यां क्रियायां सा एहिस्वागता उहवित
र्केलोरणमध्यमैकवचनं प्रोहकटमिति यस्यां सा प्रोहकटा एवं प्रोहकर्दमादय॥

॥आहरवसनान्तः। कृती छेदने तदे वचनं भुवादित्वान्नुम्। कृन्तविचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा। उद्धर उत्सृजेति यस्यां सा उद्धरोत्सृजा। आख्यातमाख्यातेनेति सिद्धे असातत्यार्थं वचनं। एवमुद्धमविधमा उत्पचविपचा उत्पतनिपता उदक् अवाक् उच्चावचं उच्चैश्च नीचैश्च उच्चनीचं आचितं चोपचितं च आचोपचं निश्चितं च प्रचितं च निश्चप्रचं सर्व एते निपात्यन्ते नकिंचन विद्यते यस्य सो किंचनः स्नात्वाकालकादिषु समासो नोदात्तत्वं ल्यबभावश्च निपात्यते। प्रतीयमानक्रियापेक्षं च समानकर्तृकत्वं स्नात्वा कालकः संपन्न इति जहि कर्मणेति। जहीति लोण्मध्यमैकवचनान्तं तत्कर्मणा।

आहरवसना। आहरवनिता। कृन्तविचक्षणा। उद्धरोत्सृजा। उद्धमविधमा। उत्पचविपचा। उत्पतनिपता। उच्चावचं। उच्चनीचं। आचोपचं। आचपराचं। निश्चप्रचं। अकिंचनं। स्नात्वाकालकः। पीत्वास्थिरकः। भुक्त्वासुहितः। प्रोष्यपापीयान्। उत्पत्याकुला। निपत्यरोहिणी। निषण्णश्यामा। अपेहिप्रघसा। एहिपंचमी। एहिद्वितीया। जहिकर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति। जहिजोडः। उज्जहिजोडः। जहिस्तंबः। उज्जहिस्तंबः। आख्यातमाख्यातेन क्रियासातत्ये। अश्नीतपिबता। पचतभृज्जता। खादतमोदता। खादतवमता। आहरनिवपा। आवपनिष्किरा। उत्पचविपचा। भिंधिलवणा। छिंधिविचक्षणा। पचप्रकूटा। अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः।

॥इति जयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः॥ १८ ॥

बहुलं समस्यते आभीक्ष्ण्ये गम्यमाने समासेन चेत्कर्ताभिधीयते जहिजोड इत्याभीक्ष्ण्येन आपहमज जहिजोडः। अश्नीतपिबतेत्येवं यत्र सततमभिधीयते सा अश्नीतपिबता। एवं पचतभृज्जता। भ्रस्ज पाके भिंधिलवणामिति यस्यामभिधीयते सा भिंधिलवणा एवं पचलवणा। अविहितलक्षणस्तत्पुरुष इति यस्य तत्पुरुषस्य लक्षणं न कृतं आसप्रयोगश्च भवति समपूर्व्यंसकादेराकृतिगणत्वात्तत्रैव द्रष्टव्य इत्यर्थः॥ ॥इति श्रीहरदत्तमिश्रविरचितायां पदमंजर्यां द्वितीयस्याध्यायस्य प्रथमः पादः॥ ॥१८॥ ॥ ॥श्रीः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीरामचन्द्राय नमः॥

॥पूर्वापराधरोत्तरं॥ ॥एकदेशोऽस्यास्तीत्येकदेशीति॥ एकाणोऽप्यवीरिति ठन् प्राप्नोति अत एव निर्देशादिनिर्द्दिष्टः एकदण्डी सपत्नेत्यपशब्दः एको दण्डोऽस्यास्तीति बहुव्रीहिणो वा गतत्वान्मत्वर्थ एव दुर्लभः किं पुनरिति स नावाधितः एकदेशशब्दास्तु कर्मसाधने अवयववचन इति न तत्र बहुव्रीहिणा गतत्वं यथा कृष्णसर्पवानिति॥ सामर्थ्यादेकदेशवचना इति॥ एकदेशसमासे स्येकदेशी भवतीत्यर्थे सति तत्सामर्थ्यं एकाधिकरणग्रहणमेकदेशिनो विशेषणमिति सत्समस्यन्ते यधिकरण्येनेति भावः तदाहैकं चेदिति एकत्वसंख्याविशिष्टमित्यर्थः समानाभिधेय

॥पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे॥ ॥एकदेशोऽस्यास्तीत्येकदेशी अवयवी तद्वाचिना सुबन्तेन सह पूर्वापराधरोत्तरशब्दाः सामर्थ्यादेकदेशवचनाः समस्यन्ते तत्पुरुषश्च समासो भवति। एकाधिकरणग्रहणमेकदेशिनो विशेषणं एकं चेदधिकरणमेकद्रव्यमेकदेशि भवति। षष्ठीसमासापवादोऽयं योगः॥ ॥श्री॥ ॥

वचन एकाधिकरणशब्दो न भवति अवयवावयविशब्दयोः सामानाधिकरण्यानुपपत्तेः समानाधिकरण्येनेति प्रकृतत्वाच्च स्यादेतत् समुदायेबुद्धिस्थाः शब्दा अवयवेष्वपि वर्त्तन्त इति सामान्य न सामानाधिकरण्ये सति पूर्वश्चासौ कायश्चेति विशेषणमिति एव सिद्धः समासो नार्थ एतेन एवं बहुलापरवल्लिङ्गमित्यत्र तत्पुरुषग्रहणं न कर्त्तव्यं भवति कथं उत्तरपदार्थप्रधानत्वादेव सिद्धमिति तत्राह षष्ठीसमासापवादोऽयं योग इति सिद्धं तु कथंचित् पूर्वकाय इति कायपूर्व इत्यस्य निवृत्त्यर्थमेव तु सूत्रं कर्त्तव्यमित्यर्थः॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥छ॥

का॰ प॰ ३० ।पूर्वकायस्येति षष्ठ्यपि दिशि दृष्टः शब्दो दिक्शब्द इत्याश्रयणात्संप्रत्यदिग्वृत्तिनापि योगे पंचमी भवति तथा पितस्य परमोऽभेडि तमिति लिंगाद् यद्वृत्ति
मिर्योगे षष्ठ्येव भवति। पूर्वं नाभेः कायस्येति नाभेरिति दिग्योगलक्षणा पंचमी कायसंबंधी नाभ्यपेक्षया पूर्वो भाग इत्यर्थः तत्र नाभिरेकदेशी न भवती
३० ति न तेन समासो भवति यस्त्वेकदेशी कायस्तेन समासो भवत्येव पूर्वकायो नाभेरिति पूर्वशब्दस्य संबंधिशब्दत्वेन नित्यसापेक्षत्वादिति केचिदाहुः।

॥पूर्वं कायस्य पूर्वकायः। अपरकायः। अधरकायः। उत्तरकायः। एकदेशिनेति किं। पूर्वं नाभेः कायस्य। एकाधिकरण इति किं। पूर्वं छात्राणामामंत्रय। कथं मध्याह्नः सायाह्न इति। संख्याविसायपूर्वस्याह्नस्येति ज्ञापकात्सर्वैरेकदेशशब्दैरह्नः समासो भवति॥ ॥१॥ ॥श्रीकृष्णायनमः॥

राम॰ ३०

असमासे तु यत्रार्थप्रकरणादिना विशेषोऽवगम्यते तत्रैव समासो न शब्दोपादान इत्याहुः। पूर्वं छात्राणामिति। नेयं निर्धारणे षष्ठी किं तर्हि समुदाय
संबंधे उद्धृतावयवस्तु समुदायश्छात्राणामिति नेत्यनेन नोच्यत इति बहुवचनं यथा छात्राणां पंचम इति तत्र च छात्राणामेकदेशित्वमस्त्ये
व किं तु बहुत्वसंख्याविशिष्टानामिति समासाभावः संख्याविसायपूर्वस्येत्यादिना ह्नस्य यो ह्नादेशः पूर्वत्वमह्नस्योपपद्यत इति भावः। केचित्तु सर्वै
रेकदेशवाचिना कालवाचिनः समासो भवति न त्वहन्शब्दस्यैवेति ज्ञापकशरीरं वर्णयंति तेन मध्यरात्र इत्यपि सिद्धं भवति ॥१॥

अर्द्धम् ॥ अविष्टलिङ्ग इति। नियतलिङ्ग इत्यर्थः। तस्येदं ग्रहणमिति तत्रैवार्थे नपुंसकत्वस्याव्यभिचारात् अवयववाची त्वभिधेयवशेन त्रिलिङ्गः अप
पार्द्धमपाभासितं तदर्द्धमासा स्यादिति तं ग्रामार्द्धो नगरार्द्धः सर्पिषार्द्धः अत एव नेत्येति न स्यादर्द्धः शास्त्रार्द्धः परिशेषमध्यमवाचि विवर्द्धः यातीति भाष्ये लवयवाची
पुल्लिङ्ग इत्युपलक्षणं। कथं तु समप्रविभागे स्त्रीलिङ्गता हस्यते एकान्तरे वेर्द्धी युग्मा विति युग्मा सुक्रिशुअर्द्धः शास्त्रानिर्विवर्द्धा दित्यर्थः तस्यार्थत्वेन
निर्वाहः। अर्द्धमिति नपुंसकनिर्देशः शब्दरूपापेक्षः यापि संभाव्येत यथा स्वमज्ञातिधनाख्यायां बंधुनिबद्धुव्रीहावि चितितस्मान्न पुंसकमिसुक्तं अर्द्धपिप्प
लीति पिप्पलीशब्दस्यैकविभक्तिचेत्युपसर्जनसंज्ञा न भवति एकविभक्त्यावषष्ठ्यंतमिति वचनात्। अर्द्धं पिप्पलीनामिति विग्रहे इदानीमिदं भवति अ

॥ अर्द्धं नपुंसकं ॥ ॥ एकदेशिनैकाधिकरण इति वर्त्तते। समप्रविभागे अर्धशब्दो नपुंसकमाविष्टलिङ्गस्तस्येदं ग्र
हणं। अर्द्धमित्येतत् नपुंसकमेकदेशिनैकाधिकरणेन सह समस्यते तत्पुरुषश्च समासो भवति। षष्ठीसमासाप
वादोयं योगः। अर्द्धं पिप्पल्याः अर्द्धपिप्पली। अर्द्धकोशातकी। नपुंसकमिति किं। ग्रामार्द्धो नगरार्द्धः। एकदेशि
नेत्येव। अर्द्धं पशोर्देवदत्तस्य। देवदत्तेन सह समासो न भवति। एकाधिकरण इत्येव अर्द्धं पिप्पलीनां ॥ ॥ छ ॥

द्वाविति पिप्पलीनामर्द्धं पिप्पल्य इतिनैतदस्मिन्विग्रहे भवति खंडसमुदाये भवति अर्द्धपिप्पली चार्द्धपिप्पली वार्द्धपिप्पल्य इति। देवदत्तशब्देन स
मासो न भवतीति देवदत्तोत्र स्वामी न त्वेकदेशीयस्त्वेकदेशी पशुस्त्वेकदेशी पशुः तेन भवत्येव समासः अर्द्धपशुर्देवदत्तस्येति देवदत्तस्वामिके पशोरर्द्ध
मित्यर्थः तत्र समुदायेन संबंधान्नास्ति सापेक्षत्वं। अयं योगः शक्योऽवक्तुं कथमर्द्धपिप्पली समानाधिकरणो भविष्यति अर्द्धं चासौ पिप्पली चेति नि
त्वचयधर्द्धं न पिप्पली अथ पिप्पलीनामर्द्धं अर्द्धपिप्पली चेति विप्रतिसिद्धं नास्ति विप्रतिषेधः समुदाये हि दृष्टाः शब्दा अवयवे ष्वपि वर्त्तन्ते किंच समप्रवि
भागा इत्यर्द्धं चंद्राद्राव यमेव गतिप्रकारः समप्रविभागे पि तथास्तु इदं तर्हि प्रयोजनं समप्रविभागे षष्ठीसमासो मा भूदिति। इष्यते षष्ठीसमासो मा भूदि
ति इष्यते षष्ठीसमासोपि तथा च भगवान्पिंगलनागः प्रयुंक्ते स्वरार्द्धं चार्याद्धमिति। एवं तर्हि गोणत्वात्सामानाधिकरण्यस्य विशेषणसमासो न कि

का॰प॰द॰ ॥द्वितीयतृतीय॥ ॥अन्यतरस्यांग्रहणात्सोपि भवतीति ननु च पूरणप्रत्ययान्तमात्रस्यैते द्वितीयादयस्तत्र पूरणगुणसुहितेत्यादिना प्रतिषेधेन भवितव्यं यदापि पू
रणाद्भागे तीयादित्यनेन स्वार्थिकोऽन्प्रत्ययः क्रियते तदापि पूरणगुणसुहितार्थेत्यर्थशब्दस्य प्रत्येकमभिसंबंधात् स्वार्थग्रहणं न तु तद्धितप्रकृतिविहितप्रत्ययग्रहणा
३१ दिति भवितव्यमेव प्रतिषेधेन तत्कथं सोपि भवतीत्याह पूरणगुणेत्यादिना समासस्य महाविभाषयैव सिद्धत्वात् षष्ठीसमासप्राप्त्यर्थमेवान्यतरस्यांग्रहणमिति भा

॥द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्॥ एकदेशिनैकाधिकरणे॥ विवर्तते षष्ठीसमासापवादोयं योगः॥ अन्यतर
स्यांग्रहणात्सोपि भवति। पूरणेति प्रतिषेधश्चात एवान्यतरस्यांग्रहणसामर्थ्यान्न प्रवर्तते। द्वितीयादीनि शब्द
रूपाणि एकदेशिनैकाधिकरणेन सहान्यतरस्यां समस्यंते तत्पुरुषश्च समासो भवति द्वितीयं भिक्षायाः द्वितीयभि
क्षा षष्ठीसमासपक्षे भिक्षाद्वितीयं वा। तृतीयं भिक्षायाः तृतीयभिक्षा भिक्षातृतीयं वा। चतुर्थं भिक्षायाः चतुर्थभि
क्षा भिक्षाचतुर्थं वा। तुर्यं भिक्षायाः तुर्यभिक्षा। भिक्षातुर्यं वा तुरीयशब्दस्यापीष्यते· तुरीयं भिक्षायाः तुरीयभिक्षा· भि
क्षातुरीयं वा· एकदेशिनेत्येव द्वितीयं भिक्षाया भिक्षुकस्य। एकाधिकरणेनेत्येव। द्वितीयं भिक्षाणां॥ २॥ ॥

कः। यद्येवं तु षष्ठीसमासापवादो योग इत्याचष्टामभिप्रायेणोक्तं। यद्यप्यस्मिन्योगे षष्ठीसमासप्रतिषेधस्याप्यत्र षष्ठीसमासबाधकत्वमविशिष्टमि राम॰
ति मत्वा तथोक्तं। अयमपि योगः शक्योऽवक्तुं कथं समुदायावयवारोपचारिके सामानाधिकरण्ये सति द्वितीयभिक्षादि सिद्धमुख्यार्थवृत्तौ षष्ठीसमासेन तु ३१
भिक्षाद्वितीयमित्यादि भविष्यतीति। नैतत्तु सूत्र्यते अनेनैव सत्त्वन्यतरस्यांग्रहणेन षष्ठीसमासः प्राप्यते कथमस्मिन्योगे। सति भविष्यति॥ २ ॥

॥प्राप्तापन्ने॥ ॥प्राप्तजीविक इति। एकविभक्तौ युपसर्जनत्वाद्गुरुत्वं प्राप्तजीविकापन्नेतिकर्मणि ज्ञातेन बहुव्रीहावप्येतत्सिद्धं समासान्तोद
न त्वार्थं तु वचनं इह प्राप्तसुखः प्राप्तदुःख इत्यादिषु जातिकालसुखादिभ्य इति प्राप्तापन्नयोः परनिपातप्रसंगश्च। इह लिंगविशिष्टपरिभाषाया प्रा
प्राप्त इत्यस्याप्ययं समासो भवति प्राप्तजीविकः प्राप्तजीविका इति। पुंवद्भावो वक्तव्यः। प्राप्येत्वकारः इत्वं यदस्य विधीयते इत्यत्र चकारेण समुच्च
यार्थेनाकारप्रश्लेषोऽनुमीयते सोऽत्रलाक्षणिक इति द्विस्वरूप इति भावाभाव ४ प्राप्तापन्ने द्वितीयान्तेन सह समस्येते अच अत्वं च भवति प्राप्तापन्नयो रित्य
र्थः॥ ॥कालाः परि॥ ॥सामर्थ्यात्परिमाणवचना इति परिमाणमयते स्य परिमाणो भवति नाम्य थेत्येतत्सामर्थ्यात् तत्र च यघटिकालः प्रस्थादि व

प्राप्तापन्ने च द्वितीयया॥ एकदेशिनैकाधिकरणा इति निवृत्तं। द्वितीयासमासे प्राप्ते वचनमिदं। विधानसामर्थ्यात्समासो
ऽपि भवति। प्राप्त आपन्न इत्येतौ द्वितीयान्तेन सह समस्येते तत्पुरुषश्च समासो भवति। प्राप्तो जीविकां। प्राप्तजीविकः। जी
विकाप्राप्त इति वा। आपन्नो जीविकां। आपन्नजीविकः। जीविकापन्न इति वा॥ ॥कालाः परिमाणिना॥ ॥परि
माणमस्यास्तीति परिमाणी तद्वाचिना सुबन्तेन सह सामर्थ्यात्परिमाणवचनाः कालशब्दाः समस्यन्ते। तत्पुरुषश्च
समासो भवति षष्ठीसमासविषये योगारंभः मासो जातस्य॥ ॥

त्सर्वतो मानेन भवति तथापि परिच्छेदहेतुत्वात्परिमाणमित्युच्यते। मासो जातस्येति कस्य पुनरयं मासः परिच्छेदकः न जातकस्य तस्य हि द्रिष्या
दि परिमाणं न तु मासः नापि जननक्रियायाः तस्या एकक्षणभावित्वान्मासेन संबंधाभावात्। उच्यते जननक्रियावधिर्मासेन परिच्छिद्यते मासो जातस्ये
ति कोऽर्थः जननक्रियायाः ऊर्ध्वं मासो जातः अतीतो मासो यस्य जननमिति यावत् अनेन प्रकारेण मासो जातस्य परिमाणं यथा मासो देयं ऋणमि
ति क्षणावस्थावधिर्मासेन परिच्छिद्यते॥ ॥श्रीः॥ ॥छ छ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

का॰ प॰
३२

मासजात इति यथा गावोस्य संतीति गोमानिति गवां षष्ठी निर्दिष्टस्यापि तद्योगे तेनो प्राधान्यं तल्लक्ष्य हेतोः। अभिहितः षष्ठ्यर्थो तद्भूतः प्रातिपदिका
र्थः संपन्न इति यथा चित्रा गावोस्य चित्रगुः पुरुष इति बहुव्रीहावितित द्वन्द्वत्रापि वाक्ये षष्ठी निर्दिष्टस्यापि तद्धितो जातस्य ह तेनो प्राधान्यं द्रष्टव्यं तथा च मास
जातो द्वस्यामिति क्रियायोगो जातस्यैव भवति न पुनरहोपि अल्पाच्तरं पूर्वपदार्थस्य अहजात इति द्व्यह्नोः समाहारः। राजाहःसखिभ्यष्टच् इत्यनेनाव्य
विः समाहारात् तसङ्ख्यादेशस्य प्रतिषेधः। कथं तर्हि द्व्यहजात इति द्वे अहनी अस्य जातस्येति त्रिपदानां पदार्थानां त्रिपदेनैव समासे कृते जातशब्द उत्तरप
रतः पूर्वयोर्द्विगुर्भविष्यति। ननु च सुप्सुपेत्येकत्वसंख्याशाब्दी विव। इति तत्राह द्वयोर्द्वयोः समासेन च हन्तो पुनः पुनत् उच्यते कृष्णमेवैतत् उत्तरपदेन परिमाणि
ना द्वयोर्द्वयोः समासवचनमिति परिमाणि वचनेनोत्तरपदेन द्विगोः सिद्ध्ये समासो वक्तव्यः अथ द्विगोर्युगपत् त्रिभिः सामान्येनाव्यक्तवचना इह कृत्तद्धितपदं समासेन भ

मासजातः। संवत्सरजातः। द्व्यहजातः त्र्यहजातः॥ ३ ॥ ॥श्रीकृष्णायनमः॥

वति एवं द्वौ मासौ जातस्य द्विमासजातः त्रिपदे तत्पुरुषे जातशब्द उत्तरपदे परतः पूर्वयोस्तत्पुरुषे सति कालान्ते द्विगावपि पूर्वपदप्रकृतिस्वरो भवति
द्वयोर्मासयोः समाहारो द्विमासं पात्रादिः द्विमासं जातस्येति त्रिस्त्य समासे क्रियमाणे मतिशिष्टत्वात् मासान्तोदात्तत्वं स्यात्। द्व मासौ जातस्य मासजातस्ये
ति द्वित्वबहुवचनेनागाना समर्थं समासो भवतीत्यत्र विभक्तौ नित्यत्वाद्द्वित्वबहुत्वावगतौ प्रमाणाभावात्। अभेदैकत्वसंख्याप्यत्र न भवति श्रुत्वमे
वत्वेकत्वं गम्यते यत्र द्वयोर्बहुषु वा नुस्मृता एकः शब्दार्थः तत्रैवाभेदैकत्वसंख्या मासशब्दस्य तत्रपरिमाणमर्थमाचष्ट इति द्वित्वबहुत्वावगतौ विभ
क्तिमपेक्षते स्वतस्त्वेकत्वस्यैवावधारणात्॥ ३ ॥

प्रा॰स॰
३२

॥तेन॥ ॥वेमस्फिञ्जकार्यो विशेषाभावान्नञ्कर्षोच्चारणं सुपानशब्दस्य विशेषणमामाभूदिति लक्षणस्य तत्सामर्थ्ये सुबन्तेनाद्वेनाद्यत्रेष्टां सिद्धं इह ब्राह्मणादिशब्दैः क्षत्रियाद्यभिधानमिष्यते तत्र जातिमात्रपरो ब्राह्मणशब्देन विवक्षितो ब्राह्मणस्य सोऽब्राह्मणः क्षत्रियादिरित्यन्यपदार्थप्रधानः समासो भवति तत्र नाप्राप्ते बहुव्रीहावारंभात्तेनैनतत्समबाधनादब्राह्मणको देश इत्यादि न सिध्यति नहि प्रवृत्तिनिमित्तमात्रविशेषु ब्राह्मणादिशब्देषु समासो भवतु लिङ्गे शिष्टमिति निपा तक मातिरिह वाव षीहेमंत इति हेमंतस्य पश्चवनंत तस्मात्समग्रा प्रीतिर्लिङ्गे तु परवल्लिङ्गमिति वचनाद्दोषाभावः इह चैवं अन्यः असर्वस्मै इत्युत्तरपदार्थप्रधाने पदार्थे नञ्तिका सर्वादिकार्यं सर्वादिकार्यं च न स्यात् यदा लक्षणसामान्येन नञो नानन्ब्राह्मणादिभिर्विहितोऽभ्यते ब्राह्मणत्वेनाध्य नञ्क्रियां नञ्योगान्तु समतत्क्षत्रिया दिकोऽब्राह्मण इति तदा सर्वपदार्थप्रधानत्वेन नञर्थस्य प्राधान्यात्तं व्यापेय समासस्य चनस्वत्त्वान्निकी तु परवल्लिङ्गतामवत्तु स्यादेतेन शब्द अक्रियाभा व्यारसत्वस्य समर्थं वा केनञा चष्टे समासे तु सत्त्वरूपं तेनसिद्धः संख्यायोगः एवमप्ययवादे नानेनाव्ययीभावस्य बाधा दब्राह्मणिकमिति न सिध्यतीति

॥नञ्॥ ॥नञ् समर्थेन सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति। अब्राह्मणः। अ

वृषलः। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्मः॥ ४ ॥ ॥श्रीः॥ ॥

स्यात्तु निर्भीत्यिकमिस्यादिवकाशः असः असर्वस्मा इति चास्य विस्माद्याद्यसिद्धिः अस्तु तर्हि उत्तरपदार्थप्रधानः यद्येवमब्राह्मणमानयेत्युक्ते ब्राह्मणमा त्रस्यानयनं प्राप्नोति। उत्तरपदार्थप्रधानत्वात्तत्र हेतुः इहापि तर्हि राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति अस्त्यत्र विशेषः राजा विशेषकः प्र युज्यते इहापि तर्हि नञ् विशेषकः प्रयुज्यते कथं नञ् नाम विशेषकः स्यात् अनिषत्तगुणस्य गुणा विशेषमणि पादनाय हि विशेषणं प्रवर्तते न तदु पत्तानी यत्नञा चाब्राह्मणार्थः प्रतिषिध्यमानः सर्वात्मना प्रतिषिध्यत इति कथमसतः प्राधान्यं स्यात्तस्मादुत्तरपदार्थप्राधान्यमिच्छता सिद्धिविषये न ञनर्थकोऽन्यस्यानसामर्थ्यात्तु सा धुत्वमेवं भूतस्यार्थवत्त्वनर्थकाव यवस्य समासस्येति वाच्यं तेनस्वब्राह्मणमात्रस्यानयनं प्राप्नोतीनेष दोषः निरुत्तप दार्थकोत्र ब्राह्मणशब्दः सा वर्त्तते वृत्तिः स्वाभाविकी तज्जाद्योसते कोर्थः केवलो ब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्यमेव ब्राह्मणमाचष्टे नञ्प्र योगे त्वत्र क्षत्रियादौ सादृश्यादिना निमित्तेनाध्यारोपितं ब्राह्मण्यं न तात्त्विकमिति द्योत्यते तेन वेवं मुख्यो ब्राह्मणशब्दार्थो निवृत्तः जातश्चामुख्यः क्ष त्रियादिरिति न ब्राह्मणमात्रानयनेनापि न कस्य चिदानयनमिति सिद्धं॥ ॥

का॰ प॰ ३३

पुत्रांश्च प्राक् समासात् स्वार्थानां सिद्धा । तिर्यसितेनात्रा लमावृत्तो निवृत्तानां रूपभेदाद् लक्षितेति स्यादेतत् अर्थप्रत्यापनाय शब्दः प्रयुज्यते ब्राह्मणार्थ
श्चेन्निहन्तः किमुधा ब्राह्मणपदं प्रयुज्यते तत्रस्य समि ब्राह्मणपदेनैते तावत्तु अभ्यानेकस्यार्थे निवर्त्तयितुमिष्ट इति न्न्यायेन ब्राह्मणपदे तु सतित
दर्थस्य क्षत्रियादेर्मुख्यः सन्नाभिहः प्रतीयते अन्यदर्शनं सर्व एते शब्दगुणसमुदायेव वर्त्तन्ते समर्पितेव तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारणं । तपः
श्रुताभ्यां यो हीनो जातिब्राह्मण एव स इति । तथा च स्मृतिः पञ्चाधयोर्धपुरुषं तपंति जे क्रोहाद्यस्त्रोदरोरौ तमस्यात मध्यधर्मः ॥ शिशिरीतिः सञ्ज्ञा ब्राह्म
णत्वं सारार्थीगृहत्वसंनिति गोः शुच्याचारः पिंगलकेशः उत्साद यश्च धर्मात्त देषां समुदाये ब्राह्मणशब्दः एवं क्षत्रियादिशब्देष्वपि द्रष्टव्यं एवं स्थिते समु
दायेषु वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति व्यापकत्वातिभिन्नेषु गुणाभिन्नेवा यदा ब्राह्मणशब्देष्वर्तते तदा स्वाभाविकी जातिगुणानिवृत्तिर्नत्रायो
प्यते अवशिष्टांशसद्भावप्रतिपादनाय ब्राह्मणशब्दप्रयोगः प्राप्नोत्येवं द्वयोरपि भिन्नविषयत्वप्रसंगः कथं तस्यांशसद्भावं ब्राह्मणशब्द आह न
तस्या भावं नञाह यस्याभावं नञाह न तस्य सद्भावं ब्राह्मणशब्द आह नैष दोषः द्वावप्येतौ समुदायावलंबिनौ कृतवततर्थैकदेशकारणाक
रणाभ्यामेकमेव वस्तु कृतं चाकृतं च भवतीति यथा ह्यप्येकदेशविभागात् समुदाय एव निवृत्त उच्यते एकदेशसद्भावाच्च स एव सन्नभिधीयत इति स
र्वमनवद्यं । इहानेकोऽजनः आगत इति घटादिषेकत्वमारोपितं प्रतीयते सु प्रतिषिध्यते क्षत्रियादावेव ब्राह्मणत्वमिति एकवचनमेव भवति घटादिम
त्वाप्रतीयते तदेवमुत्तरपदार्थप्रधान इति स्थितं । अत्र च लिंगं एतत्तदोः सुलोपो कोरनञि समासग्रहणं अन्यथा तत्तदोरर्थद्वारेण
संबंधिनः सोर्लोपो विधीयमानो नैषोददाति सत्र कथं प्राप्नुयात् । इह न ब्राह्मणस्य भाव इति भावेन नञा च युगपत्संबंधे विवक्षिते त्व
तलौ च प्राप्नुतः समासश्च तत्र परत्वात्तलौ कृत्वा पश्चात्पुनः प्रसंगविज्ञानान्नञ्समासः क्रियते तत्र तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृति
स्वरेण आद्युदात्तं पदं स्यात् प्रत्ययस्वरो लित्स्वरश्च बाध्यत इति समासे कृते त्वतलौ कार्यौ आह च त्वतलम्भ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसि
द्ध्यर्थमिति तत्र भावप्रत्ययस्तावत् प्रकृत्यर्थस्य सोपेक्षत्वेन सामर्थ्याभावान्न भवति नञ्समासस्तु प्रधानस्य सापेक्षत्वाद्भवति ॥ ४ ॥ ॥छ॥ ॥

पा॰म॰ ३३

॥ईषत॥ ॥ईषद्गुणवचनेनेति वक्तव्यमिति। अकृतेत्सपनीयस्त्रे गुणवचनग्रहणं कर्तव्यमित्यर्थः अकृतेति चोच्यमाने ईषद्गार्ग्य इत्यादावतिव्याप्ति
रीषदुन्नत इत्यादावव्याप्तिः स्यादिति भावः ईषद्गार्ग्य इति। ननु च गार्ग्यो भवति वा न वा न पुनरीषद्गार्ग्यः कश्चित्। उच्यते गार्ग्यत्वेन सह यस्यैकार्थसमवेताः
क्रियागुणाः तद्वदेवापत्यजातेः प्रकर्षादियोगः गार्ग्यतरो गार्ग्यकल्प ईषद्गार्ग्यो गार्ग्यपाश इति यथा गोतरो गोकल्पो गोपाश इति॥ ॥षष्ठी॥ ॥कृद्यो

॥ईषदकृता॥ ॥ईषदित्ययं शब्दोऽकृदन्तेन सुपा सह समस्यते तत्पुरुषश्च समासो भवति। ईषद्गुणवचनेनेति वक्तव्यं।
ईषत्कडारः ईषत्पिंगलः ईषद्विकटः ईषदुन्नतः ईषत्पीतं। ईषद्रक्तं। गुणवचनेनेति किं। इह न भवति। ईषद्गार्ग्यः॥ ॥
षष्ठी। षष्ठ्यंतं सुबंतं समर्थेन सुबंतेन सह समस्यते तत्पुरुषश्च समासो भवति। राज्ञः पुरुषो राजपुरुषः। ब्राह्मण
कंबलः। कृद्योगा च षष्ठी समस्यत इति वक्तव्यं। इध्मव्रश्चनः। पलाशशातनः। किमर्थमिदमुच्यते। प्रतिपदविधा
ना षष्ठी न समस्यत इति वक्ष्यति। तस्यायं पुरस्तादपकर्षः॥ ॥याजकादिभिश्च॥ ॥पूरणगुणसुहितार्थसदव्ययत
व्यसमानाधिकरणेनेति प्रतिषेधे प्राप्ते वचनमिदं प्रतिप्रसवार्थं। याजकादिभिः सह षष्ठी समस्यते तत्पुरुषश्च समासो भव
ति। ब्राह्मणयाजकः। क्षत्रिययाजकः। याजक। पूजक। परिचारक। परिषेचक। स्नापक। अध्यापक। उत्सादक। उ
द्वर्तक। होतृ। पोतृ। भर्तृ। रथगणक। पत्तिगणक॥ ॥

गा चेत्यादि कर्तृकर्मणोः कृतीति कृद्योगा षष्ठी तेन या विहिता सा कृद्योगा इध्मप्रव्रश्चन इति ओव्रश्चू छेदने करणे ल्युट्। पलाशशातन इति पलाशा
नि शात्यन्ते पात्यन्ते येन दण्डादिना स पलाशशातनः किमर्थमिदमुच्यत इति सूत्रेणैव सिद्धिमभिप्रेत्य प्रश्नः। प्रतिपदविधाना चेत्यादिना तस्य वक्ष्य
माणस्यारम्भः तदेदमपि वक्तव्यं तस्य तत्र नास्पन्दं तत्रैव वक्ष्यामः। अपकर्ष इति। अपवाद इत्यर्थः॥ ॥याजक॥ ॥प्रतिप्रसवार्थमिति। अन्येन नि

का॰ प॰ २॰ तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यमिति क्वचिद्वृत्तौ पठ्यते तस्यार्थः तच्छब्देन संनिधानाद्गुणा एव परामृश्यन्ते तस्मिन्स्वात्मनि ये गुणाः स्थितास्तैः षष्ठी स
३४ मस्यते न च स्वात्मन्यवस्थानं कस्यचित्संभवतीति भेदनिबंधनो ह्याधाराधेयभावः विशेषतो गुणानां द्रव्याश्रितत्वात् तस्मादभिधानव्यापारापेक्षया तत्स्थत्व
मुच्यते गंधादयो हि गुणाः स्वशब्दैर्द्रव्यात्पृथक्कृता एव प्रतीयन्ते चंदनस्य गंध इति न तु कदाचिद्द्रव्यैकत्वमापद्यन्ते नहि भवति चंदनं गंध इति शुक्लादयस्तु
कदाचिद्द्रव्यात्पृथग्भूताः प्रतीयन्ते पटस्य शुक्ल इति कदाचिद्द्रव्योपरंजकास्तेनैकत्वमापन्नाः शुक्लः पट इति तत्र ये गुणा द्रव्यात्पृथग्भूता एव स्वश
ब्देन प्रत्याय्यन्ते तत्परिग्रहाय तत्स्थैरित्युक्तं बलाकायाः शौक्ल्यमित्यत्र तु यद्यपि शौक्ल्यशब्देन द्रव्यात्पृथग्भूतस्यैवाभिधानं तथापि तद्विशेषो लोके शुक्लः प
ट इत्यत्र द्रव्यैकतामापन्नः प्रत्याय्यते अथ एतत्तत्स्थत्वमाश्रीयत इति शब्दभेदेऽप्यर्थः स एवेति नास्ति शौक्ल्यस्य तत्स्थत्वमिति समासाभावः तत्र वा सदस

तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यं । चंदनगंधः । कपित्थरसः । गुणात्तरेण तरलोपश्चेति वक्तव्यं । सर्वेषां श्वे
ततरः सर्वश्वेतः । सर्वेषां महत्तरः सर्वमहान् । न निर्धारणे इति प्रतिषेधे प्राप्ते वचनमिदं । सर्वमुक्तागोः । ५ ॥

त्र भेदाश्रये शौक्ल्यमत्वर्थीयेनाभेदाध्यवसायेनेति तत्स्थमेव रूपमिति पटरूपमिति भवत्येव समासः अयमपि गुणेन नेति प्रतिषेधस्य पुरस्ताद
पकर्षः चंदनगंध इति गंधं विक्रीणीत इति चंदनगंधादौ गंधशब्दे जातिनिमित्तको न गुणशब्दो मालतीकुसुमादिष्वदर्शनादिति न तत्स्थ एव गंधः राम ४
भाष्ये तु न तु तद्विशेषणैरिति पठितं तेषां गुणानां यानि विशेषणानि तैः सह समासो न भवति घृतस्य तीव्रो गंधश्चंदनस्य मृदुः स्पर्श इति तीव्रम ३४
दुशब्दाभ्यां समासो न भवति तदिदमनर्थकमसिद्धमिति हल्लिकारेणोपेक्षितं कथं घृतस्य गंधेन संबंधो न तद्विशेषणेन तीव्रेणापि यदापि प्रकरणादिव
शात्तीव्रशब्दः एवंविशिष्टे गंधे वर्तते तदुपजनिते एव व्यतिरेकेऽपि घृतस्येति षष्ठी तथापि तीव्रं घृतमिति दर्शनात्तत्स्थत्वाभावादेव समासाप्रसंगः ॥

॥ ॥ ५ ॥ ॥

।।।न निर्द्धारणे।। ।।जातिगुणक्रियाभिरित्युपलक्षणमेतत् कतरो भवतोर्देवदत्त इति संज्ञायामपि निर्द्धारणदर्शनात्· क्षत्रियो मनुष्याणां शूरत
मः इति।। अत्र क्षत्रियशब्देन समासप्रसंगः तद्यपेक्षा हि मनुष्याणामिति षष्ठी न शूरतमापेक्षा गुणशब्दत्वाच्च न तेन समासप्रसंगः कृष्णा गवामिति नात्रापुम
र्थः गवां मध्ये या कृष्णा सा संपन्नक्षीरतमेति एवं हि कृष्णाशब्दस्य गवामित्यनेन संबंधः न च तस्य समासप्रसंगः गुणेन नेति प्रतिषेधात् तस्माद्गवां मध्ये
या संपन्नक्षीरतमा सा कृष्णेत्ययमत्रार्थः धावन्नध्वगानामिति। अत्र धावच्छब्देन समासाप्रसंगः सत् तेजस्कत्वात् शीघ्रतमशब्दस्तु गुणशब्दो न वेति विं
णां प्रतिपदविधाना चेति शेषलक्षणं मुक्त्वा सर्वान्या प्रतिपदविधाना षष्ठी कथं इह स्वामीविधाक्षपाठः पृथिव्या ईश्वर इति पावनास्वामी अश्वेत्या इति ना
प्रतिपदमत्र षष्ठी नानेन षष्ठी विधीयते किं तर्हि सप्तमी सा तु षष्ठ्या बाधिष्टेति विकारेण शेषलक्षणा वाप्यनुज्ञायते अत एव न निर्द्धारण इति सूत्रांभः

।।न निर्द्धारणे।। ।।पूर्वेण समासे प्राप्ते प्रतिषेध आरभ्यते। निर्द्धारणे या षष्ठी सा न समस्यते जातिगुण
क्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं। क्षत्रियो मनुष्याणां शूरतमः। कृष्णा गवां संपन्न
क्षीरतमा। धावन्नध्वगानां शीघ्रतमः। प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यं। सर्पिषो ज्ञानं।
मधुनो ज्ञानं।। ।।१०।। ।।

यत्कथं निर्द्धारणमित्यत्राधिहिच कारेण शेषलक्षणैव षष्ठी प्रतिप्रसूयते अन्यथा सापि प्रतिपदविधानैव स्यादिति किं न निर्द्धारण इत्येतेन
सर्पिषो ज्ञानमिति ज्ञोऽविदर्थस्य करण इति षष्ठी अत्राज्ञः ज्ञो विदर्थस्य करण इति षष्ठीप्रकरणे शेष इति वर्त्तते तत्र नमायाणाम शक्तीयादिति
वत्न षष्ठी शेष इत्यनेनेव सिद्धा षष्ठीप्रकरणे तु नियमार्थं षष्ठी भवत्येव अप्राप्त एव न तस्याः समासो भवतीत्यर्थः समासे तु सुपोक्षात्तु प्रा
तिपदिक पोषिति सुब्लुक् स्यात् तस्मात्प्रतिपदविधाना चेति न वक्तव्यं एवं च कृत्वा कृद्योगा चेत्यपि न वक्तव्यं कर्तृकर्मणोः कृतीत्यत्र
हि शेष इति निवृत्तमिति वक्ष्यते तेन कर्तृकर्मविवक्षायामप्राप्तेव षष्ठी तेन विधीयत इति कुतः समासनिवृत्तिरिति।। ।। ।।

॥पूरणगुण॥ ॥प्रत्येकमिति पूरणादिभिः षष्ठीमित्यर्थः स्वरूपविधिरिति पूरणादीनामर्थपर्यन्तानां चतुर्णामित्यर्थः। अत एव गुणशब्देन न तदर्थस्य ग्रहणं कंटकस्य तैक्ष्ण्यमित्यादेः संग्रहणं किं तर्हि सत्त्वे निविशते ऽपैति त्यादिलक्षणलक्षितस्य गुणस्य ग्रहणं। नापि तज्ज्ञो गुणप्रतिषेधे ऽस्य गुणस्य हि भावा दिति वल्महन्ति निमित्तमात्रस्य ग्रहणं सामान्यादेरपि प्रसंगात्। नापि लोकप्रसिद्धस्य शुक्लादेरेवेष्टत्वात्। गुणशब्देन च केवलगुणवाचिनो गुणोपसर्जन द्रव्यवाचिनश्च ग्रहणमिति न्यायाश्रयेण गृह्यते तेन गुणस्य गुणोपसर्जनस्य च केवलगुणवचनैर्गुणिनः समासनिषेधः कंटकस्य तैक्ष्ण्यमिति गुणिवचनेन तु तत्संबंधिनो निषेधः ब्राह्मणस्य शुक्ला दंता इति। न चात्र दंतापेक्षया ब्राह्मणस्येति षष्ठी तत्र शुक्लेनासंबंधाद् अप्रसंग एव समासस्य यदा तु स्वी र्थात्मकगुणाद्दंताद्यर्थ एव शुक्लादिशब्दस्य ह्यन्विर्विज्ञातो भवतीति तदा तत्संबंध एव षष्ठीत्यस्ति समासप्रसंगः शतसहस्रांताच्च निष्कान्त कोश

॥पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। पूरण सुहितार्थ सत् अव्यय तव्य समानाधिकरण इत्येतैः सह षष्ठी न समस्यते। अर्थशब्दः प्रत्येकमभिसंबध्यते तेन स्वरूपविधिर्न भवति। पूरण। छात्राणां पंचमः। छात्राणां दशमः। गुण। बलाकायाः शौक्ल्यं। काकस्य कार्ष्ण्यं। सुहितार्थाः तृप्त्यर्थाः। फलानां तृप्तः। सत्। ब्राह्मणस्य कुर्वन्। ब्राह्मणस्य कुर्वाणः॥ ६ ॥

शतयोजनं शतयोरसंख्यानं चत्वारिंशत्तमपि न दद्यादित्यादिषु नित्यप्रयोगात्तयोर्विंशतिरित्यादौ संख्यया समासो न निषिध्यते संज्ञाप्रमाणत्वा दुत्तरपदार्थप्राधान्यमित्यादिप्रयोगदर्शनाद्वा नित्यो गुणेन निषेध इति करणपाटवं बुद्धिमांद्यं पत्नीगौरवमित्यादि सिद्धः। फलानां सुहित इ ति करणस्यैव शेषत्वविवक्षया षष्ठी शेषत्वविवक्षैव चानियता सुहितार्थयोगे करणस्येत्याहुः। कृद्योगलक्षणाया एव षष्ठ्या निषेधा योगे निषे धः। ब्राह्मणस्य कुर्वन्निति नेयं द्वितीयापेक्षया षष्ठी ब्राह्मणस्य द्वन्द्वं कुर्वन्तीति एवं त्व सामर्थ्याद् एव समासस्याप्रसंगः। किं तर्हि कुर्वन्तीति किं करं अपेक्षते सा हि कुर्वन् भवतीति तेनोक्तं यथा ब्राह्मणस्य पाचक इति स्थाने देव पाचकेन संबंधो न पुनरोदनद्वारेणात इहापीति द्रष्टव्यं। चो रस्य द्विषन्निति च सत उदाहरणं। अत्र द्विषः शतुर्वा वचनमिति पक्षे षष्ठी भवति॥ ६ ॥ ॥ ७ ॥ ॥ ८ ॥ ॥ ९ ॥ ॥

ब्राह्मणस्य कृत्वेति। ब्राह्मणार्थं कृत्वेत्यर्थः संबंधसामान्यरूपेण विवक्षितत्वात्षष्ठी। ग्रामस्य ये सोदेनोरिति चोदाहरणं अत्र सम्बन्धप्रतिषेधे
तोसुन्कसुनोः प्रतिषेध इति कर्तव्येविषये पाणिनिरेवं दृष्टः सोपरीत्यादिकमप्युदाहरणं। तव्यता सानुबंधकेनेति निरनुबंधकग्रहणे न सानुबंधकस्य
ग्रहणमिति भावः। ब्राह्मणकर्तव्यमिति। कर्तरि षष्ठी। समासः कृदुत्तरपदप्रकृतिस्वरेणांतस्वरित एव न। निरनुबंधकेन तु समासे उत्तरपदस्याद्यु
दात्तं स्यात् सोयं स्वरार्थस्तव्येन निषेधः। मुकस्य माराविकस्येति माराविद्व्याहेति माराविकः तदाहेति माशब्दादिभ्य उपसंख्यानमिति ठक् शाह
न क्रियायाः प्रतिषेधको माराविकः इत्येषा मुकविशेषणं। कश्चित्तु माराविदस्येति पाठः तत्र मारां विशब्दं वदतीति माराविदः स एवार्थः किंच

॥ अन्यथा ब्राह्मणस्य कृत्वा॥ ॥ ब्राह्मणस्य तव्या॥ तव्या ब्राह्मणस्य कर्तव्यं तव्यता सानुबंधकेन समासो भ
वत्येव ब्राह्मणकर्तव्यं समानाधिकरणे मुकस्य माराविदस्य। एतत् पाटलिपुत्रकस्य पाणिनेः सूत्रका
रस्य किं वस्यात्। पूर्वनिपातस्यानियमः स्यात्। अनंतरयोरनुप्राप्तो प्रतिषिद्धायां विशेषणे विशेष्येणे
ति भवत्येव समासः। पूर्वनिपातश्च तदानियोगतो विशेषणस्यैव॥ ॥छ॥ ॥छ॥ ॥ ॥

स्यादिति भवितव्यमेवात्र विशेषणसमासेन तत्षष्ठीसमास एवास्तु को दोष इति प्रश्नः। पूर्वनिपातानियमः स्यादिति द्वयोरपि प्रथमानिर्दिष्टत्वे
नोपसर्जनत्वादिति भावः। ननु विशेषणसमासेपि द्वयोरपि प्रथमाविशेषणविशेष्यभावस्तत्र सुक्रमतस्तेनापि समासे विशेषणमिति प्रथ
मानिर्दिष्टयोर्द्वयोरपि तुल्यः अथ तत्र प्राधान्यमुपसर्जनमार्थं च प्राधान्यमिति द्रव्यगुणादिषु क्तेन प्रकारेण व्यवस्था षष्ठीसमासेपि तथै
व व्यवस्था भविष्यतीत्याशंक्याह तत्र प्रत्युदाहरणं तक्षकः सर्प इति तयोः षष्ठ्यंतयोः समासप्रसंग एव दोषः तन्निवृत्त्यर्थं च प्रतिषेध इ
ति वाच्यं न तदिह किं च स्यात् तत्र हि दिक्रमेवानुपपन्नं उदाहरणं तूपपन्नं पश्चिमराविक इत्युक्तः संज्ञा अथ सोपि पाव योग वृत्तिः नहि तदप्य
नुपपन्नः एवं पाटलिपुत्रकेपि द्रष्टव्यं॥ ॥

का·पद·
३६

।।क्तेन च।। ।।तस्येति मस्याद्दिस्तत्र विहितस्य सर्वस्यैव क्तस्य ग्रहणं न तु पूजायामेव विहितस्येत्यर्थः कथं तर्हि पूजाग्रहणमित्याह पूजाग्रहणमिति जिव
हितस्य क्तस्य तदर्थमुपलक्षणं पूजाग्रहणं ग्रहस्यैव का को न तु समासनिषेधांग।।मित्यर्थः तेन मतिबुद्ध्योरपि विहितस्य ग्रहणं भवतीति भावः।।पूजा
यां विहित इति। वर्त्तमाना इति शेषः। राज्ञामिति· क्तस्य च वर्त्तमाने इति षष्ठी। कथं राजसंमतः। राजाभिमत इति अस्ति हि तर्हि काव्ये प्रयोगः कलहं
सरामसहितः कृतवानेति महत्पूजायां रामस्य माहितश्रयर्थः कश्चिदाह यदा वर्त्तमाने क्तः तदा षष्ठी। समासनिषेधश्च। यदा भूते क्तस्तदा
कर्त्तरि तृतीयैव भवति यथा पूजितो यः सुरैरपीति तस्याः कर्तृकरणे कृता बहुलमिति समास इति स्यादेवं यदि भूते क्तो लभ्येत नाप्रसेन

।।क्तेन च पूजायां।। मतिबुद्धिपूजार्थेभ्यश्चेति वक्ष्यति तस्येदं ग्रहणं। पूजाग्रहणमुपलक्षणार्थं। क्तो यः
पूजायां विहितस्तेन षष्ठी न समस्यते। राज्ञां मतः। राज्ञां पूजितः। पूजायामिति किं। छात्रस्य हसितं छा
त्रहसितं।। ।।७।। ।।४।।

मित्यारभ्यमाणो मतिबुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तस्तस्य वाचको भवति यथा च वडवाया वृषे वाच्य इति अपवादस्याः सोऽक्तनोपक्
ष्यविधीयते अपवादेन त्व गौण भवतीति वक्ष्यति एवं च पूजितो यः सुरैरपि स्यादिति किं स्यो पशाहः तथा ज्ञातो यथा ज्ञान इति तु भवत्येव तेने स्वधिकारे
उपज्ञात इति निर्देशात्। अपर आह क्तेन च पूजायामित्यादिषु कारकषष्ठ्या एव निषेधः तदेव तु कर्त्तरि कारणं यदा शेषत्वेन विवक्ष्य
ते तदा भवत्येव समास इति तत्र स्वरे विशेषः कारकषष्ठ्याः समासे कृत्स्वरो भवति शेषषष्ठ्याः समासे समासान्तोदात्तत्वमिति। एवं तु यज्ञ
निकर्तुः प्रकृतिस्तत्प्रयोजको हेतुश्चेत्यादावुक्तं तेन निपातनात्समास इति तत् तु मय त्वं शेषषष्ठ्या एव समासस्य सिद्धत्वात् तथापेमानवी
नावैयाकरणमारभंते तदाधिकमापद्येत तस्मादाम प्रयोगस्य यथा कथंचित्निर्वाहो न तु पथा रुचि प्रयोग इति धीमामान्यंते।। ७ ।। रामा०
३६

॥ अधिकरण ॥ ॥ अधिकरणग्रहणस्यैव सिद्धेऽकाचिग्रहणं किंप्रयोजनं कथं किं हन्ते लिप्सायां पदं त्वा निम्समितिनाथमधिकरणेऽकः कृत्तर्हि भावे कि
मोदनं यस्मिन् घटो वर्त्तते यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः ॥ ॥ कर्मणि ॥ ॥ उभयप्राप्तौ कर्मणीति । अनेकार्थत्वान्निपातानामितीत्यर्थे
नशब्दो यं तेन कर्मणी सुखार्थ या षष्ठी विधीयते सा न समस्यत इत्यर्थः यद्विया कात्र न कर्मणि षष्ठी गृह्येत कर्त्तरि चेति प्रतिषेधं न कुर्यात् अने
न गमिद्धत्वात् साधुपयसः पानमिति । कर्मणि च येन संस्पर्शादिति नित्यसमासार्थं वचनमिति वक्ष्यति तत्र चयः पानं सुखमित्युदाहरिष्यते
इदं तु शरीरसुखस्याविवक्षायामेतेनाघभिमन्तोः शङ्कुवन्नेव पदस्य साधुरिति तत्र दाहृतं ॥ ॥ तृजकाभ्यां ॥ ॥ कर्तृग्रहणं षष्ठीविशेषणमिति ।

॥ अधिकरणवाचिना च ॥ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य इति वक्ष्यति तत्सेदं ग्रहणं ॥ अधिकरणवा
चिना क्तेन षष्ठी न समस्यते । इदमेषां यातं । इदमेषां भुक्तं ॥ ॥ कर्मणि च ॥ क्तेनेति निवृत्तं । कर्मग्रहणं षष्ठी
विशेषणं कर्मणि च या षष्ठी सा न समस्यते उभयप्राप्तौ कर्मणीति षष्ठ्या इदं ग्रहणं । आश्चर्यो गवां दोहो
ऽगोपालकेन । रोचते मे ओदनस्य भोजनं देवदत्तेन साधु खलु पयसः पानं देवदत्तेन । विचित्रा सूत्रस्य कृ
तिः पाणिनिना ॥ ॥ तृजकाभ्यां कर्त्तरि । कर्तृग्रहणं षष्ठीविशेषणं । कर्त्तरि या षष्ठी सा तृचा अकेन च न समस्य
स्यते भवतः शायिका । भवत आसिका । भवतो ऽग्रगामिका । तृचः कर्त्तरि च विधीयते तत्प्रयोगे षष्ठी नो
अथ कस्मात् द्वितीया नाश्रीयते इह तृजक विशेषणं कर्तृग्रह स्ति । तस्मात् तृज्ग्रहणमुत्तरार्थं । कर्त्तरीति किं । इक्षु
णामुत्तरत्र षष्ठी विशेषणमिति एवं तृज्ग्रहणमुत्तरार्थमिति न वक्तव्यं भवति उच्यते नित्यं क्रीडाजीविकयोरित्यत्र तृज्ग्रहणमनु
वृत्तिः ज्ञाप्यते न कर्त्तरि षष्ठ्यैव संभवात् न हि तत्र प्रयोगे कर्त्तरि षष्ठी संभवतीति । ननु च तत्र क्रीडाजीविकयोर्नास्ति संकरणो दाह
पुत इति वक्ष्यति । एवं तर्हि तथा नाश्रितमित्येवं भवतः शायिकेति प्रत्युदाहरणीय स्त्रिषु एतच । तृचप्रयोगे कर्तृषष्ठी नास्तीति तेनैव क
र्तुरभिहितत्वात् । इक्षुभक्षिकामिति । कर्मणि षष्ठ्याः समासः । मइति धारेरुत्तमर्ण इति संप्रदाने चतुर्थी ॥ ॥

॥कर्त्तरिच॥ ॥संबंधेव्यभिचारो वसतिविशेषणविशेष्यभावो भवतीत्याह सामर्थ्यादिति। संबंधिशब्दस्येति। अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति भावः। अन्यस्त्वाह होतृशब्दसाहचर्यादिति तन्न नहि तत्र बह्वृचो होता गृह्यते सएव च संबंधिशब्दः क्षीरहोतेत्यादौ क्षीरस्य सेमे स्त्येवगम्यते॥ ॥नित्यं क्रीडा॥ ॥नेति निवृत्तमिति। नित्यग्रहणात्। महाविभाषाधिकारात् विकल्पे नैव वाक्यिकस्य प्रतिषेधस्य सिद्धत्वान्नित्यः प्रतिषेधो भविष्यति किं नित्यग्रहणेन तत्र क्रीडाजीविकयोर्नास्ति। तिवाप्यनस्त्वके जीविकार्थ इत्यत्राक इति किं रमणीयकर्त्रेति जीविकायां तृ

॥कर्त्तरिच॥ ॥कर्त्तरिचयौ तृजकौ ताभ्यां सह षष्ठी न समस्यते। सामर्थ्यादकस्य विशेषणार्थं कर्तृग्रहणमितरत्राव्यभिचारभावात्। अपां स्रष्टा पुरां भेत्ता। वज्रस्य भर्त्ता। ननु च भर्तृशब्दो ह्ययं याजकादिषु पठ्यते। संबंधिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम्। अकः खल्वपि। ओदनस्य भोजकः। सक्तूनां पायकः॥ ॥नित्यं क्रीडाजीविकयोः॥ नेति निवृत्तं तृजकौ। नित्यं समासो विधीयते। क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते तत्पुरुषश्च समासो भवति तृच क्रीडाजीविकयोर्नास्ति। अक एवोदाह्रियते। उद्दालकपुष्पभंजिका। वरणापुष्पप्रचायिका। जीविकायां। दंतलेखकः। नखलेखकः। क्रीडाजीविकयोरिति किं। ओदनस्य भोज

कं प्रत्युदाहरिष्यति समस्यते माभूत् क्रीडायां तृच लक्षणाभावात् जीविकार्णं तु ण्वुल् त्वाविति ण्वुलिवत् च कस्मान्न स्यादिति। अन्ये तु तदनुसारेणेदमप्येवं व्याचक्षते क्रीडाजीविकयोर्नास्ति। तिद्वयोर्नास्ति किं तत्स्थल स्त्रैवे सर्थः। अकस्योदाह्रियते इति। उभयत्रेत्सर्थः। उद्दालकपुष्पभंजिकेत्यादौ संज्ञायामिति ण्वुल्। नित्यग्रहणमुत्तरार्थं नहि वाक्येन क्रीडाजीविकयोरवगतिः। स्तिक्रियाकारकसंबंधमात्रावगमात्॥ ८ ॥ ॥

॥कुगति॥ ॥कुशब्दोऽत्र पापार्थे गृह्यत इति। स्वरादिषु पठितोऽव्ययं विज्ञेय इति भावः नित्यसमासविषयस्यास्य पूर्वपदप्रकृतिस्वरार्थमयमर्थं
यथावस्तितिश्चाव्ययेन ज्ञकुनिपातानामितिव क्तव्यमिति। न द्रव्यवचन इति। पृथिव्यादिद्रव्येषो वर्त्तते स न गृह्यत इत्यर्थः। दुर्निंदायामि
ति। प्रशस्ते ह्येषा लिंगा भवति पापं तु वस्तु स्थि सागर्हितमिति द्वयोरप्युपादानं। प्रादिकमिति अस्यार्थे यदार्थे चिनिकोः कादेशा विधान

॥कुगतिप्रादयः॥ नित्यमिति वर्त्तते। कुशब्दोऽव्ययं गत्यादिसाहचर्यात्। न द्रव्यवचनः। कु
गतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते तत्पुरुषश्च समासो भवति। कुः पापार्थे। कुपु
रुषः। गतिः। ऊरीकृतं। यदूरीकरोति। प्रादयः। दुर्निंदायां। दुष्पुरुषः। स्वती पूजायां। सुपुरुषः। अ
तिपुरुषः। आङीषदर्थे। आपिंगलः। प्रायिकं चैतदुपाधिवचनमन्यत्रापि हि समासो दृश्यते। कोष्णं।
कदुष्णं दुष्कृतं। सुकृतं॥ ॥छ॥ ॥

मनुपपन्नं स्यात्। दुःकृतमिति दुर् निंदायामिति विषयनिर्देशो गतित्वेन प्राप्तस्यापि समासस्य नियामकः स्यादिति मन्यते यदा तु प्रादिग्र
हणात् प्राप्तस्यैव नियामकस्तदा गतिलक्षणे वात्र सिद्धः समासः दुर् अत्र कृच्छ्रार्थे अनभिधानात् कृतेति लक्षणं भवति दुः करणं इत्यादावुपपदसमासः। आ
मन्द्रैरिन्द्र हरिभिरित्याङोऽपि मन्त्रस्य गतित्वात् ईषदर्थत्वाच्च समासाभावः अस्येकस्वर्यं न भवति सुष्टुतमिति सुशब्दोऽतिशयेन पूजायां अतए
वोपसर्गानिर्बंधनं वक्तं॥ ॥छ॥ ॥

अतिस्तुतमिति। अतिरतिक्रमणे चेति कर्मप्रवचनीयत्वात्षत्वाभावः प्रादियोगात्ताद्यर्थ इति। वृत्ति विषयेगतपर्यायवृत्तयः प्रादयोगतित्वाभावेपि प्रादिग्रहणेन समस्यन्त इति पर्यध्ययन इति। परिग्लानो ऽध्ययनार्थमित्यर्थः। वृत्तमीर्ष्वेति। वसेर्णिच्चेत्यनुप्रत्ययांतो वासः उद्वृत्तः वस्त्रशब्दः पूर्वपदांतः ह्रस्वपिति साधु हानौ। प्रादिप्रसंग इति। सूत्रे प्रादिग्रहणमगतस्थमिति कर्मप्रवचनीयानां प्रतिषेधश्च अनेन प्रसादिविषयश्चायं निषेधः

अतिस्तुतं। आबद्धमिति। प्रादयो गताद्यर्थे प्रथमया। प्रगतः आचार्यः प्राचार्यः प्रांतेवासी। अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिक्रांतः खट्वामतिखट्वः। अतिमालः अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया। अवकोकिलः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानो ऽध्ययनाय पर्यध्ययनः। अलंकुमार्यै। अलंकुमारिः। निरादयः क्रान्ताद्यर्थे पंचम्या निःक्रांतः कौशाम्ब्याः निष्कौशाम्बिः। निर्वाराणसिः। इवेन विभक्तिलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं। वासमी इव। प्रादिप्रसंगे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः। वृक्षं प्रति विद्योतते विद्युत्। साधुर्देवदत्तो मातरं प्रति॥ ॥उपपदमतिङ्॥ तं समर्थेन शब्दांतरेण सह समस्यते नित्यं तत्पुरुषश्च समासो भवति कुंभकारो नगरकारः। अतिङिति किं। एधानाहारको व्रजति। ननु च सुप्सुपेति वर्त्तते। तत्र कुतः

स्वत्योस्तु समासो भवत्येव हस्तं प्रतीति कर्मप्रवचनीयेन योगाद्द्वितीया वत्समासप्रापिप्रसंगः उदात्तवतातिङा गतेः समासवचनं यो ज्ञात एवचय पर्यभूषनयः शंबरमन्ववितयोः अतरि हं विमप्रेयो वेप्रवृत्तवयतामयेन प्रतिपद्यते॥ ॥उपपदं॥ ॥एधानाहारको व्रजतीति। तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति ण्वुल्। अतिङिति किमिति येनाभिप्रायेण पृष्टं तमाविः करोति। ननु चेति ॥ ६ ॥

।एतज्ज्ञापयति। स्यादेतन्न पुनर्व्यस्तस्य तिङ् नत्प्रतिषेधोऽनर्थक इति यत्तेन समानार्थः सुबन्तत्वस्य प्रतिषेधो विज्ञायते पत्तत्र पचति पि कालकारकसंख्योपग्रहयुक्तः प्र
वृत्तिरीभूतः क्रियास्य तिङ् तार्थप्रधानो योऽर्थो न सुबन्तस्य संभवतीति तथापि क्रियावाचित्वमात्रे एतदर्थत्वमाश्रीयते क्रियावाच्युपपदं न समस्यत इत्यर्थः तेन कारको
गतः कारकस्य अस्येति। तत्र ज्ञाशब्दयोः कारकशब्देन समासो न भवति अथ तथा हि क्रियार्थायामिति सप्तमीनिर्दिष्टेनोपपदत्वादनयोरपि समासः स्यादिति तत्
नअनुपपदत्वात् क्रियायां क्रियार्थायामिति सप्तमीनिर्देशेन क्रियावाचिनउपपदत्वे धातुरेवात्र क्रियावचनः तदाश्रय एव ण्वुल् प्रत्ययः गतश्चशब्दस्तु क्रियोपप
र्त्तीकर्तारमाहतः ज्ञाशब्दो वियस्तस्य सिद्धतानामसमर्थत्वात्र घञाद्ययो भवंतीति धात्वर्थस्य सिद्धतायां वर्त्तते अतोऽयं क्रियावाचित्वादुपपदं न तत्सुबन्तंय
सुबंतेन ततः क्रियावाचिनोपपदमिति नार्थ एवमर्थेनातिङ्ग्रहणेन। एतयोर्योगयोरिति। ननु चास्मिन्नेव योगे तदनंतरमपि संबंधोऽप्युक्तः यत्रातिङ्ग्रहण
मतितत्पूर्वत्र एवं मन्यते योगविभागेनातिङ्ग्रहणं पूर्वसूत्रेणापि संबध्नीयमिति यद्येवं कुत्सितं प्रादिषु चातिप्रसंगः तत्रापि माक् सुबुत्पत्तेः समासः

।एतत् ज्ञापयति। एतयोर्योगयोः सुप् सुपेति निसंबध्यत इति तेन गतिकारकोपपदानां कृद्भिः सह समा
सवचनं प्राक् सुबुत्पत्तेरित्येतदुपपन्नं भवति। अश्वक्रीती। धनक्रीती १० ॥ श्रीः ॥ ॥ छ ॥ ॥

स्यात् एवं तर्हि पूर्वसूत्रे गतिग्रहणं पृथक्कृतं तेनैवातिङ्ग्रहणं संबध्नीयं गतिकारकोपपदानामस्यायमर्थः गतीनां कारकाणामुपपदानां कृद्भिः
सह यः समासः तेन तेन लक्षणेन स उत्तरपदात्सुबुत्पत्तेः प्रागेव कार्यः पूर्वपदं तु सुबंतमेव समस्यत इति गतीनां तावत् आजिघ्रतीति आघ्रीय घ्राधा
धेट् दृशः शः इति गाप्रजिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्य इति निषेधदानश्चोपसर्ग इति कः आङ्घ्रशब्देन गतिसमासः सयधुत्त एव सुबंते
जाते पश्चात्स्यात्ततः सुबुत्पत्तये संख्याकर्मादिप्रयोगो विवक्षितत्वात् तथा घ्राणस्य प्रागेव लिंगयोः स्वार्थमभिधाय शब्द इति माप्त नत्तत्र लिं
गनिमित्तः प्रत्ययो भवन् ङाशब्दमात्रस्य जातिवाचित्वात् दृष्टत्वात् ततश्च आङ्घ्र घ्रीशब्देन समासः ततो घ्राशब्दस्य जातित्वेऽप्यनका
रान्तत्वात् जातिलक्षणो ङीप् तस्मात् प्राक् सुबुत्पत्तेः समासो भवन् लिंगयोगमपि विनायं क्षतरत्वं न रंगत्वात् स एव तावद्भवति पश्चात् स्त्री
प्रत्ययो भवन् ङीषेव भवति पूर्वपदस्य तु सुबंतत्वात्तत्कार्याणि भवंति निर्गत इति निरुत्वे सत्यपि तेतियर सवर्णविकल्प इत्यादीनि॥ ॥
कारकाणां अश्वेः क्रीतः अश्वैर्लिप्सकतः करणे कृतावत्कुलमिति समासः पूर्वपदस्य सुबंतत्वात् अश्वैः ततः क्रीतात्करणपू

का०प०
३९

अतइत्यधिकारात् वचनसामर्थ्याद्वा पूर्वशब्दं व्यवचनमाश्रित्य गत्यवस्थायामेव स्यात् अत इत्यधिकारो वाव्यवच्छियते प्राक् सुबुत्पत्तेः समासे स्वर्वव
तिष्ठ्यामिष्टं अत्रापि पूर्वपदस्य सुबंतत्वात् चर्मक्रीती स्यादेनत्लोपादिकार्याणि भवंति । उपपदानां कच्छेन पिबतीति सुपि स्थ इत्यत्र सुपीति योगविभा
गात्कः कच्छपी आद्रीतुल्यमाषा न्वपतिसुप्य ज्ञातोणिनिस्तांक्ष्णोत्येमायक्रापिणीङीपः प्राक् समासप्रातिपदिकसंज्ञातो न कारइत्तिणत्वं भवतिसवं
तस्य तु समासे ङीप्समासस्यांतोनतु नकार इति न स्यात् अत्रापि पूर्वपदस्य सुबंतत्वात् चर्मकारादेनलोपादि पदकार्यमित्यस्येव अत्रोपपदस्य ग्रहणं ग
तिकारकव्यतिरिक्तोपपदपरिग्रहार्थं मृषावादिपिणीं इषिदर्शी पात्रायत्तं … इति अत्र स्पर्शशब्दे न समासे सति समुदायात् स्त्री भ्योटके बाधित्वात् शा
शद्वाताद्भूक्षणोटक स्यात् स्त्रीप्रत्ययेन दादिनिषमाभावे पिदर्शी ह्यल्पाद्ध्यिक … स्यादित्येवादिका ज्ञातास्यसाः पीभाषायाः प्रयोजनानि कथं पु
नरतिङ् ग्रहणे नायमर्थः साधयितुं शक्य यावता प्रथमं तावत् तिङ् ग्रहणं प्रथमं स्यात् सैव सुब्ग्रहणस्य निवृत्तिः स्वयेरितिपूर्वयपदेषु स्कोयणीन्ने स्तुः
उत्तरपदे चोक्तं … नास्ति … तिङ् ग्रहणं विधेयमेव साधयति … कर्तृकरणे कृता बहु
लमिस्यादावस्थाः … अग्रहणं एवा उच्यते योगविभागेनातिङ् ग्रहणं गति नापि संबध्यत इत्युक्तं एवं स्थिते योगद्वय विहितसमासमतिङ्
ग्रहणे मविशेषयिष्यामः गतिः समस्यते अतिङ् समासो भवति उपपदं समस्यते अतिङ् समासो भवतीति तदेवं प्रत्यचमाङ् लुङ् माङि लुङ्
माकार्षीदित्यादौ तिङ् तेन समासे माभूदिति एवमर्थं क्रियमाणमतिङ् ग्रहणं सुपि तिन्न … तिसाधयतीति गत्युपपदयोस्ता वृत्ति
द्वमि … मुपसमुदाय … केवलस्य सुब्ग्रहणस्य प्रत्युदाहरणमपि … अत्र प्रदर्शितं न
हितं त्रातिङ् तेन समासः किं तर्हि तिङ् न स्य सुब् तेन कर्तृकरणे कृता बहुलमित्यत्रापि कृतेति न वर्तते कर्तृकरणयोः क्रियायै क्त्वादि
यावद्वचनेन तावत्समासः धातुसंज्ञा क्रियावचनः धातोः … प्रत्ययाः कृतस्ति अत … सुब्धिकारात् तिङ् तेनाप्रसंगः तदेतत्कृद्ग्रहणे कृद
नावस्थायामेव यथा स्यादित्येवमर्थमितिकेचित् । नेतिवयं … पचति तराद्या … पूर्वसिद्धे … तेन समासो माभूदित्येवमर्थं कृद्ग्र
हणं कर्तव्यं । कष्टश्रितादि … प्राक् सुबुत्पत्तेः समासो न स्यादिति … इति … एवं तर्हि गतिकारकोपपदानामिति परिभा
षा पूर्वाचार्यैः पठिता स्तत्र कारणमप्यतिङ् ग्रहणे न तदेशग्राहिता तत्र समासात् … मितिलास्यामेवपरिभाषार्थं ज्ञापयतीति सि

रा०
३९

॥ ॥अग्रेमेवा॥ ॥स्वादुंकारमिति। स्वादुमिति मुलः स्वादुमी स्यात एव निपातनात् तस्य पदस्य मान्तत्वं स्वादुमी सर्वग्रहणं तेन संपन्नंकारमित्यत्रापि भवति। ननु सिद्धे विधिरारभ्यमाणो नियमाय भवति एवकारः किमर्थः इष्टतोवधारणार्थः एवं यथा विज्ञायेत अमैवाव्ययेनेति मैवं विज्ञायि अमाव्ययेनैवेति। अनव्ययस्यामो संभवाद्देवार्थो नियमो न भविष्यति। ननु वाप मत्ति विज्ञायं त्रामन्तावकुलमिति अधिकरणे शेतेश्च अतो मिति सोरमभावः अनेनानव्ययेन समासो माभूदित्येवमर्थोयं नियमः स्यात् न अत्र त्वं तरंगत्वाद् लुक्यन्ते एव सानुपपदसमासेन भाव्यं यथा त्सुपेति विधाने लोयामनव्ययस्यामो संभवान्नियमान्तरेणावचनस्य वरितार्थत्वाद्विपरीतनियमो न भविष्यतीत्यत आह एवकारकरणमिति। अमैव यदुपपदं तस्य समस्यतेनदेव समस्यत इत्यर्थः न पुनरमैव समस्यत इति। तत्रामैव यदुपपदमित्यत्र तुल्यविधानमिति वाक्यशेषः। किं पुनरमैव तुल्यवि

॥अमैवाव्ययेन॥ ॥पूर्वेणैव समासे सिद्धे नियमार्थं वचनं। अमव्ययेनोपपदस्य यः समासः सोऽमैव नान्येन स्वादुंकारं भुंक्ते। संपन्नंकारं भुंक्ते। लवणंकारं भुंक्ते। अमैवेति किं। कालसमयवेलासु तुमुन्। कालो भोक्तुं। एवकारकरणमुपपदविशेषणार्थं। अमैव यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात्। अमा चान्येन च यत्तुल्यविधानं तस्य समासो मा भूत्। अग्रेभुक्त्वा। अग्रेभोजं॥ ॥

धानं येन वाक्येनाम् एव केवलो विधीयते न प्रत्ययान्तरसहितस्तेन वाक्येन यदुपपदं विधीयते तत्र सप्तमीनिर्देशात्तदमैव तुल्यविधानं। नियमाङ्गभूतस्त्वेवकारो नियमस्यमावादेव लभ्यते। अमैव यत्तुल्यविधानं न तु प्रत्ययान्तरेणास्मिन्निमित्तमिति तदपेक्षया नुपपदत्वात् अव्ययान्तरेण समासो माशंकनीयः। अग्रेभोजमिति। विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ। अव्ययग्रहणं किं। असत्यव्ययग्रहणे अमैव तुल्यविधाने तद्वोपपदं समस्यत इत्युच्यमाने कुंभकारादावपि न स्यात् अथ सर्वसूत्रस्यानवकाशत्वादमैव तुल्यविधानस्योपपदस्याव्ययविषयत्वात द्विषय एव नियमो विज्ञास्यत इत्युच्यते एवं तर्ह्यमैव नियमः स्यात् अमन्तेनोपपदस्य यः समासः सोऽमैव तुल्यविधानस्येति न त्वको दोषः अग्रेभोजमित्यत्रैव न स्यात् अग्रेभुक्त्वा कालो भोक्तुमित्यत्र तु स्यादेव अव्ययग्रहणे तु सति अव्ययेनोपपदस्य यः समासः सोऽमैव तुल्यविधान

का॰पद॰
५०

॥तृतीयाप्रभृतीति॥ ॥यस्तु नरमाचाम्येन तस्याप्राप्त इति। उपपदविशेषणार्थ एवकारोऽत्र नानुवर्त्तत इति भावः। उच्चैःकारमिति प
दा समासस्तदा छन्दुत्तरपदप्रकृतिस्वरः आदिरुगमुल्यन्यतरस्यामित्याद्युदात्तत्वं। पदाता न समासः तदोच्चैरित्येतत्तोदात्तं स्वरादिषु तथापाठा

॥तृतीयाप्रभृतीन्यन्यतरस्यां। अमैवेत्यनुवर्त्तते। उपदंशस्तृतीयायामित्यतः प्रभृति यान्युपपदानि तान्यमाऽव्ययेन सहान्यतरस्यां समस्यन्ते तत्पुरुषश्च समासो भवति। उभयत्रविभाषेयं। यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते यथोपदंशस्तृतीयायामिति। यस्तु नरमाचाम्येन च तुल्यविधानं तस्याप्राप्ते। यथाऽव्ययेयथाभिप्रेताख्याने कृञः क्त्वाणमुलाविति। मूलकोपदंशं भुंक्ते मूलकेनोपदंशं भुंक्ते। उच्चैःकारमाचष्टे। उच्चैः कारं। अमैवेत्येव। पर्याप्तिवचनेष्वलमर्थेषु। पर्याप्तो भोक्तुं प्रभुर्भोक्तुं॥ ॥क्त्वा च॥ ॥अमैवेति प्रवृत्तियोगेनुवर्त्तते तेनान्यत्र न प्राप्नोतीति वचनमारभ्यते क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते तत्पुरुषश्च समासो भवति। उच्चैः कृत्य। उच्चैः कृत्वा। अव्ययेऽयथाभिप्रेताख्याने इति क्त्वाप्रत्ययः। समासपक्षे ल्यप्। वेति तृतीयाप्रभृतीनीत्येव। अलं कृत्वा। खलु कृत्वा ११ एम॰ ५०

तः कारमित्याद्युदात्तं॥ ॥क्त्वा च॥ ॥क्त्वेति तृतीयान्तं आतश्वा कारलोपः। यथासमासेन ज्नर्वे त्कोल्यविति ल्यिस्कंदस्यदोरि
ति॥ ॥११॥ ॥छ॥ ॥

॥शेषोवहुव्रीहिः॥ ॥उपयुक्तादन्यः शेषइति। शिषअसर्वोपयोगइत्यस्मात्कर्मणिघञ्। कश्चशेषइति। ननुचोपयुक्तादन्यः शेषइत्युक्तेसुसं सर्वेषामेवपदानांसामान्यविशेषरूपेणोपयोगात्सर्वेषुचपूर्वोत्तरान्यपदार्थेषुयथायोगंतत्पुरुषाव्ययीभावयोर्विधानादुपयुक्तादन्योनसंभवतीति पुनः प्रश्नः उक्तंचशेषग्रहणंपरत्वेनाभावादर्थतश्चेद्विशिष्टमिति। यत्रान्यः समासोनोक्तइति। येषांपदानांयस्मिन्नर्थेऽव्ययीभावादिकः समासोनविहितः सशेषइत्यर्थः। अथैवंकस्मान्नविज्ञायतेसप्तमुसुपांत्रिकेषुयस्त्रिकस्यपूर्वंग्राह्यिकमासमासोनोक्तोयथाग्रथमायाः सशेषइति। कंठेकालइत्यादावप्रथमांतानामपिसमाससेष्टत्वात्। शेषग्रहणंप्राक्कडारात्परंकार्यमित्यस्मिन्नेकैकसंज्ञाधिका

॥शेषोवहुव्रीहिः॥ ॥उपयुक्तादन्यः शेषः। शेषः समासोवहुव्रीहिसंज्ञोभवति। कश्चशेषः यत्रान्यः समासोनोक्तः वक्ष्यति। अनेकमन्यपदार्थे। चित्रगुः शबलगुः कृष्णोत्तरासंगः। शेषइतिकिं। उन्मत्तगंगं। वहुव्रीहिप्रदेशाः। नवहुव्रीहावित्येवमादयः॥ ॥अनेकमन्यपदार्थे॥ अनेकंसुवंतमन्यपदार्थेवर्त्तमानंसमस्यतेवहुव्रीहिश्चसमासोभवति। प्रथमार्थमेकंवर्जयित्वासर्वेषुविभक्त्यर्थेषुवहुव्रीहिर्भवति। प्राप्तमुदकंयंग्रामंप्राप्तोदकोग्रामः। ऊढरथोऽनड्वान्। उपहृतपशूरुद्रः। उद्धृतौदनास्थाली। चित्रगुर्देवदत्तः। वीरपुरुषकोग्रामः। प्रथमार्थेतुनभवति। वृष्टेदेवेगतः॥ १२॥

रपसेनकर्तव्यमित्याकडारसूत्रएवप्रतिपादितं॥ ॥अनेकं॥ अनेकंसुवंतंसहसमस्यतइति। परस्परमित्यर्थः तदनेनसुविसेवाआनुवृत्तिनसुपेत्येतत्उत्तरपदस्याथनेकमित्यनेनैवप्रतिपादितत्वादितिदर्शयति। सर्वविभक्त्यर्थेष्वितिपदेनप्रकृत्यर्थोपसर्जनः प्रत्ययार्थोभिधीयतइतिविभक्त्यर्थसप्राधान्यात्तस्यैवान्यपदार्थग्रहणेनग्रहणमितिभावः। अतएवप्राप्तोदकोयंग्रामइतिग्रामशब्दानुप्रयोगः अन्यथाप्यर्थोग्रामपदस्यनावतोभिधानेनगतार्थत्वात्तस्याप्रयोगःस्यादिवचशब्दस्य। यदातुसमासेनविभक्त्यर्थएवसंबंधोभिधीयतेतदाविभक्तिर्मानुप्रयोगइत्यस्यानभिहितत्वात्तद्वाचिनोनुप्रयोगः कस्मात्स्यात्। पदेविभक्त्यर्थाभिधीयतेकथंग्रामादिभिःसामा

नाधिकरण्यंतल्लिंगसंख्यापीत्यो वा वहुव्रीहेर्भवति प्राप्तोदको ग्राम ऊढनौदना स्थालीति॥ ॥ ॥

का॰पद॰ ४१ ।उच्यते विभक्त्यर्थस्यासंख्याद्देशाश्रितत्वेन गुणत्वात्समासे द्वोपचारस्तामानाधिकरण्ये आश्रयतश्च लिंगवचनानि भविष्यंति शुक्लादि
वत् यथा शुक्लं वस्त्रं शुक्ला पटी शुक्लः कंबलः शुक्ले शुक्ला इति न चैवं यथा शुक्लशब्देन करणविगुण उच्यते कर्णविगुणौ तथा बहुव्रीहा
वपि प्राप्नोति नैषोस्ति नियमो गुणशब्देन करणविगुणमात्रमभिधीयत इति पद्मादिषु दर्शनात् न हि भवति देवदत्तस्य पुरिति तत्
द्वस्त्रापि नित्यमेव गुणा निवृत्ता भविष्यति एवमपि बहुव्रीहिणा यथा विभक्त्यर्थस्याभिधानात् षष्ठ्यादयो न भवंति तथा लिंग
संख्ययोरप्यभिधानात्तयोर्वाचकाः प्रत्यया न प्राप्नुवंति नैष दोषः स्वार्थिका ह्यवादय४ स्त्रियां यदुक्तं तस्मात्स्वार्थिका ह्यावा
दयो भवंतीति तेन बहुव्रीहिणा निहितेपि स्त्रीत्वे भविष्यति एवं कृत्वा नो बहुव्रीहेरित्युपपन्नं भवति। समासेन च वाक्य
क्रियापेक्षायाकर्मादिशक्तिस्तद्रहितसमासप्रातिपदिकार्थमात्रे ऐवे कृत्वा दयउक्ता इति कर्मादिगते कृत्वादिप्रत्ययादन
यवचनानि भविष्यंति चित्रगुं पश्य चित्रगुणा कृतमिति एवमपि प्रथमा न प्राप्नोति समासे न संख्याया अभिधानात्। वचनग्रहणा
देको द्वौ बहव इति भविष्यति। अथवा लिंगमात्रसंख्यामात्रे बहुव्रीहिणाभिहिते न विशेषस्तत्रावद्धं विशेषार्थिन्या तद्वाची
शब्दः प्रयोक्तव्यः। एवं च कृत्वा सह प्रकृत्यर्थेन विभक्त्यर्थे बहुव्रीहिणाभिधीयमानेपि न कश्चिद्दोषः कथं सामान्यमभिहितं
विशेषस्यानुप्रयोगः समान्यस्य तर्हि न प्राप्नोति देवदत्तः कश्चिदिति सामान्यमपि विशेषः यथा विशेषेण विशेषांतरं व्याव
र्त्यते तद्वत्सामान्येन विशेषो व्यावर्त्यते अन्यथा संदेहः स्यात्सामान्यमत्र विवक्षितं विशेषो वेति। प्राप्तोदको ग्राम इत्यादीनि द्वि ग्रामः ४१
तीयाद्यर्थेषु यथाक्रममुदाहरणानि ऊढो रथो येन उपहृतः पशुर्यस्मै उद्धृत ओदनो यस्याः चित्रा गावो यस्य वीराः पुरुषा यस्मि
न्निति विग्रहाः। प्रथमार्थे तु न भवतीति। अनभिधानात् एवमनंतरादिषु न भवति चित्रा गावो यस्मादनंतर इति॥ ॥१२॥ ॥

।अनेकमिति किमिति। सुसूपेत्य षिकारादेवं तत्पुरुषवद्बहुव्रीहिरप्येकस्य न भविष्यतीति प्रश्नः। बहूनामपि यथा स्यादिति। अन्यथा सु
सुपेति संख्याया अविवक्षितत्वाद्यथा तत्पुरुषो बहूनां न भवति महत्कष्टंश्रित इति तथा बहुव्रीहिरपि न स्यादिति भावः। तत्र कास्ति द्वंपद
यं तद्धितार्थेत्युत्तरपदे द्विगुं ज्ञापयति बहूनामपि समास इति। पद्येवं तत्पुरुषेपि प्रसंगः। अथ चित्रगुरित्यत्रोत्तरपदस्याप्युप
सर्जनसंज्ञाप्रयोजनं कस्मान्न भवति। तिमनित्यनेकग्रहणं सुप्येस्य एवं निवर्तितत्वादुत्तरपदमपि तेनैव प्रसाध्यं नेतत्तथापि समासशास्त्रप्र
थमा निर्दिष्टं भवतिना स्य। एवं मन्येत चित्रगुरित्यत्र चित्रां गां परस्येति प्रधानस्यान्यपदार्थस्य नाना विभक्तियोगेपि वर्त्तिपदयोर्नित्यप्र
थमान्तत्वादेकविभक्तीत्येव सिद्धमुपसर्जनत्वमिति। सुसूक्ष्मजटकेशेनेति। सुष्ठु सूक्ष्मा जटयः केशाश्च सेति चतुर्णां बहुव्रीहौ प्रा
प्तः संख्याछंदसोर्वक्तुलमिति बहुलवचनान्न कृत्वं पद्यं सुष्ठु सूक्ष्मा जटा येषु ते सुसूक्ष्मजटास्तादृशाः केशा अस्येति पुनर्बहुव्रीहिः ए

।अनेकग्रहणं किं बहूनामपि यथा स्यात्। सुसूक्ष्मजटकेशेन सुगताजिनवाससा। बहुव्रीहिः समा
नाधिकरणानामिति वक्तव्यं व्यधिकरणानां मा भूत्। पंचभिर्भुक्तमस्य। अव्ययानां च॥ ॥

वं सुष्ठु गताजिनं वासः आच्छादनं यस्य तेन सुगताजिनवाससा तृतीयान्तोदाहरणं श्लोकेनाप्यपठितत्वात् सुसूक्ष्मजटकेशेन सुग
ताजिनवाससा। समन्तशितिरंध्रेण द्वयोर्हेतोर्न सिध्यतीति भाष्ये श्लोकः पठितः तत्र तु श्लोकपूरणार्थं तृतीयानिर्देशः अन्यग्र
हणं च बहुव्रीहितत्पुरुषयोर्विषयविभागार्थं असति तस्मिन्नंतकालत्वात् दोष्यधिकरणपदेनावकाशं बहुव्रीहिस्तत्पदार्थे एव नी
लोत्पले परत्वात्समानाधिकरणे तत्पुरुषो बाधेत अन्यग्रहणे तु सति स्वपदार्थे सावकाशं तत्पुरुषं परत्वाद्बहुव्रीहिर्बाधित
इति न कश्चिद्दोषः। पदग्रहणं किं पदार्थे यथा स्यात् वाक्यार्थे मा भूत् कश्चित्कंचिन्न घोषिष्यति सुपाहं न यांम्राहाः संतीति एतान्नियं
तानितस्मात्तत्र मास्तामिति वाक्यार्थे गमयन्तीति तेषां बहुव्रीहिसंज्ञा प्राप्नोति। अर्थग्रहणं किं पदान्तरे प्रदेशान्तरे स्वहस्तस्य भवा
देवपदार्थे भविष्यति कृत्स्नपदार्थे यथा स्यात् अन्यथा प्राधान्यात् हि भे स्मर्थ एव तस्मात्तन प्रकृत्य यदमेनत्त्रयष्टुमभे दोपचाराद्धर्मिणोभि
धाने सिद्धेपि शुक्लादिवद्धर्ममात्रस्यापि कदाचिदभिधानं प्राप्नोतीति तस्मिन्नापाक्रियते पद्धादिशाद्वान्तिसंधर्मिनिष्ठो बहुव्रीहिरितिमनियाद

का॰प॰
४२

।उच्चैर्मुख इति। उच्चैःशब्दोऽधिकरणप्रधानत्वादेयधिकरणप्राधान्यवचनं। समस्तमुपमानेनेति। समस्यंतमुपमानवाचि च पूर्वपदं यस्य तस्य शब्दस्य तेनेति समासस्तत्र
समस्योत्तरपदस्य लोप इत्यर्थः। कंठेस्थ इति। सुपि स्थ इति कः। अमूर्द्धमस्तकादिना लुक्। कंठेस्थित इति पाठे तु सप्तमीति योगविभागात्समासः। समभ्याधि
करणत्वात्समासेऽपि द्विवचनमुत्तरपदलोपार्थमिति न वेदितव्यं। धिकरणे प्रत्ययानामकत्वमस्तीति प्रदर्श्यते। उष्ट्रमुखमिवेति अवयवधर्मेण समुदाय
व्यपदेशादुष्ट्रस्योपमानतेत्युपमानपूर्वपदं उष्ट्रमुखशब्दः अत्रोपमानोपमेययोर्वैयधिकरण्याद्वचनं उत्तरपदलोपार्थं च। उष्ट्रमुख इति। अ

।।उच्चैर्मुखः। नीचैर्मुखः। समस्यमुपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः। कंठेस्थितः कालोऽस्य। कं
ठेकालः। उरसि लोमा। उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः। खरमुखः। समुदायविकारषष्ठ्याश्च ब
हुव्रीहिरुत्तरपदलोपश्चेति वक्तव्यं।। केशानां समाहारश्चूडा अस्य केशचूडः। सुवर्णस्य विकारोऽलंकारोऽ
स्य सुवर्णालंकारः।। ।।१३।। ।।

नाम॰
४२

त्रोष्ट्रमुखमस्येति विग्रहः न च प्राणीप्राण्यंतरस्य मुखमुपपद्यत इति सामर्थ्यान्न स्याद्दृष्टान्तगतिः मुखेन च मुखस्य सादृश्यं प्रसिद्धमित्युष्ट्रमुख
मिव मुखमस्येत्ययमर्थो भवति तस्मादुत्तरपदलोपो न वक्तव्यः। समुदायविकारषष्ठ्या इति। समुदायावयवसंबंधे प्रकृतिविकारसंबंधे च या
षष्ठी तदंतात्परं यदुत्तरपदं तदंतस्य समासस्य शाब्दीतरेण सह बहुव्रीहिरित्यर्थः। केशचूड इति। इदमपि केशसमाहारे केशशब्दस्य वृत्तेः
सिद्धं एवं स्वर्णविकारे स्वर्णशब्दस्य वृत्तेः स्वर्णालंकार इति सिद्धं वचनं तु केशसमाहारचूडः स्वर्णविकारालंकार इत्युत्तरपदस्याश्रवणमात्र इति।।१३।।
।। १३।। ।।

प्रादिभ्यो धातुजस्येति। इदं न वक्तव्यमेव प्रादयो हि ससाधना क्रियामाहुर्यथा निः कौशाम्बिर्निर्गतः कौशाम्ब्या इति। निर्वाराणसिः प्राचार्य इति एवं नञोऽस्त्यर्थानामिमान्तरं विद्यु
बधिकार इति। अस्तीति तिङन्तमिति मतान्तरवचनं। निपातत्वात्तिङन्तोपसर्गविभक्तिप्रतिरूपका निपाता इत्यस्तिशब्दः पठ्यते। इह किं सब्रह्म
चारीति बहुव्रीहिः। यं केसब्रह्मचारिणस्तव किं सब्रह्मचारी न भवतीति पूर्वपदप्रकृतिस्वरो पदे भवतीति तत्र कठसब्रह्मचारी हमिति समीचीनं प्रतिवच
नं पञ्चकठो हमिति नत्रस्य श्लाघ्नति वचनं किं तर्हि यतीत्यर्हत्वाव कठ इत्युक्तेऽन्यन्नामत एतन्नं नं जेपि कठा इति कठ हि कठा एव सब्रह्मचारि
णो भवन्ति नाम समाने ब्रह्मणि व्रतचार्येव सब्रह्मचारी भवति केसब्रह्मचारिणस्तवेति वाक्ये न तु प्रश्ने कठा इति प्रतिवचनं समासेन तु प्र
श्ने कठा इति प्रतिवचनं कदाचिदपि न भवति वृत्तिपदार्थानामुपसर्जनत्वात् किं सब्रह्मचारीति समासे न सब्रह्मचारिणामभिधानात् इहेष्टे

।प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा च बहुव्रीहिर्वक्तव्यः प्रपतितपर्णः। प्रपर्णः। प्रपतितपलाशः।
प्रपलाशः। नञोऽस्त्यर्थानां बहुव्रीहिर्वाचोत्तरपदलोपश्च वक्तव्यः। अविद्यमानपुत्रः अपुत्रः। अवि
द्यमानभार्यः अभार्यः। सुबधिकारे अस्तिक्षीरादीनां बहुव्रीहिर्वक्तव्यः। अस्तिक्षीरा ब्राह्मणी। अस्त्य
दयो निपाताः।। ।।संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये।। संख्येये या संख्या वर्तते तया सहाव्य
यासन्नादूराधिकसंख्याः समस्यन्ते बहुव्रीहिश्च समासो भवति। अव्यय। उपदशाः।

द्रोणाव इदं द्रोणाश्चाद इति तृतीयाद्रोणा इति अर्द्धमतीयो येषामिति बहुव्रीहावुक्तावयवयवभेदः समुदायः समासार्थ इति बहुवच
नं द्रोणशब्दश्च द्रोणयोः द्वे द्रोणे पिलक्षणया वर्तत इति सामानाधिकरण्यं च भवति।। ।।संख्यायाः।। उपदशा इति। बहुव्रीहौ
संख्येये डज्बहुगणादि डिडविहितलोपः। दशानां समीपे ये भवन्ति ते उच्यन्ते ते पुनर्नव एकादश वा। पूर्वपदार्थप्रधानोऽपि समासः उप
शद्योपमा एवं तु द्वे नेकार्थत्वात्समीपे समीपिनि च वर्तते तत्र समीपिप्राधान्येन बहुव्रीहिः सामीप्यप्राधान्येऽव्ययं विभक्तिसमी
पेत्यव्ययीभावः उपदशं दत्तो हा इति अत्र धर्मधर्मिणोरभेदोपचारात्सामानाधिकरण्यं।। ।।छ।। ।।ढ।। ।।

उपविंशा इति। ति विंशतेर्डितीति ति लोपः। आसन्नाः दश येषां ते आसन्नदशाः। ते पुनर्नव एकादश वा। अधिकदशाः एकादश द्वादश वा। त्रयो वा द्वित्राः। वार्थे
का॰ पद॰ ऽयं समासः। वार्थश्च यदि विकल्पः स्यात् ततो ऽपि द्वौ भवतस्तदा बहुवचनं न स्यात् तस्मात् संशयोऽत्र वार्थः। स चानियतसंख्याविमर्शः तत्र तु त्रयोऽपि सर्व
४३ दा परिस्फुरन्तीति तद्रूपेण बहुवचनं। अथवा पंच गावः सर्वदा भवन्ति कथं विमर्शज्ञानमुभयस्पर्शि तं विषयं कंचन तत्र यथा द्वौ वा त्रयो वा पुरुषाः आनीयन्ता
मित्यत्र पुरुषशब्दे तिङ्‌ ते च बहुवचनमेव भवति तत्र स्यहेतोः मिश्रितेषु नयोर्हित्रिः। एवं द्वित्रिपदप्रविशि मिश्रितेषु वर्तन्त इति सेषा पंचाधिष्ठाना गावः
अतो बहुवचनमेव भवति आनयनादि कार्यं तु द्वयोस्त्रयाणां वा यथारुचि भवति। वाक्यवदेव समासस्यैव महिमा यद्बहुत्वे तु मिश्रितेषु द्वित्रिः ते
न द्वौ वा पुरुषावानीयेतामिति वाक्ये द्विशब्दाद् द्विवचनमेव भवति। त्रिचतुरा इति। चतुरोऽच्प्रकरणे त्र्युपाभ्यां चतुर इति संख्यानामिति अच्। द्विदशा इति। अ
त्र द्विशब्दे नद्दशतो हतिग नाद्वित्वसंख्या प्रतिमाघते नद्दशत्वसंख्या एकत्वान्न तापि संख्या प्रयुक्ताः बहुत्वात् तत्र गाके सुच् प्रत्ययेन रेणाभ्यावृत्ते तेरनव

उपविंशाः। आसन्नदशाः। आसन्नविंशाः। अदूरदशाः। अदूरविंशाः। अधिकदशाः। अधिकविंशाः। संख्यो

। द्वित्राः। त्रिचतुराः। द्विदशाः। संख्येये इति किं। पंच ब्राह्मणाः। अव्ययासन्नादूराधिकसंख्या इति किं। ब्राह्मणाः पं

च। संख्येये इति किं। अधिका विंशतिर्गवां॥ १४ ॥ ॥

गमात् सुच् भवति न तत्रास्य परविग्रहः क्रियते द्विर्दश द्विर्दशा इति वृत्तौ तु समासवदेव सुच् अन्तरेणाभ्यावृत्तिसंख्यां द्विशब्द एवाहेति संख्या वा राम॰
चित्वात् समस्यते। तत्र च गवार्थः सुजर्थश्चोभयत्रार्थ इति एवं ग्रोणा सिद्धं तत्र सुचः स्वार्थिकत्वात् तद्धर्थोऽपि पदार्थ एव। मत्वर्थे एव योगे ऽमत्वर्थोऽपि ४३
मारंभः। ननु प्राप्नोत्येकादि प्रथमार्थवर्जयित्वा सर्वविभक्त्यर्थेषु यथाभिधानं भवतीत्युक्तं। एवं तर्हि प्रथमार्थेऽपि यथा स्यादित्ययमारंभः अथ प्रथमार्थ
वर्जयित्वेत्येतदन्यत्र यथाभिधानं भवतीत्युच्यते एवं तर्हि नियमार्थं प्रपंचः संख्याः समासः। अव्ययादीनां तु चतुर्मात्रादिभिः संख्येयवाचि
भिः समासो विधेय एवं के चित्तु ये विंशत्यादयः संख्या नेयवर्तन्ते तेनैः सर्वेणैव सिद्धं अधिका विंशतिर्यथान्तरे अधिकविंशाः विंशतिसंख्या आसन्ना येषां
ते आसन्नविंशा इति तत्र सर्वनाम संख्ययोरिति विंशतिशब्दस्य पूर्वनिपातः प्राप्नोति तस्माद्द्विशब्दाद्यर्थमव्ययादीनां ग्रहणं कर्तव्यमेव॥ १४ ॥

॥ ॥दिङ्नामानि॥ ॥दक्षिणपूर्वेति। अन्तरालस्यान्यपदार्थत्वात्सर्वेणैव सिद्धं वचनमिदं त्वमत्वर्थेऽपि यथा स्यात्प्रथमार्थेऽपि यथा स्यादित्येवमधि
कारेऽपि यथा स्यात्। किं च विभाषा दिक्समासे बहुव्रीहाविति तत्र दिशां प्रतिषेधो मा भूदेवं बहुव्रीहेर्ग्रहणं यथा स्यात् या पूर्वा सोत्तरा सा मुग्धस्य
तस्मै दत्तरपूर्वाय देहि। पत्रमा भूदित्येवमर्थं अत एव लत्वर्थोऽप्ययमारंभः कब्भावार्थं च। शेषाद्विभाषेत्यत्र शेषाधिकार निहितस्य बहुव्रीहेर्ग्रहणं अनेक
मन्यपदार्थ इत्यत्रैव शेषग्रहणमनुवर्त्तते तेनात्र कप्न भवति। सर्वनाम्नो वृत्तिमात्र इति। मात्रग्रहणाद्विभाषादिक्समास इति पदात्सर्वनामसंज्ञा नास्ति
तदापि भवति॥ ॥तत्र तेन॥ ॥इतिकरणस्तदितः समासाल्लोकस्य यद्विवक्षा भवति एवमर्थं समासो भवति नान्यथेत्येवमर्थः स च पिण्डमिति श
ब्दस्यार्थः। तेन किं सिद्धं भवतीत्याह लौकिकमर्थमिति। कः पुनरसौ लौकिकोऽर्थ इत्याह तत्रत्येत्यादि। एतदेव विवृणोति यत्तत्रेत्यादिना घाते स्मिन्नि

।दिङ्नामान्यन्तराले। दिशां नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते बहुव्रीहिश्च समासो भवति। दक्षिणस्याश्च पूर्वस्याश्च दिशो यदन्त
रालं दक्षिणपूर्वा दिक्। पूर्वोत्तरा। उत्तरपश्चिमा। पश्चिमदक्षिणा। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। नामग्रहणं रूढ्यर्थं। इह मा भूत्।
ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालमिति॥ ॥तत्र तेनेदमिति सरूपे॥ ॥तत्रेति सप्तम्यन्तं गृह्यते। तेनेति तृतीयान्तं। तत्रेति सप्तम्यन्ते
सरूपे पदे तेनेति च तृतीयान्ते इदमित्येतस्मिन्नर्थे समस्येते बहुव्रीहिश्च समासो भवति। इतिकरणस्ततश्चेद्विवक्षार्थो लौकिक
मर्थमनुसारयति। ततो ग्रहणं प्रहरणं कर्मव्यतिहारे युद्धं च समासार्थ इति सर्वे इतिकरणाल्लभ्यते यत्तत्रेति निर्दिष्टं ग्रहणं चेत्त
द्भवति यत्तेनेति निर्दिष्टं प्रहरणं चेत्तद्भवति। यदिदमिति निर्दिष्टं युद्धं चेत्तद्भवति। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाके
शि। कचाकचि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुशलामुशलि। इच् कर्मव्यतिहारे इति इच् समासान्तः। स चाव्ययं। अ
न्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। सरूपग्रहणं किं। हलेश्च प्रह

तिग्रहणं केशादिग्रहणार्थं आदिकर्मव्यतिहारः परस्परग्रहणं परस्परप्रहरणं च। स चाव्ययमिति। तिष्ठद्गुप्रभृतिषु पाठेनाव्ययत्वात्। न चात्र युद्धस्यान्य
पदार्थत्वात्सर्वेणैव सिद्धं। नैवं यथा कर्मण्यादेकशेषप्रसंगात् तथा हि ग्रहणे प्रहरणे च केशादीनामसकृद्विवक्षितत्वादेकविभक्तित्वाच्चैकशेषः प्राप्तोऽनेन
वचनेन बाध्यते कथं समूहविवक्षायां बहुव्रीहिसंज्ञा समूहश्चैकशेषे नोपपद्यते। ननु चाव्ययसमासस्य सर्वपोगेनेव परत्वादेकशेषो बाधिष्यते तेन ह्याकाते

॥तेनसह॥ ॥तुल्ययोगइति। तुल्ययोगः समानसंबंधः। सपुत्र इति। वोपसर्जनस्येति सभावः। नन्वत्र पिता प्रधानमन्यपदार्थोऽभिधेयः। स कथं
धिकरणयोः प्रथमार्थेऽपि यथा स्यादित्ययमारंभः। कृतभावार्थं च उक्तं चात्र कव भावः इदृशैः पुत्रैरिति इत्थंभूते तृतीया प्रायिकमिति। ज्ञापकात् पद
यं विभाषा समासो नेच्छंदस्यनेकमपि समासो संख्यादिभिः सपूर्वाच्च प्रवर्णाः प्रथमा या विभाषा विभाषा सपूर्वस्येति विद्यमानार्थेऽपि समासनिर्देशा
त् तज्ज्ञापयति प्रायिकं विशेषणमिति॥ ॥चार्थे द्वंद्वः॥ ॥समुच्चये साहित्ये परस्परनिरपेक्षाः पदार्था एकस्मिन्नाति संबंधिनि समुच्चीयंते त
त्समुच्चयः। यथा अहरहर्नयमानो गामश्वं पुरुषं पशुम्। वैवस्वतो न तृप्यति सुराया इव दुर्मदी इति दुर्मदी यथा सुरापानेन तृप्यति तथायमोगवा

॥तेन सहेति तुल्ययोगे॥ सहेत्येतच्छब्दरूपं तुल्ययोगे वर्त्तमानं तेनेति तृतीयांतेन सह समस्यते बहुव्रीहिश्च
समासो भवति। सह पुत्रेणागतः सपुत्रः। सच्छात्रः। सकर्मकरः। तुल्ययोग इति किं। सहैव दशभिः पुत्रैर्भारं व
हति गर्दभी। सहैव दशसु पुत्रेषु सैव भारस्य वाहिका विद्यमानैरेव बहुभिः पुत्रैर्भारं वहतीत्यर्थः। कथं सक
र्मकः। सलोमकः। सपक्षक इति। न ह्यत्र तुल्ययोगो गम्यते। किं तर्हि विद्यमानता। प्रायिकं तुल्ययोग इति वि
शेषणमन्यत्रापि समासो दृश्यते॥ ॥चार्थे द्वंद्वः॥ ॥अनेकमिति वर्त्तते॥ ॥अनेकमिति वर्त्तते। अने
कं सुबंतं चार्थे वर्त्तमानं समस्यते द्वंद्वसंज्ञश्च समासो भवति। समुच्च

दीयमान इत्यर्थः अत्र नयतिक्रियायामेकस्यां गवादीनां समुच्चयः गम्यमानत्वान्न च शब्दस्याप्रयोगः। एवं राज्ञो गौश्चाश्वश्चेति इदं द्वयोः
पटो रक्तः शुक्लश्चेति द्वयोर्गुणयोरेकः पटः कुंडलं चेति गुणद्रव्ययोः समुच्चयः इत्यादि द्रष्टव्यं परत्वेऽन्यस्य प्राधान्यात् तदनुरोधेन वितरस्त्वाचा
येन तदात्वाचीयमेतदन्वाचयः यथा भिक्षामट गां चानयेति अत्र यद्दर्शनात् अन्वयः भिक्षाटनेऽपि हि अटतस्तु भिक्षोर्न गामानयति अ
न्यापि तत्राचिख्यगामानयति इतरेतरयोगस्तु परस्परापेक्षाणामवयवभेदानुगमेन समुदायस्यतामापन्नानामेकस्मिन्नर्थे व्ययेसति भवति
यथा देवदत्तयज्ञदत्ताभ्यामिदं कार्यमिति तत्र योऽकार्यपेक्षितद्वौ तेऽनूताव्ययवभेदत्वाच्च द्विवचनबहुवचने भवतः नाहेशनामेवायवतेरित्तिरो

रा.स.
४४

तत्रेत्यादि। स्यादेतत् समुच्चये यथा एतयोरेव तत्र स्थले पि गवादीनामेकक्रियाहारकं सामर्थ्यमस्त्योदनादिवदस्त्येवेति तन्नेत्युक्तं रन्धयोदनादावेकत्वात्क्रि
याया इह तु कर्मभेदात्क्रियाभिधानेतथा च समुच्चये न्यतरस्यामित्यत्र भाष्ये भूम मत्स्य मस्तेत्यादिके कर्मभेदनिबंधनं क्रियाभेदमाश्रित्योदाहरिष्यते। अ
न्वाचये त्वप्रधानमेव चार्थे वर्तते न प्रधानमित्यनेकस्य पदस्य चार्थेऽभावादपि समासाभावः। इह यद्यप्यसौ स्वंज्ञ श्च त्यकेन सम्बन्धमित्यपवेकस्य
न समुच्चयाचार्यस्य द्वावास्तां मानाधिकरण्योरपि द्वंद्वसंज्ञाप्रसंगः ततश्चद्वंद्वे वीतिनियमः स्यात् विशेषणमित्यादिनानुतत्पुरुष कर्मधारयसंज्ञ
इत्यपि सिध्यति। नेष दोषः एकसंज्ञाधिकाराद्धि शेषविधिः तत्पुरुषसंज्ञेव भविष्यति अन्यथा नीलं च तदुत्पलं चेत्यादावपि द्वंद्वः स्यात्। य
द्वा शेषग्रहणान्निवर्त्तते। भो विशेषणमित्यत्रोपयुक्तत्वान्न भविष्यति सामानाधिकरण्याभावे तु द्वंद्व एव भवति पुरुस्त्रज्ञावागतानितिप्लक्षन्यग्रोधावि

तत्रसमुच्चयान्वाचययोरसामर्थ्यान्नास्तिसमासः। इतरेतरयोगेसमाहारेचविधीयते। प्लक्षश्चन्यग्रोधश्चप्ल
क्षन्यग्रोधौ। धवखदिरपलाशाः। वाक्चत्वक्चवाक्त्वचं। वाग्दृषदं। द्वंद्वप्रदेशाः द्वंद्वे
चेत्येवमादयः॥ १९ ॥छ॥ ॥

तिच शब्दस्याव्ययत्वेपि तदर्थे विधीयमानस्य द्वंद्वस्य स्वभावादेव लिंगसंख्यायोगः कथं पुनरत्र द्विवचनं यावता शब्दयोर्वाच्ययोः अभिधानेपि
पौर्वापर्ये तत्र च लक्षणादः सहार्थेनेति वा मन्त्रो भूशब्द उपस्थितः एक एवार्थस्तस्यैकत्वादेकवचनमेव प्राप्नोतीति तथा चाघनोदकि नादि तिक्रमे
प्रतीतिमंगीकृत्य यथासंख्यमित्यस्य प्रवृत्तिः न च क्रमेणाद्ययोरर्थयोः प्रतीतो द्विवचनं भवति यथा वाकोरु प्लक्षश्च न्यग्रोधश्चेति अत्र न्यग्रोधार्थप्रती
तिदशायां प्लक्षार्थस्याप्रतीतिरेव कारणात्। अस्तु तर्हि युगपदधिकरणवचने द्वंद्वः किं नि दयु गपदधिकरणवचन इति अधिकरणं वर्तिपदार्थः अ
धिकरणेषु युगपद्वचनं युगपदधिकरणवचनं तत्र द्वंद्वो भवति केन पुनर्युगपद्द्वयोर्वचनं एकैकेन पदेन तदुक्तं भवति यावतां पदानां द्वंद्वोपदिता वृत्ता
मस्योन्यार्थाभिधानं युगपद्वस्त्वेवं द्वंद्वो भवतीति अत्र हि द्विवचनबहुवचनान्यथानुपपत्तिरेव प्रमाणं विग्रहे चापि दर्शनात् विग्रहे खल्वपि यु
गपद्वचनतादृष्टं तेषु प्रमित्र पौर्वहरणयोः द्यावापृथिवी सुमेरुपृथिवी नमेते इति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥

किंपुनः समासेपत्रवान्याचान्याचशक्तिः प्रादुर्भवतिकथंपुनः प्लक्षशब्देन न्यग्रोधाभिधानं तेनवा तस्य साहचर्यादिति यद्वा तद्वा निमि
त्तं भवतु यद्यपि च लोकव्यवहारे केवलस्य प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं न दृष्टं न्यग्रोधशब्दस्य वा प्लक्षाभिधायित्वं द्वंद्वावयवानां त्व
नेकार्थाभिधायित्वं न केवलानामिति दोषः नियतविषया ह्यपि शब्दा अर्था भवंति यथा भ्रातृशब्दस्यैकशेषे स्वसरि वृत्तिः पुत्रशब्दस्य
दुहितरि एतेनैतदपि निरस्तं यदेकेनोक्तत्वात् परस्यार्थस्य परस्य प्रयोगो नोपपद्यत इति कथं द्वंद्वावयवानामेव परस्परसंनिधानादेषा शक्तिर्व्य
ज्यते संनिधावविवक्षिते द्वन्द्ववृत्ता नो खलु व्यक्तिविगतो भवतीयदि तर्हि प्लक्षोपि द्व्यर्थो न्यग्रोधोपि द्व्यर्थो बहुत्वाद्बहुवचनं प्राप्नोति नात्र चत्वारो
ऽर्थाः किं तर्हि याभ्यामेवात्र कोऽप्यर्थस्ताभ्यामेवापरोऽपि प्रतिपाद्यते न तु तयोरन्यार्थत्वं यथा प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाविति द्विवचने प्रती
तेऽपि वृत्तिरेव प्लक्षन्यग्रोधावित्यत्रापि प्राप्नोतीति तन्न युगपदुत्पादात् तद्यथा द्वयोरक्ष्णोर्युगपद्व्यापारितयोः पृथग्वर्तित्वसर्वद्ध्ये युगपदेका
प्रतीतिर्जन्यते तथेहापि द्रष्टव्यं। ननु यदा प्लक्षशब्दो न तदा न्यग्रोधशब्दो यदा न्यग्रोधशब्दो न तदा प्लक्षशब्द इति कथमत्र युगपद्व्यापा
र इति स्थयोर्युगपद्व्यापारादद्दोषः पदानि हि श्रुतमात्राणि स्वं स्वमर्थं स्मारयंतीति पश्चादाकांक्षासंनिधियोग्यत्वेषु परामृष्टेषु ... स्था
न्यपि दधति तस्मात् वस्तुतो युगपदारोहासंभवस्यैव युगपद्व्यापारः पाश्चात्यपदार्थानां स्मृतिः सा क्रमभाविनीति न तत् क्रमशो वयथासंख्यादि
वस्था युगपदभिधाने प्युपपद्यते न तरे वं युगपदधिकरणवचने द्वंद्व इति स्थितं इहैकविंशतिर्द्वाविंशतिरिति यद्ययं द्वंद्वः स्यात् एकं च विंश
तिश्चेतीतरेतरयोगे द्विवचनबहुवचनप्रसंगः समाहारे च सनपुंसकमिति नपुंसकप्रसंगः अत एवैकाधिका विंशतिरेकविंशतिरि
ति शाकपार्थिवादित्वात् समासः क्रियते तेनैवं शंकोऽज्ञत्व बहुवचनं द्वंद्वं कथं एषा प्युसर्वोऽपिति पूर्वपदप्रकृतिस्वरेण स्यात् तस्माद्द्वंद्वावयं स
च समाहारेनेतरयोगेऽनभिधानात् न नपुंसकलिंगमपि ष्यं लोकाश्रयत्वाल्लिंगस्येति न भवति २६ ॥ ॥छ॥ ॥ ॥

गउपसर्जनं॥ ॥अनियमो हि स्यादिति संभावने लिङ्। यद्यपि विपरीतप्रयोगो लोके न दृष्टः यथा पुरुषापराधानुवाक्य वत्संभाव्येते त्यर्थः। इहराजः पु-
रुषस्य पुत्रो राज्ञा पुरुषपुत्र इति षष्ठीसमासः तत्रोभयोरपि प्रथमानिर्दिष्टत्वेप्युपसर्जनसंज्ञान्वर्थत्वादप्रधानस्यैव भवति पुरुषश्चात्र राजापेक्षयाप्रधा-
नमिति पूर्वनिपातनियमः॥ ॥राजदन्ता॥ ॥न केवलमित्यादि अत्र विहितपूर्वनिपातस्येति पाठे विहितः पूर्वनिपातो यस्य तस्येत्यर्थः प्रायेण तु
विहितस्येति पाठः तत्रापवादइति शेषः अन्यस्यापि आरेयः पूर्वनिपातो यथालक्षणं विहितस्तस्याप्ययं बाध इत्यर्थः। अग्रेवणमिति। वनं पुरगेत्यादिना

।उपसर्जनं पूर्वं। समास इति वर्त्तते। उपसर्जनसंज्ञकं समासे पूर्वं प्रयोक्तव्यं। पूर्ववचनं परप्रयोगनिवृत्त्यर्थं। अ-
नियमो हि स्यात्। द्वितीया। कष्टश्रितः। तृतीया। शंकुला खंडः। चतुर्थी। यूपदारु। पंचमी। वृकभयं॥ षष्ठी। राजपुरुषः
।सप्तमी। अक्षशौंडः॥ ॥राजदंतादिषु परं॥ ॥पूर्वनिपाते प्राप्ते परप्रयोगार्थं वचनं॥ राजदंतादिषु परमुपसर्जनं
प्रयोक्तव्यं। न केवलमुपसर्जनस्य अन्यस्यापि यथालक्षणं विहितस्य पूर्वनिपातस्य परनिपातो विधीयते। दंता-
नां राजा राजदंतः। वनस्याग्रे अग्रेवणं। निपातनादलुक्। राजदंतः। अग्रेवणं। लिप्तवासितं। नग्नमुषितं। सिक्तसंमृष्टं।
मृष्टलुंचितं। अवक्लिन्नपक्वं। अर्पितोप्तं। उप्तगाढं। पूर्वकालस्य परनिपातः। उलूखलमुसलं। तंडुलकि-
ण्वं। दृषदुपलं। आरग्वायनिबंधकी॥ चित्ररथबाह्लीकं। आवंत्यश्मकं। शूद्रार्यं। स्नातकराजानौ। विष्वक्सेना

र्जुनौ तत्र दंतशब्दस्य परनिपातस्य ज्ञापकं भविष्यतीति तन्न उपसर्जनं पूर्वमिति नियमो न प्रवर्त्तत इत्येतावतो ऽर्थस्य ज्ञापकत्वेन
तदुपपत्तेः कथं नियमेन परनिपातः स्यात् इह च निपातनादलुगिति णत्वमपि न विष्यतीति तत्राग्रग्रहणं शाकमकर्त्तृ पूर्वकालस्येति पूर्व
काल एकेति प्रथमानिर्दिष्टादुपसर्जनस्येत्यर्थः उलूखलमुसलादिद्वंद्वेषु क्वचिदल्पाच्तरत्वात् क्वचिद्घ्यंतत्वात् क्वचिदजाद्यदंतत्वात् पूर्वनिपातप्र
संगः क्वचिदनियमः दृषदुपलमिति प्रमाद पाठः अल्पाच्तरत्वात्॥

।अक्षिभ्रुवं दारगवमिति। अचतुरविचतुरेत्यादिसूत्रे समासान्तो निपातितस्तेन परनिपातस्यापि सिद्धत्वादिह पाठः कृत्स्नो। कर्तुं।। ॥द्वन्द्वे घि॥ ॥द्वन्द्वे
नेकमिति प्रथमानिर्दिष्टं शास्त्रे सर्वेषामेवोपसर्जनत्वादनियमे प्राप्ते वचनम्। अनेकप्राप्ताविति आकृतोपदार्थे समुदाये सकृल्लक्षणं प्रवर्त्त
ते न प्रति अयमाह स्यात्तत्रैकस्यैव पूर्वनिपाते न जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्त्तते। नन्वाकृतिपक्षेऽपि पटुगुप्तमृदुगुप्ताविति स्यादि
ष्वबहुषु व्यक्तिषु युगपल्लक्षणं प्रवर्त्तते तथात्रापि प्रवर्त्ततामेवं मन्यते एकस्य युगपदवबोधमङ्गीकृत्य विरोधाल्लक्षणं न भवति न चान्तमपेक्षो

।अक्षिभ्रुवं। शब्दार्थौ। धर्मार्थौ। कामार्थौ। अनियमश्चात्रेष्यते। अर्थशब्दौ। अर्थधर्मौ। अर्थकामौ। न कथंभ
क्रमिदं। धर्मार्थौ दिशमयामिति। वैकारिकमतं। गोजवाजं। गोपालधानी। पूलासकरंडं। स्थूलपूलासं। उशी
रबीजं। सिञ्जास्थं। चित्रास्वाती। भार्यापती। जायापती। जम्पती। दम्पती। जायाशब्दस्य जम्भावो दम्भावश्च निपात्य
ते। पुत्रपती। पुत्रपशू। केशश्मश्रुणी। श्मश्रुकेशौ। शिरोबीजं। सर्पिर्मधुनी। मधुसर्पिषी। आद्यन्तौ। अन्तादी। गु
णवृद्धी। वृद्धिगुणौ॥ ॥द्वन्द्वे घि॥ पूर्वमिति वर्त्तते। द्वन्द्वे समासे घ्यन्तं शब्दरूपं पूर्वं प्रयोक्तव्यं। पटुगुप्तौ। मृदुगुप्तौ। अनेक
प्राप्तावेकत्र नियमः शेषेष्वनियमः। पटुमृदुशुक्लाः। पटुशुक्लमृदवः। द्वन्द्व इति किं। विस्पष्टपटुः॥ ॥अजा
द्यदन्तं॥ ॥द्वन्द्व इति वर्त्तते। अजाद्यदन्तं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यं। उष्ट्रखरं। उष्ट्रशशं। बहुष्वनियमः। अश्वरथे
न्द्राः। इन्द्ररथाश्वाः। द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन। इन्द्राग्नी। इन्द्रवायू। तपरकरणं किं। अश्वावृषौ। वृषाश्वौ। इति वा १७

मयोः पूर्वत्वमन्यतरेणाव्यवधानादिति। अत्र च यद्यपि पटुमृद्वोर्द्वन्द्वं कृत्वा पश्चाच्छुक्लशब्देन सह द्वन्द्वः क्रियते तदा लाघवत्वात्तस्य पूर्वनिपाते शुक्लमृ
दुपटवः शुक्लपटुमृदव इति च भवति। विस्पष्टपटुरिति विस्पष्टशब्दः प्रकृतिनिमित्तस्य पारवश्यस्य विशेषणमिति विस्पष्टं पटुरिति विगृह्य
सुप्सुपेति समासः॥ ॥अजाद्य॥ ॥अजादीति पृथक्पदं विशेषणसमासो वा। जम्भेद्वार्थमिति पदद्वयस्य पश्चात्समासेऽप्याश्वेन्द्रादस्यापि

॥ ८ ॥

॥अल्पाच्तरं॥ ॥अत्र तरप्निपातनात्स्वार्थे तरप् एकत्वाभावेऽप्ययं प्रत्ययः प्रकर्षे तरप्स्यात् तदाक्षवत्वेरिपल्लाशास्मादौ बहुषु संनिहितेषु द्विवचनो
पपदत्वाभावादत्राप्रवृत्त्यावनियमः स्यात् द्वयोर्विवृतस्यात् प्लक्षन्यग्रोधाविति। शंखदुंदुभिवीणा इति त्र्यणां नामितेष्वेक बहूनां वा न भवति तत्पूर्वनिपात्य
जीविनामेवतत्रग्रहणात् नियतत्वमविवक्षायां जातिपरत्वाभावाज्जातिस्प्राणिनामित्येतदपि न भवति शंखवीणाभ्यां दुंदुभेर्द्वन्द्वे दुंदुभिशंखवी
णा इत्यपि भवति एवं मृदंगाश्वशंखपणवौ चमृदंगशंखपणवाः धनपतिप्वरामकेशवौ चप्रासादे धनपतिरामकेशवानामित्यादि भवति। तथाहो
ताचपोता चनेष्टा चोद्गाता चेति बहूनां पुणायद्वन्द्वे तृतीयस्योत्तरपदमनंतरमिति तत्स्यैवानङ् भवति नेतरयोः होतृपोतृनेष्टोद्गातारः द्वयोर्द्वयोर्द्वन्द्वेत्रया

॥अल्पाच्तरं॥ ॥द्वन्द्व इति वर्त्तते। अल्पाच्तरं शब्दरूपं द्वन्द्वसमासे पूर्वं प्रयोक्तव्यं। प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ। ध
वाश्वकर्णौ। बहुषु नियमः। शंखदुंदुभिवीणाः। वीणाशंखदुंदुभयः। ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षरा
णां पूर्वनिपातो वक्तव्यः। हेमंतशिशिरवसंताः। चित्रास्वाती। कृत्तिकारोहिण्यौ। समानाक्षराणामिति किं। ग्री
ष्मवसंतौ। लघ्वक्षरं पूर्वं निपततीति वक्तव्यं। कुशकाशं। शरबीजं। अभ्यर्हितं च पूर्वं निपततीति वक्तव्यं। मा
तापितरौ। श्रद्धामेधे॥ ॥छ॥ ॥

णामप्यानङ् भवति होतापोतानेष्टोद्गातार इति एवमन्यत्रापि द्वन्द्वे क्रियायामानुपूर्व्यविशेषाद्युपविशेषो वेदितव्यः। पर्वभ्यामल्पाच्तरमित्येत
त्पूर्वानुसारेणागम्यमानत्वाद्वन्नोन्पठितं द्वन्द्वे घीत्यस्यावकाशः पटुगुप्तावल्पाच्तरमित्यस्यावकाशः प्लक्षन्यग्रोधौ इहोभयप्राप्तावग्नि
ल्पाच्तरमित्येतद्भवति अजाद्यदंतमित्यस्यावकाशः अश्वरथेन्द्राग्नीवल्पाच्तरमित्यस्यावकाशः वागिंद्रावित्यत्रोभयप्राप्तावल्पाच्तरमित्येतद्भवति। ऋतुन
क्षत्राणामिति कृत्तिकानामानुपूर्व्यप्रादुर्भावक्रमेण नक्षत्राणामुदयक्रमेण मातापितराविति आचार्यः श्रेष्ठो गुरूणां माता त्वेके इति स्मृतिः पितुर्दशगु
णं माता गौरवेणातिरिच्यत इति च श्रद्धामेधे इति सत्योऽश्रद्धायामर्थक्रियाकरणेऽभिप्रेतस्याभ्यर्हितत्वं श्रद्धायाः॥ ॥छ॥ ॥छ॥ ॥

का.पद.
४७

दीर्घातपसीइतिादीर्घशब्दोतिपरस्य महिं तत्वं दीर्घापाः लघ्वक्षरस्य पितपसोर्विप्रतिषेधात्पूर्व्वाहिनमित्येतदेव भवति। सामानाक्षराणामित्यत्र
नास्ती।तितेनअनुनश्चत्राणामित्रे त्य चवर्णग्रहणं नदन्तमि तिभावः।वर्णानामुत्पत्तिक्रमेणानुपूर्व्व्यं अयमेव मुखतो ब्राह्मणामसृजद्बाहुभ्यां
राजन्यमूरुभ्यां वैश्यंपद्भ्यां शूद्रमिति संख्यापाअल्पीयस्या इति द्वंद्वे चाद्वंद्वे वेत्याहुः अल्पीयस इतिपाठे अल्पीयसो यस्य वाधिकायाः समर्थः।नव

दीर्घातपसी।वर्णानामानुपूर्व्येण पूर्वनिपातः।ब्राह्मणक्षत्रियविट्शूद्राः।समानाक्षराणामित्यत्र नास्ति।
भ्रातुश्चज्यायसः पूर्वनिपातो वक्तव्यः।युधिष्ठिरार्जुनौ।संख्याया अल्पीयस्याः पूर्वनिपातो वक्तव्यः।द्वित्राः।त्रि
चतुराः।नवतिशतं॥ ॥सप्तमीविशेषणे बहुव्रीहौ।सर्वोपसर्जनत्वाद्बहुव्रीहेरनियमे प्राप्ते नियमार्थं वच
नं।सप्तम्यंतं विशेषणं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यं।कंठेकालः।उरसिलोमा।विशेषणं।चित्रगुः।शब
लगुः।सर्वनामसंख्ययोरुपसंख्यानं सर्वत्र श्रेतः।सर्वकृष्णः।द्विशुक्लः।द्विकृष्णः।अनयोरेकत्र समसंप्रधा
रणायां परत्वात्संख्यायाः पूर्वनिपातः।द्व्यन्यः।त्र्यन्यः।वाप्रियस्य पूर्वनिपातः।गुडप्रियः।प्रियगुडः।सप्त
म्याः पूर्वनिपाते प्राप्ते गड्वादिभ्यः सप्तम्यंतं परं।गडुकंठः।गडुशिराः।कथं वहेगडुः।प्राप्तस्याबाधाव्याख्ये
या॥ १८॥ ॥

तिशतमितिद्वंद्वः द्वौवात्रयोवेतितुसंख्येयोनिर्दिष्टाः॥ ॥सप्तमी॥ ॥कंठेकाल इतियदा कंठे किंचिद्दृश्यत इति निरुक्तिकात इति विशेषणं प्रयु राम०
ज्यते तदा सप्तमीग्रहणेन प्रयोजनं अन्यदा तु विशेषणत्वादेव सिद्धं संप्रधारणायामिति इदमस्त्विदं वेति निरूपणासंप्रधारणा परत्वादिति। ४७
शब्दपरविप्रतिषेधादित्यर्थः एवमर्थमेव वचनं सर्वनाम्नोरिति नोक्तं गड्वादिभ्य इति गड्वादयः प्रयोगतो द्रष्टव्याः १८ ॥छ॥ ॥

॥ ॥निष्ठा॥ ॥अवमुक्तोपानत्क इति। उपः प्रमुच्यतेति लाल्क पानत्तु चेत्यादि। यथा चित्रगुरिति गुणा हूत्वशव्योहपनिपातेगुणशब्दस्य विशेषणत्वं
त्वं क्रियाशब्दस्य शाहूपोरयि क्रियाया एव विशेषणत्वं ततस्व एवं वोवासि द्धमिति भावः। विवक्षानिबंधनत्वादिति यदा कृतं किंचिदनेनेति निर्ज्ञा
तेकट इति प्रयुज्यते तदा कर्ये विशेषणमिति मन्यते कटेन कृतमिति वा विग्रहो नास्मिति। एवंविग्रहे कृतस्य विशेषणत्व शंकैव नास्तीति भावः।

॥ ॥निष्ठा॥ ॥निष्ठांतं च बहुव्रीहि समासे पूर्वं प्रयोक्तव्यं। कृतकटः। भिक्षितभिक्षः। अवमुक्तोपा =
नत्कः। आहूतसुब्रह्मण्यः। ननु च विशेषणमेव निष्ठा तत्र नियमो विशेषणविशेष्यभावस्य विवक्षा ऽ
निबंधनत्वात्। कटः कृतमनेनेति विग्रहीतव्यं। निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनं

क्वचित्तु वा शब्दो न पठ्यते तत्र विवक्षानिबंधनत्वादित्युक्तेनामेव विवक्षां दर्शयतीति व्याख्येयं जातिकालसुखादिभ्यः परवचनमिति न्यायका
न्ति द्धं जातिकालसुखादिभ्यो नाछारनादिसाहत ह्रापयति जातादिभ्यः परा निष्ठा नियततीति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

शार्ङ्गजग्धीति शार्ङ्गं जग्धमनयेति बहुव्रीहिः। कारकाच्चाल्पाख्यायामसंयोगोपधादिति ङीष्। अत्राह ननु निष्ठाशब्देनया विहिता निष्ठा तस्या ग्रह
णं तेन सुस्थितं चाह हसितमित्यादौ नपुंसके भावे क्त इत्यस्य परनिपात इति॥ ॥कडाराः॥ ॥बहुवचननिर्देशादाद्यर्थो विगम्यत इत्याह कडा

शार्ङ्गजग्धी। पलाण्डुभक्षिती। मासजातः। संवत्सरजातः। सुखजातः। दुःखजातः। कथं कृतकटः। भुक्तोद
नः। प्राप्तस्यैवाबाधायामाख्येयम्॥ ॥वाहिताग्न्यादिषु॥ ॥निष्ठेति पूर्वनिपाते प्राप्ते विकल्प उच्यते। आहि
ताग्न्यादिषु निष्ठान्तं वा पूर्वं प्रयोक्तव्यम्। आहिताग्निः। अग्न्याहितः। प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भव
त इति वक्तव्यम्। अस्युद्यतः। दण्डपाणिः। कथमुद्यतगदः। उद्यतासिः। प्राप्तस्यैवाबाधायामाख्येयम्। आहि
ताग्निः। जातपुत्रः। जातदन्तः। जातश्मश्रुः। तैलपीतः। घृतपीतः। ऊढभार्यः। गतार्थः। आकृतिगण
श्चायम्। तेन गडुकण्ठप्रभृतयः द्रष्टव्याः॥ ॥कडाराः कर्मधारये॥ ॥गुणशब्दानां विशेषण
त्वात् पूर्वनिपाते प्राप्ते विकल्प उच्यते। कडारादयः शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः। कडारजै
मिनिः। जैमिनिकडारः। कडार। गडुल। काण। खञ्ज। कुण्ठ। खोड। खलति। गौर। वृद्ध। भिक्षुक। पिङ्गल। रा॰ म॰ ४८
तनु। वटर। कर्मधारय इति किम्। कडारमुख्यो ब्राह्मणः॥ ॥इति जयादित्यकृतायां काशिकायां वृत्तौ द्वितीयस्य

रादय इति॥ ॥इति हरदत्तमिश्रविरचितायां पदमञ्जर्यां द्वितीयस्याध्यायस्य द्वितीयः पादः॥ ॥२९॥ ॥

।। ।।अनभिहिते।। ।।अनभिहितशब्दोऽयमनेकार्थः तथाहि अभिपूर्वस्य दधातेर्हिनोतेश्चेतद्रूपं भवति अभिपूर्वश्च दधातिर्वर्धनेऽपि दृष्टः अ
श्वाभिधानीमादत्त इति उच्चारणेऽपि अभिहितः श्लोक इति प्रतिपादनेऽपि अभिहितोऽर्थ इति हिनोतिरपि गतौ वृद्धौ च वर्तते इह तदस्मादर्थानां कर्मादीनां
वंधनायर्थवत्तु क्ष्यासंभवात्प्रतिपादनवचनोऽभिहितशब्द इत्याह अनभिहिते अनिर्दिष्टे अनुक्त इति विवक्षितप्रतिपादनवचनः उक्तार्थानामप्रयोग इति
यथाहामास्येनानभिहित इत्येतावत्युच्यमाने कटं करोति भीष्ममुदारं दर्शनीयमित्यत्र कटशब्दाद्विशेष्यवाचिन उत्पद्यमानया द्वितीयया ऽनवयवेन कटश
तस्य कर्मत्वस्याभिहितत्वाद्भीष्मादिभ्यो द्वितीया न स्यादिति मन्यमानः पृच्छति केनानभिहित इति। इतरोऽपि विशिष्टाभिधायकमाह तिङ्कृत्तद्धितसमासै
रिति बहुषु प्रयुक्तेषु केषांचिद्वर्जितेन केषांचित्कार्याणां प्रतिपादनं परिसंख्यानेन प्रत्युदाहरणेषु सर्वत्र द्वितीया न भवति। कटं करोति भीष्ममित्यादि

अनभिहिते।। ।।अनभिहित इत्यधिकारोऽयं वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामोऽनभिहित इत्येवं तद्वेदितव्यम्। अन
भिहिते अनुक्ते अनिर्दिष्टे कर्मादौ विभक्तिर्भवति। केनानभिहिते तिङ्कृत्तद्धितसमासैः परिसंख्यानं वक्ष्यति कर्मणि द्विती
या। कटं करोति। ग्रामं गच्छति। अनभिहित इति किं। तिङ्। क्रियते कटः। कृत्। कृतः कटः। तद्धितः। शतेन यः क्रीतः। शत्यः। श
तिकः। समासः। प्राप्तमुदकं यं ग्रामं। प्राप्तोदको ग्रामः। परिसंख्यानं। कटं करोति भीष्ममुदारं दर्शनीयं। बहुषु बहुवचनमि
त्येवमादिना संख्या वा मत्वेन विभक्तीनामुपदिष्टा।। ।।

कटः कृतो भीष्म उदारो दर्शनीय इति करोतेरुत्पद्यमानः क्तप्रत्ययोऽनवयवेन संबंधि कर्माभिधानेन द्वितीयामपीति यो मंदधीर्मन्यते तं प्रतीदं प
रिगणनं सत्स्वप्नदृष्टस्तु प्रति नव कृव्यमेव तथाहि प्रातिपदिकादुत्पद्यमाना द्वितीयायदाकारविशिष्टोऽर्थः प्रातिपदिकेनाभिधीयते तदाकारविशिष्टस्ये
व कर्मभावमाचष्टे कटशब्दे न कटत्वजातिविशिष्टोऽर्थोऽभिधीयते तेन भीष्माद्याकारविशिष्ट इति तत्प्रतिपादनाय यथाभीष्मादिशब्दप्रयोगो भवति तथा त
दाकारविशिष्टस्य कर्मत्वाभिधानाय द्वितीया भविष्यति क्तप्रत्ययस्तु प्रकृत्यर्थस्य न कर्मतामाचष्टे किं तु प्रकृत्यर्थप्रतियस्य कर्मभावस्तामिति प्रयुक्तं परत्व
वयवेन सर्वकर्माभिधानेन नुक्त कर्मादयो विभक्त्यर्थास्ते च तिङादिभिरभिहितास्ततश्चानभिहितवचनमनर्थकं अन्यत्रापि विहितस्याभावाद
भिहिते यत्राप्यनभिहिताधिकारेण क्रियते तत्रापि शब्दान्तरप्रतिपादितेऽर्थे न विविहितं भवति।। ।।छ।। ।।छ।। ।।छ।। ।।

का॰पट॰
४९

तद्यथा बहुपटुरिति बहुवोक्तत्वादीषदसमाप्तेः सत्यपि संभवे कल्पनादयो न भवंति हि दिशादिदृशाः समासेनोक्तत्वात्सुजर्थस्य सुज्न भवति
पटुगुप्तो द्वंद्वे नोक्तत्वाच्चार्थस्य च शब्देन प्रयुज्यते तद्वत्त्रापि तिङादिभिरभिहितत्वादेव द्वितीयादयो न भविष्यंति नन्वभिहितार्थस्यापि प्रयो
गो दृष्टः अपूपौ द्वाविति मत्संश्रयं तु प्रायः पदुत्ताभिहिते विहितं न स्यात् नहि प्रसमितत्याशब्दः प्रयुज्यते अपित्वर्थाभिधानाय स चेदर्थः श
ब्दांतरेणाभिहितः किमिति शब्दांतरं प्रयुज्यते अस्ति निकोच्चादिभिरप्यवगतेर्थे शब्देनैव प्रयुज्यते किं पुनः शब्देनैवाभिहितेत्र अपूपौ द्वावि
त्यादौ तु द्वावानयको द्वौ तावितिसामान्योपक्रमं वाक्यमिति यथाकथंचिदुपपादनीयं तस्मान्नार्थ एते नेत्याशंक्य संख्यापि विभक्त्यर्थ इति
दर्शयन्नाह बहुषु बहुवचनमित्येवमादिनेति। अयमर्थः त्रिकः प्रातिपदिकार्थ इत्यस्मिन्दर्शने कर्मादिष्विवैकत्वादि संख्या विभक्त्यर्थः।
तत्र कर्मैकत्वादीनां पुणपद्विभक्तिभिरभिधीयमानानां परस्परं विशेषणविशेष्यभावमनायन्त्वानां केवलप्रातिपदिकार्थानां तानामभि
धानं वृक्षएकोवृक्षः कर्मपशुरेकः पशुः करणमिति न पुनः करणभूतः पशुरेकः एकः पशुः करणमिति वाभिधानं प्रयुञ्ज्यते क्रिया
न्वयबलेन परस्परसंबंध इति प्राभाकरा मन्यंते। भाट्टास्तु परस्परासंबद्धस्य स्वतंत्रस्यानेकार्थस्याशाः पाद्याभावात्तथाभिधानदर्शने
प्येकशेषमंतरेणादर्शनाद् घने तेत्यादौ च प्रकृतिकार्ययोर्युगपल्लिङ्गाभिधीयमानयोरपि विशेषणविशेष्यभावस्य प्राभाकरैरप्यभ्युपगमात्त
द्वदेव विशिष्टाभिधानं मन्यंते। अस्माकमप्ययमेव पक्षः तत्र कर्मादयो विशेषणमेकत्वादयो विशेष्याः कर्मणि एकत्वं तत्र द्वितीयैक
वचनमिति विपर्ययो वा एकत्वादिविशिष्टं यत्कर्म तत्र द्वितीयेति तत्र यद्यपि कर्मादिप्राधान्यपक्षे तिङादिभिः प्रधानभूतानां कर्मादीनाम
भिहितत्वादप्रसंगो द्वितीयादीनां संख्याप्राधान्यपक्षे कर्मादिष्वभिहितेष्वपि प्रधानभूतसंख्याभिधानाय द्वितीयादयः स्युरेव प्राभाकरेतु राम॰
पक्षे कर्मांशे द्यंशाभिधानेपि संख्यांशस्यानभिहितस्याभिधानाय द्वितीयादयः स्युरिति॥ १ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ४९

अनभिहितकर्माद्याश्रयेष्विति। अनभिहिताः कर्मादयः आश्रया येषां तेष्विति सर्थः। एतेन कर्मणि द्वितीयासप्तमीनिर्देशः एकत्वादीनामाधारत्वान्न पुनरभि धेयत्वेनेति दर्शितं। अनभिहित इति पर्युदासप्रसज्यप्रतिषेधः स्यात्ततो द्वयोः क्रिययोः कारके अन्यतरेणाभिहिते विभक्तिर्न प्राप्नोति प्रासादं आस्ते इत्यत्र सादिक्रिया या आसिक्रियया चैकमधिकरणं प्रासादाख्यं तत्रान्यतरेण क्तप्रत्ययेन वाभिहितत्वे प्रसीदतेः सप्तमी स्यात्। कारक इति तत्राभिहितेन भवितव्यमनेन सप्तमी न स्यात्। पर्युदासे त्वासिप्रत्ययेनानभिधानं तत्र द्वितीयास्य सप्तमी सिध्यति। ननु च प्रासादाख्यस्यैकस्य कारकत्वादभिहितत्वात् सत्वं नास्तीति नैष दोषः शक्तिः कारकं तत्र सादिक्रियाशक्त्याभिधानेप्यासिक्रियाशक्तेरनभिधानं। नचैवं प्रसज्यप्रतिषेधेपि शक्तिरभिहिता तत्र पाष्ठी विभक्तिः शक्तिरनभिहिता तत्र भविष्यति। उच्यते अनभिहिते कर्मणीत्येकत्वादीनामाधारनिर्देशः स चावद्रव्यधर्मः अतो अनभिहिते कर्मणीत्यादिभिर्विशेषणैः शक्तिद्वारेण द्रव्यमेवोच्यते अनभिहि

॥ तत्र विशेषणार्थमिदमारभ्यते अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या इति २

तायाः कर्मादिशक्तेस्तदाधारभूतं यद्द्रव्यं तत्स्थेकत्वादिषु विभक्तय इति एवं च यदि प्रसज्यप्रतिषेधः स्यात्ततोभिहितशक्तिद्वारेण द्रव्यस्याभिहितत्वात्प्रतिषेधः स्यात् पर्युदासे त्वनभिहितशक्तिद्वारेण विधिरिति स्पष्ट एव फलभेदः। यद्यतर्हि शक्तिभेदो नास्ति तत्र कथं आसने आस्ते शयने शेत इति अत्र ह्यासनशयनाख्ये देशे द्वे शयनादिक्रियायोग्यं वस्तुमात्रमनूद्य तच्छक्तिकमभिहितमिति नास्य शक्त्युद्भवप्रतीयादतोऽत्र विभक्तिर्भविष्यति। पदितर्हि पर्युदासोयमिति निर्णीयते इदय कामुच्य तत्ओदन इति भुजिप्रत्ययेनाभिहितस्यौदनस्य क्त्वाप्रत्ययेनानभिधानमाश्रित्य द्वितीया प्राप्नोति भावे हि क्त्वाप्रत्ययः प्रसज्यप्रतिषेधे तु भुजिप्रत्ययेनाभिधानमाश्रित्य प्रतिषेधः सिध्यति॥ उच्यते नात्रौदनस्य युगपदुभाभ्यां शब्दाभ्यां एवाप्तिर्भावे हि क्त्वाप्रत्ययः किन्तर्हि भुजिनैव संनिधानात्तु पश्चिन्नाश्रयः केवलशब्दान्तराये क्त्वाभिधानमेवेति द्वितीया न भविष्यति अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वान्न कृतं॥ ॥७॥ ॥

का॰ प॰
५०

कटइत्यादिषुद्वितीयादयोमाभूवन्नितिसूत्रारंभःप्रदिचात्रापिस्युःक्वेदानींप्रथमास्यात्।नन्वनवकाशत्वात्प्रथमाभवंतीकृतःकटइत्या
द्यवेवभवतितिनपुनःकटंकरोतीत्यादावपीतिकुतोयंनियमःउच्यतेकुतःकटइत्यादौयद्यपिकृतशब्दसंनिधानेनकटस्यकर्मताप्रतीय
तेतथापितत्रगम्यमानत्वात्व्यतिरिक्तएवप्रातिपदिकार्थइतिप्रथमाभविष्यतियथावीरःपुरुषइतिकटंकरोतीत्यत्रतुकटशब्देनैवक
र्मशक्तिमानर्थोभिधीयतइतिव्यतिरिक्तत्वात्प्रातिपदिकार्थस्यप्रथमानभविष्यतिनन्वेकाकिषुसावकाशाप्रथमायथावृक्षइति
तन्नात्राप्यस्तीतिप्रतीतेःकर्तव्यातृतीयाप्रसंगःयत्रत्वन्याक्रियापदंनश्रूयतेतत्रान्तरंगत्वादस्तीतिगम्यतेलब्धसत्ताकस्यहिवि
शेषणान्तरयोगोभविष्यतिअथापियत्रविशेषणानांनएतेहितात्पर्येणक्रियासंबंधेयथानीलमुत्पलंनरक्तंरागतोयंपुरुषोनदेवदत्त
स्येतिनह्यत्रनीलमुत्पलमस्तीतिराज्ञःपुरुषोस्तीतिप्रतीतिःततोल्पेवाकारकमनवकाशइत्युच्यतेनएवमपिविप्रतिषेधात्प्रथमाभविष्यति
द्वितीयादीनामवकाशोयत्रप्रातिपदिकार्थस्यव्यतिरेकःकटंकरोतीतिप्रथमायास्त्वकारकमवकाशोनीलमुत्पलमितिकृतः
कटइत्यत्रोभयप्रसंगेपरत्वात्प्रथमैवैषैवभविष्यति।ननुनामपिवाबाधित्वात्षष्ठीप्राप्नोतिशेषलक्षणाषष्ठीप्रातिपदिकार्थमात्र
प्रथमाविधानपयोगाच्छेषत्वान्नभविष्यति।इहतर्हिकर्तव्यःकटइतिकृत्प्रयोगेप्रथमांबाधित्वाकर्तृकर्मणोःकृतीतिषष्ठीस्या
त्तत्प्रतिषेधार्थमनभिहिताधिकारःकर्तव्यःनदेवंसंख्याविभक्त्यर्थइत्यस्मिन्पक्षेकर्तव्यंसूत्रमिति।स्थितं॥ २ ॥ ॥छ॥ ॥ ए॰न॰

॥= =॥ ॥= =॥ ॥

५०

।।कर्मणि।। ।।द्वितीयास्यः शब्दा इति त्रिनिकाय प्रतिद्विरेवेत्यर्थः उभसर्वतसोरिति उभयसर्वशब्दयोस्तसिलंतयोः प्रयोगा इत्यर्थः उभयशब्दै
कदेश उभशब्दोनुकृतः उभशब्दस्य तसिलंतस्याभावात् तस्य द्विवचनटाविषयत्वात् । धिगित्यविभक्तिको निर्देशः आम्रेडितांतेषु धिति कृते
द्विर्वचने धित्यर्थः । उभयतः सतिरिति । पंचम्यास्तसिल् धिगितिनिपातोर्थीयं उपर्युपरीति उपर्यध्यधसः सामीप्य इति द्विर्वचनं च ततोन्यत्रापीसु
ऋंतानेकाम्यामरिगाणापति अभित इत्यादि अभितोग्राममिति उभयत इत्यर्थः परित इति सर्वत इत्यर्थः पर्यभिभ्यां चेति तसिल् आभिमुख्ये व
त्तिरपि विभक्तिप्रतिरूपको निपातोभितः शब्दो त्तिसो पिन्टस्यते समयानिकषाशब्दौ समीपवचनौ गत्येते हाशब्दः शोकादिहतिः हाकृष्ण इत्यादौ
कारकविभक्तिलाद्यंतरंगत्वात्संबोधनविभक्तिर्भवति बुभुक्षितंन प्रतिभातीति । प्रतिरत्र क्रियाविशेषकत्वादुपसर्गोन कर्मप्रवचनीय इतिप

।।कर्म्मणि द्वितीया। द्वितीयास्यः शब्दाः पूर्वाचार्यैः सुपांत्रिकेषु स्मर्यंते तैरेवात्र व्यवहारः कर्म्मणि कारके यास
स्मात्तत्र द्वितीया विभक्तिर्भवति । कटं करोति । ग्रामं गच्छति । उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडि
तांतेषु ततोन्यत्रापि दृश्यते । उभयतो ग्रामं । सर्वतो ग्रामं । धिग्देवदत्तं । उपर्युपरिग्रामं । समयाग्रामं अधिग्रामं अधो
ऽधो ग्रामं । अभितः परितः समया निकषा हाप्रतियोगेषु च दृश्यते । अभितो ग्रामं । परितो ग्रामं । समया ग्रामं नि
कषा ग्रामं । हा देवदत्तं । बुभुक्षितं न प्रतिभाति किंचित् ।। ।।तृतीया च होश्छंदसि । कर्म्मणीति वर्त्तते द्वितीयायां
प्राप्तायां तृतीया विधीयते च शब्दात् सा च भवति । छंदसि विषये जुहोतेः कर्मणि कारके तृतीया विभक्तिर्भवति
द्वितीया च । यवाग्वाग्निहोत्रं जुहोति । यवागूं अग्निहोत्रं जुहोति । छंदसीति किं । यवागू

घ्रते।। ।।तृतीया।। ।।यवाग्वाग्निहोत्रमिति । कथं पुनरग्निहोत्रशब्दो वर्त्तते हविर्विशेषे अग्निहोत्रमधिश्रयेत् अग्निहोत्रं श्रपयत इत्यादौ यस्या
ग्निहोत्रमधिश्रितमभ्यापयेत्तेसादिषु दर्शनात् जुहोतिरपि प्रक्षेपे एकस्मिन्नेव प्रयोगे यवागूशब्दात्तृतीया अग्निहोत्रशब्दाद्द्वितीया यवा
ग्वाख्यं हविर्देवतोद्देशेन प्रक्षिपतीत्यर्थः । अप्रयोगः शक्यो वक्तुं कथं अग्निहोत्रशब्दो ज्योतिष्यपि वर्त्तते अग्निहोत्रं प्रज्वलितमिति जुहोतिरपि प्री
णनेत यदा यवागूशब्दात्तृतीया तदा यवाग्वाग्निहोत्रं प्रीणयतीत्यर्थः । यदा तु द्वितीया तदा यवाग्वाख्यं च य मे स घे प मिति । दृश्यते च समे एष यज्ञः येच
+ ग्निहोत्रं हविरग्नौ प्रक्षिपतीत्यर्थः । मीमांसकास्त्वाहुः अग्निहोत्रशब्दः कर्मना

का॰ प॰ ५१

।अंतरां॥ ॥अंतरांतरेणशब्दाविलादिनतुयथान्तेनेनीविवडानेतरेतरत्राणायभवतिताहृगेततद्वयोरपिनिपातत्वव्यभिचारात् सतसाहचर्यानिजातपंलक्ष्य
तेसजातीयविजातीयभावेसजातीयप्रत्ययोभवतितद्यथागुरुभार्यागामिसुक्तेग्रहणयोरेवप्रतीतिर्भवतिनलावार्यपरशुरामयोः।यद्यंतराशब्देनाततीयांतेनसा
हचर्यंअंतरेणेत्यस्याप्यतृतीयांतस्यग्रहणंसचनिपातएव।तथांतरेणशब्देनाटावोतेनसाहचर्यादंतरेणेत्यस्याप्यतृतीयांतस्यग्रहणंसचनिपातएव।तथां
तरेणशब्देनाटावंतेनसाहचर्यादंतरेणशब्दस्याप्यटावंतस्यैवग्रहणंसचनिपातएवषष्ठ्यपवादोयोगइति।असत्यस्मिन्योगेशेषत्वात्षष्ठीप्राप्नोतिसतितुस्मि
[illegible]

॥अंतरांतरेणयुक्ते॥ द्वितीयास्यादित्येतेनतृतीया। अंतराअंतरेणशब्दौनिपातौसाहचर्यादिहयेते। आभ्यांयोगेद्वितीया
विभक्तिर्भवति। षष्ठ्यपवादोयोगः तत्रअंतराशब्दोमध्यमाधेयप्रधानमाचष्टे। अंतरेणशब्दस्तुतत्त्वविनार्थेच। अंत
रात्वांचमांचकमंडलुः। अंतरेणत्वांचमांचमांचकमंडलुः। अंतरेणपुरुषकारंनकिंचिल्लभ्यते। युक्तग्रहणंकिं। अं
तराततक्षशिलांचपाटलिपुत्रंचस्रुघ्नस्यप्राकारः॥ ॥३॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥

नुपयुक्तत्वात्षष्ठीनभवतीत्यपवादत्वमेतत्। मध्यमाधेयेति। आधेयपरतंत्रमित्यर्थः। सप्तम्यंतस्यमध्यशब्दस्यार्थेवर्ततइतिपाठवत्। अंतरात्वांचमांच सम॰
कमंडलुरिति। तवचममचमध्येकमंडलुरित्यर्थः। अत्रयथामध्यस्यावध्यपेक्षापायमवधिभूताभ्यांयुष्मदस्मद्भ्यांयोगस्तथाऽऽधारस्याधेयपरतंत्रत्वादाधे ५१
येनकमंडलुनापियोगात्ततोपिद्वितीयाप्राप्नोतिनैषदोषः कमंडलुरित्यत्रतिष्ठत्यस्तीतिवाक्रियाध्याहारानुपगात्कमंडलुःकर्तासचतिङाभिहितइतिप्रथमैव
भविष्यतिकारकविभक्तित्वात्नदेतत्सहयुक्तेप्रधानइत्यत्रोपपादयिष्यामः। निपातयोर्ग्रहणादिहनभवति। किंतेनतयोरंतरेणज्ञातेनविशेषवचनोप्यंत
रायांपुरिवसतीतिस्रुघ्नस्यप्राकारइति। नात्रस्रुघ्नशब्देनांतराशब्दार्थेनयोगः किंतर्हिप्राकारेण॥ ॥३॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥कालाध्वनो॥ ॥मासमधीतइति।ननुकर्मणएवात्रद्वितीयासिद्धाकथंकालभावाध्वगंतव्याः कर्मसंज्ञाह्यकर्मणामत्रइयंकर्मसंज्ञेवाअप्रपणा
याऽप्राप्यतेमासः आसितव्यः आसितः मासइतिकर्मणिलक्तस्कारवल्लर्थीयथास्युरिति।सत्यं इदमप्यत्रएवंवक्तव्यं द्वयगुणाभ्यामत्यंतसं
योगेद्वितीयायथास्यादिति।तत्रक्रियात्यंतसंयोगेपिपरत्वादनेनैवप्रोक्ताद्वितीयामासस्येति।कृत्वोऽर्थप्रयोगेकालेऽधिकरणेइतिषष्ठी।अ
पवर्गे॥ ॥अपवर्गः फलप्राप्तौसत्यांक्रियापरिसमाप्तिरिति।तत्रैवापवर्गशब्दोलोकेप्रसिद्धइतिभावः।कर्तृत्वमाहत्त्वाविति।हत्वादिनाकृत्वं

कालाध्वनोरत्यंतसंयोगे।कालशब्देभ्योऽध्वशब्देभ्यश्चद्वितीयाविभक्तिर्भवतिअत्यंतसंयोगेगम्यमानेक्रियागुणद्रव्यैः
साकल्येनकालाध्वनोः संबंधोऽत्यंतसंयोगः।मासमधीते।संवत्सरमधीते।मासंकल्याणी।संवत्सरंकल्याणी।मासंगुडधा
नाः संवत्सरंगुडधानाः।क्रोशमधीते।योजनमधीते।क्रोशंकुटिलानदी।योजनंकुटिलानदी।क्रोशंपर्वतः।योजनंपर्व
तः।अत्यंतसंयोगइतिकिं।मासस्यद्विरधीते।क्रोशस्यैकदेशेपर्वतः॥ ॥अपवर्गेतृतीया।कालाध्वनोः अत्यंतसंयोगइ
तिवर्त्तते।अपवर्गः फलप्राप्तौसत्यांक्रियापरिसमाप्तिः।अपवर्गेगम्यमानेकालाध्वनोरत्यंतसंयोगेतृतीयाविभक्तिर्भव
ति।मासेनानुवाकोऽधीतः।संवत्सरेणानुवाकोऽधीतः क्रोशेनानुवाकोऽधीतः।योजनेनानुवाकोऽधीतः अपवर्गइतिकिं
क्रोशमधीतोऽनुवाकः मासमधीतः कर्तृत्वमाहत्त्वोफलसिद्धेरभावात्तृतीयानभवति।मासमधीतोऽनुवाकोनचानेन
गृहीतः॥ ॥सप्तमीपंचम्यौकारकमध्ये।कालाध्वनोरितिवर्त्तते।कारकयोर्मध्येयौकालाध्वानौताभ्यांसप्तमीपंचम्यौ
विभक्तीभवतः अद्यभुक्त्वादेवदत्तोद्व्यहेभोक्ता।द्व्यहाद्भोक्ता।द्व्यहेऽद्व्यहाद्भोक्तान्कर्तृशक्त्योर्मध्येकालः।इहस्थोऽयमिष्वासः क्रो

ऽपरस्मादित्यर्थः।तत्रमध्येक्रियाविच्छिन्नेतिमध्यस्यपायोनत्वपहकेति॥ ॥सप्तमी॥ ॥कारकमध्यइतिमध्यस्यावधिद्वयापेक्षत्वाद्द्विवचनांते
नसमासः कालाध्वनोश्चेतद्विशेषणमित्याह कारकयोर्मध्येयौकालाध्वानाविति।अद्यतुक्त्वेत्यादिननुचात्रदेवदत्तएकः कर्त्तातत्कथंकारक
योर्मध्येकालइत्याह कर्तृशक्त्योरिति।स्यादेवंयद्यद्वयंकारकंस्यात्शक्तिस्तुकारकंसेहभिद्यतेएकाअद्यभुजेः साधनमपराद्व्यहभुजेः तेना
नयोर्मध्येकालइत्यर्थः॥ ॥

का॰ प्र॰ कर्तृकर्मणोरिति। इहनस्यतीतीश्वरः पुरुषः सकर्त्ता इह समनेक्ष धनेष्वानेवा। कर्मलक्ष्यं। कर्मप्रवचनीययोरिति। कर्मतदेव। सामर्थ्याद्गम्यमानं धनु
रंपाशानेपतः शरान् अधयंति। कर्माधिकरणयोरिति। कर्मतदेव। अधिकरणमिहेति निर्दिष्टः। प्रदेशः इह कालाध्वानौ द्वौ सप्तमी यं च स्यात् अपि हेतत ध्व सं
५१ ख्यातानुदेशः प्राप्नोति कालात् सप्तमी अध्वनः पंचमीति अतआह संख्यातानुदेशादिति। अस्वरितत्वादिति स्वरितेन लिंगेन यथासंख्यमिसे तन्नत्रे
व प्रतिपादितं॥ ॥यस्मादधि॥ ॥यस्मादधिकं तरस्मिन्नधिकमिति च निर्देशादधिकशब्दयोगे पर्यायेण सप्तमीपंचम्यौ भवतः। उपखार्यां द्रो
णः इति। उपोधिके चेति कर्मप्रवचनीयसंज्ञा। यस्य चेश्वरवचनमित्यादि। द्वयमनेनोच्यते द्वयोरपि भवति तत्रापि पर्यायेणेति। तत्र द्वयोरपि तावद्भवति

कर्तृकर्मणोः कारकयोः कर्माधिकरणयोर्वा मध्येको ऽः। संख्यातानुदेशो न भवत्यस्वरितत्वा
त्॥ ॥कर्मप्रवचनीययुक्ते द्वितीया॥ कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भवति। शाकल्यस्य संहितामनुप्रा
वर्षत्। आगस्त्यमन्वसिंचत्प्रजाः॥ ॥यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। कर्मप्रवचनीययुक्त इति
वर्त्तते यस्मादधिकं यस्य चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्तिर्भवति। उपखार्यां द्रोणः। उप
निष्के कार्षापणं। यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी विभक्तिर्भवति। अधिब्रह्मदत्
ते पंचालाः। अधिपंचालेषु ब्रह्मदत्त इति द्वितीयापवादो योगः॥

कथं ईश्वर उच्यते येन तदीश्वरवचनं ऐश्वर्यं। अथवा ईश्व
रशब्दो भावप्रधानः ईश्वरत्वस्मिन् ईश्वरवचनं यस्य स्वामिन ईश्वरत्वमुच्यते ततः सप्तमीत्यर्थः। अथवा यस्येति स्वनिर्दिश्यते यस्य स्वस्येश्वर उच्यते राम॰
ततः स्वात् सप्तमीत्यर्थः। पर्यायेण च भवति। शेषविषये कर्मप्रवचनीयविभक्त्यारंभात् एकत्र उत्पन्नया विभक्त्या द्विष्ठस्यापि संबंधस्याभिधानात्।
अधिब्रह्मदत्त इति। सप्तमीशौण्डैरिति समासपक्षे ब्रह्मदत्ताधीना इति भवति। विभक्त्यर्थे च तिष्ठते। अधिब्रह्मदत्तमित्यव्ययीभावः। अयं योगः शक्यो ५१
वक्तुं स्वामिन्याधारे पंचालाः स्थिताः स्वेषाधारेषु ब्रह्मदत्तः स्थित अपरादपरे धिकरणात् तत्र सप्तमी भविष्यति। एवं कृत्वा अधिरीश्वरे इति कर्मप्रवचनीयसंज्ञानवक्तव्या ए
श्वर्यविषये अधिः क्रियया न युज्यते। अनेनाप्युपसर्गत्वबाधार्थापि न युज्यते॥ ॥५॥

॥प्रतिनिधि॥ ॥यस्मादिति। अनेनैव सूत्रेण पंचमी मुख्यसदृशः प्रतिनिधिरिति मुख्यः क्वचित्कार्ये दृष्टः यस्य तदभावे तत्कार्ये प्रतिधीयते स तत्प्रतिनिधिः क
र्मणापुपसर्गयोः किः एवं प्रतिदानमित्यपि कर्मण्येव ल्युट्। दत्तस्येति। अथ यत्रानेनैव सूत्रेण पंचमी प्राप्नोति यथा यस्मादिति एवं तर्हि कर्मणि षष्ठी ननु लद
त मेव प्रत्यर्थतेति किं तर्हि द्रव्यान्तरं। सत्यं तुल्यमूल्यत्वात्तदेव प्रत्यर्पितमिति प्रतिपत्तिः प्रतिनिर्यातनं प्रत्यर्पणं अत्र भावे ल्युट्। यस्मात्प्रतिनिधिरिति सूत्रवदेव पं
चमी एवं यत्र श्लेन त्रापि अर्जुनतः प्रतीति। प्रतियोगे पंचम्यास्तसिः अर्जुनो युद्धे प्रसिद्धस्तत्सदृशोऽभिमन्युरित्यर्थः माषानित्यादि। ये पूर्वं गृहीतास्तिलास्ते

प्रतिनिधिप्रतिदाने च यस्मात्॥ मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानं। यस्मात्प्रतिनिधिर्यतश्च प्रतिदा
नं तत्र कर्मप्रवचनीययुक्ते पंचमी विभक्तिर्भवति। अभिमन्युरर्जुनतः प्रति। प्रद्युम्नो वासुदेवतः प्रति। माषानस्मै तिलेभ्यः
प्रतियच्छति। ननु च प्रतिनिधिप्रतिदाने कर्मप्रवचनीययुक्ते। न तु यतः प्रतिनिधिप्रतिदाने। संबंद्धसंबंधात्तु तस्यापि यो
गोऽस्त्येव॥ ॥गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। गत्यर्थानां धातूनां चेष्टाक्रियाणां परिस्पंदक्रियाणां
कर्मणि कारके अध्ववर्जिते द्वितीयाचतुर्थ्यौ भवतः। ग्रामं गच्छति। ग्रामाय गच्छति। ग्रामं व्रजति ग्रामाय व्रजति। गत्यर्थ
ग्रहणं किं। ओदनं पचति। कर्मणीति किं। अश्वेन व्रजति। चेष्टायामिति किं। मनसा पाटलिपुत्रं गच्छति। अनध्वनीति किं।
अध्वानं गच्छति॥ ॥७॥ ॥

भ्यो माषाः प्रतिदानं संबंधिसंबंधादिति प्रतिनिधिर्मुख्यमपेक्ष्य भवति प्रतिदानमपि पूर्वदत्तं ततश्च यस्य कर्मप्रवचनीयस्य प्रतिनिधिप्रतिदाना
भ्यां योगस्तस्य ताभ्यामपि मुख्यपूर्वदत्ताभ्यां तद्द्वारको योगोऽस्तीत्यर्थः॥ ॥गत्यर्थ॥ ॥चेष्टाक्रियाणामिति वस्तुमात्राख्यानमेतत् सूत्रे तु सप्तमी चेष्टा
यामिति। परिस्पंदनक्रियाणामिति। परिस्पंदनमेव चेष्टाशब्दः प्रसिद्ध इति भावः स्वरूपमिति वचनात्स्वरूपग्रहणाशंकायामाह॥ ॥ ॥

का॰प॰ अनध्वनीत्यर्थग्रहणमिति सप्तमीनिर्देशादिति भावः। सप्तमीनिर्देशो ह्यनध्वनि कर्मणीत्यन्वयः। नानध्वनः प्रकृतेरिति। अर्थ एव कर्मणा अध्वशब्दः। तेनाध्वपर्यायेभ्यो
ऽपि चतुर्थी न भवति। द्वितीया तु कर्मणि द्वितीयेति भवति। आस्थितः संप्राप्त इति। गन्त्राधिष्ठित इत्यर्थः। यत्र त्विति। यदोत्पथेन यं पथे वाक्रमितुमिष्यते तदा भवत्येव च
५३ तुर्थीत्यर्थः। इह कस्मान्न भवति अजां नयति ग्राममिति। अगत्यर्थत्वात् प्रतीतात्यत्र गतिर्न त्वसौ नयतेरर्थः प्रापणवाचित्वात्। इह तर्हि स्त्रियं गच्छतीति चतुर्थी
प्राप्नोति। स्त्रियं हि त्वसंप्राप्तवचनात्। असंप्राप्तं यद्वस्तु गमनेन संप्रेप्स्यते तस्मिन् कर्मणीति वक्तव्यं स्त्री तु संप्राप्तैवेति चतुर्थ्यभावः। अथ नष्टानपकादः सं
प्राप्तोऽप्यधापदात्वसंप्राप्तः संप्रेप्स्यते तदा भवितव्यमेव चतुर्थ्या सूक्तं पुरस्तात्। न चतुर्थ्येवेति नञः काकाक्षयोगाद्विकल्प्येते एनेनान्वयः कर्मणि

अनध्वनीत्यर्थग्रहणम्। पन्थानं गच्छति। मार्गं गच्छति। आस्थितप्रतिषेधश्चायं विज्ञेयः। आस्थितः संप्राप्तः संक्रान्त उ
च्यते। यत्र तूत्पथेन पन्थानं गच्छति तत्र भवितव्यमेव चतुर्थ्या। पथे गच्छतीति। द्वितीयाग्रहणं किम्। न चतुर्थ्येव
विकल्प्येत। अपवादविषयेऽपि यथा स्यात्। ग्रामं गन्ता। ग्रामाय गन्ता। कृद्योगलक्षणा षष्ठी न भवति॥ ५ ॥

चतुर्थ्यां विकल्पितायां तया मुक्ते कर्मणि द्वितीयैव द्वितीया भविष्यतीति भावः। ग्रामाय गन्तेति द्वितीयानावत्कृद्योगे षष्ठीं बाधते तथा च तुल्यबलत्वाच्चतुर्थी
द्वन्द्वेन प्रतिपादित इति चतुर्थ्यपि कृद्योगे भवतीति भावः। अयं योगः शक्यो वक्तुं कथं संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्म तत्र य
द्गमनस्य संदर्शनादीनां च स्वरूपभेदो विवक्ष्यते तदा संदर्शनादिकर्मणा गमनेनाभिप्रेयमाणस्य ग्रामस्य संप्रदानत्वाच्चतुर्थी अभेदविवक्षायां तु राम॰
गमनस्य कर्मत्वाभावाद् ग्रामः कर्मैव भवतीति द्वितीया सिद्धा नार्थ एतेनेति भाष्यकारस्य पक्षः। तत्र कृद्योगे षष्ठ्येव भवति ॥ ५ ॥ ॥ ॥ ५३
॥७ ७॥ ॥७॥ ७॥ ॥७ ७॥ ॥ ॥छ॥ ॥छ॥ ॥ ॥

॥चतुर्थी सं॰॥ ॥तादर्थ्ये इति तच्छब्देन कार्यमभिनिर्दिश्यते तस्मा इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते तदर्थस्य भावस्ताद
र्थ्यमिति ष्यञा कार्यकारणसंबंधोऽभिधीयते समासकृत्तद्धितेषु संबंधाभिधानं भावप्रत्ययेनेति वचनात् तत्र द्विष्ठत्वेऽपि संबंधस्य षष्ठीवद्विशेषणा
देव चतुर्थी भवति यूपाय दार्विति हेतुतृतीयापि विशेष्यान्न भवति हेतुहेतुमद्भावस्यापि चतुर्थ्यैव प्रत्यायितत्वात् । षष्ठीविषये च हेतुतृतीया । इह तु प्रा
तिपदिकार्थमात्रव्यतिरेकात्प्रथमैव भवति । यदिह तद्धिता तादर्थ्ये उपसंख्यानं क्रियते नार्थः संप्रदाने चतुर्थ्या योऽपि ह्युपाध्यायाय गां ददाति उपाध्यायार्थः

चतुर्थी संप्रदाने । संप्रदाने कारके चतुर्थी विभक्तिर्भवति । उपाध्यायाय गां ददाति । माणवकाय भिक्षां ददाति । देवद
त्ताय रोचते । पुष्पेभ्यः स्पृहयति इत्यादि । चतुर्थीविधाने तादर्थ्य उपसंख्यानं । यूपाय दारु । कुण्डलाय हिरण्यं । रन्धना
य स्थाली । अवहननायोलूखलं । क्लृपि संपद्यमाने चतुर्थी वक्तव्या । मूत्राय कल्पते यवागूः । उच्चाराय कल्पते य
वागूः । क्लृपीत्यर्थनिर्देशः । मूत्राय संपद्यते यवागूः । मूत्राय जायते यवागूः । उत्पातेन ज्ञाप्यमाने चतुर्थी वक्त
व्या । वाताय कपिला विद्युदातपायातिलोहिनी । पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् । हितयोगे च चतुर्थी व
क्तव्या । गोभ्यो हितं । अरोचकिने हितं ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥ ॥

स भवति । अवश्यं संप्रदानग्रहणं कर्तव्यं इह च यथा निर्माय माणवकायेत्याद्यर्थं क्लृपि संपद्यमान इति । संपत्तिरभूततद्भावो विकारोत्पत्तिरिह गृह्यते तेन
त्रयं रूपमुपजायते ततो विकारे चतुर्थी मूत्राय कल्पते यवागूरिति । प्रकृतिविकारयोर्भेदविवक्षायां चतुर्थी अभेदविवक्षायां तु मूत्रं संपद्यते य
वागूरिति प्रथमैव भवतीति केचिदाहुः । अन्ये तु भेदविवक्षायामेव चतुर्थीमिच्छन्ति पदात्तु जनिकर्तुः प्रकृतिरित्यपादानत्वविवक्षा तदा विका
रे चतुर्थी न भवतीति केचिदाहुः मूत्रं संपद्यते यवाग्वा इति । अन्ये तत्रापि चतुर्थीमिच्छन्ति मूत्राय संपद्यते यवाग्वा इति । उत्पातेनेति । प्राणिनां
शुभाशुभयोः सूचकोऽभूतविकार उत्पातः अरोचकिन इति अरुचिरोचकरोगाख्यायामिति ण्वुल् बहुलवचनाद्धस्वो लिङ्गता ॥ ॥ ॥

का॰पद॰ ५४

॥क्रियार्थे॥ ॥क्रियाक्रियार्थोपपदस्येति नतु नास्मिन्नर्थे शूराणामिति तत्राह तुमुन्ण्वुलाविति। आदिग्रहणं भावितमुपपदं क्रियार्थमन्यत्र संभवतीत्ययमेव विषयोऽवस्यते अत्र च विषये क्रियैव क्रियार्थोपपदं तेनायमर्थो लभ्यत इति भावः। यत्र गम्यते चार्थो न च प्रयुज्यते शब्दः स स्थानीति स्थानिकार्यप्रसिद्धिमाश्रित्याह स्थानिनोऽप्रयुज्यमानस्येति एधेभ्यो व्रजतीति। ननु चात्रतादर्थ्य इत्येव चतुर्थी सिद्धा इहापि तर्हि प्राप्नोति एधानाहर्तुं व्रजतीति अत्राहरणार्थी व्रजिक्रिया न पुनरेधार्था चेदुदाहरणोपि तर्ह्येवमेव एतावांस्तु विशेषः प्रत्युदाहरणे शब्दः प्रयुज्यत उदाहरणे तु नेति प्रतीयमा

क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः। क्रियाक्रियार्था उपपदं यस्य सो यं क्रियार्थोपपदः तुमुन्ण्वुलौ क्रियायां क्रियार्थायामित्येष विषयो लक्ष्यते। क्रियार्थोपपदस्य च स्थानिनोऽप्रयुज्यमानस्य धातोः कर्म्मणि कारके चतुर्थी विभक्तिर्भवति। द्वितीयापवादोयोगः। एधेभ्यो व्रजति। पुष्पेभ्यो व्रजति। क्रियार्थोपपदस्येति किं। प्रविश पिंडीं। प्रविश तर्पणं। भक्षि त्र स्थानी। ननु क्रियार्थोपपदः। कर्म्मणीति किं। एधेभ्यो व्रजति शकटेन। स्थानिन इति किं। एधानाहर्तुं व्रजति॥ ॥६॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥

राम॰ ५४

नाद्य क्रियाकारकव्यपदेशस्य निमित्तं तत्र यथा प्रत्युदाहरणे आहरणापेक्षया द्वितीया भवत्येवमुदाहरणेपि प्रतीयमानाहरणापेक्षा द्वितीयैव स्यादित्ययमारंभः। भक्षिरत्र स्थानीति। प्रविश गृहं पिंडीं भक्षयेति गम्यमानत्वात्। ननु क्रियार्थोपपद इति। यद्यपि पिंडीभक्षणार्थं गृहप्रवेशनं तथापि याविभाविकमुपपदं न भवतीति भावः। शकटेनेति। ननु भक्ष्येयवादाद्वितीयामेव च तुर्थी बाध्यते न करणात् तृतीयेऽवं तर्हि प्रत्युदाहरणं स्थापिकं दर्शितादतत्र प्रत्युदाहरणं द्रष्टव्यं ब्राह्मणास्य धेभ्यो व्रजतीति असति कर्म्मग्रहणेऽस्त्येव षष्ठी विभक्तिर्वाधियम विशेषविषयैव स्यात्॥ ६ ॥

।।तुमर्थाच्च।। ।।तुमुनासमानार्थस्तुमर्थ इति वस्तु आख्यानमेतत्। विग्रहस्तु तुमर्थोऽस्येति तुमर्थशब्देन तुमर्थो लक्ष्यते तुमर्थभाववचनप्रत्य
यान्तात् इति तुमर्थो भाववचनः प्रत्ययो तेषु तत्र थो क्तं तस्मै इत्यग्रहणमिति। स एव हि तुमर्थो भाववचनो न्यायः पाकाय व्रजतीति न च तदर्थं चतु
र्थ्येवास्ति। नन्वेवं याचको व्रजतीत्य भाववचनादपि प्रसङ्गः अत्र कर्त्तृप्रधानं न च तत्प्रतिताद् अर्थमस्ति किं तु प्रकृत्यर्थप्रति एवं तर्हि भाववचनेनैव ता
दर्थ्यस्य द्योतितत्वात् चतुर्थी न सिध्यतीति सत्यं नह्येतल्लक्षणानि ज्ञातुमर्हतीति वचनादौ नो चतुर्थी ... पाकादीनामेव तादर्थ्यप्रकाशने शक्तिरि
ति तुमर्थग्रहणं शासमकर्त्तृकथं पाकस्य योगार्थ इति। क्रियार्थोपपदग्रहणमनुवर्त्तिष्यते तेन ... निर्दिष्टं पचमानो निर्दिष्टेन नचेहार्थः अर्थाद्धि

।।तुमर्थाच्च भाववचनात्।। तुमुना समानार्थस्तुमर्थः। तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्ति
र्भवति। भाववचनाश्चेति वक्ष्यति। तस्मै इत्यग्रहणं। पाकाय व्रजति। त्यागाय व्रजति। भूतये व्रजति। संपत्तये व्रजति। तु
मर्थादिति किं। पाकस्त्यागो रागः। भाववचनादिति किं। कारको व्रजति।। ।।नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च।।
नमः स्वस्तिस्वाहास्वधालंवषट् इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। नमो देवेभ्यः। स्वस्ति प्रजाभ्यः। स्वाहाऽग्नये।
स्वधा पितृभ्यः। अलं मल्लो मल्लाय। अलमिति पर्याप्त्यर्थग्रहणं। प्रभुर्मल्लो मल्लाय। शक्तो मल्लो मल्लाय। वषड्
अग्नये। वषडिन्द्राय। चकारः पुनरस्यैव समुच्चयार्थः। तेनाशीर्विवक्षायामपि षष्ठी बाधितां चतुर्थ्येव भवति। स्वस्ति गो
भ्यो भूयात्। स्वस्ति ब्राह्मणेभ्यः।। ।।

परिणामो भविष्यति भाववचनात् इति नेनसंबंधात् न वै भाववचनस्य क्रियार्थोपप
द त्वं संभवति किं तर्हि धातोः धात्वर्थो भाववचनस्य संभवादेवं विज्ञायते क्रियार्थोपपदाद्धातोर्यो विहितो भाववचन इति।। ।।नमः स्वस्ति।। ।।अ
लमिति पर्याप्त्यर्थग्रहणमिति अलमित्यर्थग्रहणं तत्रापि पर्यायग्रहणमित्यर्थः। तत्र तावदर्थग्रहणं न संभवतीति निर्देशात् इह ह्यलंकुरुते क
न्यामित्युपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीया भविष्यतीत्येवमलमोऽनेनेत्यत्रापि करणेऽत्र तृतीयात्मा अनेनाकिं चित्ता ध्यायमित्यर्थे वा
मात् तेन भूषणाप्रतिषेधयोरग्रहणस्य पर्याप्तेरेव ग्रहणं। चकारः पुनरित्यादि। अन्यथा स्वस्तियोगे च चतुर्थ्याः अवकाशः स्वस्ति जाल्माय जाल्मा जाल्म
वाट आशीरभावाद् भूतकथनमेतत्। कुशलार्थे राशिषि चतुर्थी विकल्पावकाशोऽन्ये कुशलार्थाः कुशलं देवदत्तस्य कुशलं देवदत्ताय स्वस्ति गोभ्यो भूया

मन्यकर्म॥ ॥मन्यतेः कर्म मन्यकर्मेति। मन ज्ञान इत्यस्य दैवादिकस्य धातोः श्यना उपलक्षणं न तु प्रयोगस्य स्वरूपं न तस्यानुकरणमित्यर्थः तेन श्यनोऽभावेऽपि भवति त्वं तृणाय मन्ये रघुनन्दनोऽपि बाणो नरक्षः प्रथमान्निरास्थदिति। श्यना तु तानादिकस्य मनु अवबोधन इत्यस्यैव निरासः अनादरस्तिरस्कार इति न त्वादरणाभावमात्रं कथं अन्नतादिवन्नत्रः प्रतिपक्षवाचित्वादिति भावः ॥ मन्यकर्मणि प्रलब्ध्यकुत्सितग्रहणमिति वार्त्तिकं पठन्ति न श्चतुर्थी विधीयते न तः प्रकर्षेण तादिकुत्साप्रतिपादयितुमिष्यते तत्राच तु चतुर्थी भवति न तु सामान्यविवक्षायां तेन प्रतिषेधपुरस्कारायां कुत्सायां चतुर्थी विधा

मन्यकर्मण्यनादरे विभाषाप्राणिषु॥ ॥मन्यतेः कर्म मन्यकर्म मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवति अनादरे गम्यमाने। अनादरस्तिरस्कारः। न त्वा तृणं मन्ये। न त्वा तृणाय मन्ये। न त्वा बुसं मन्ये। न त्वा बुसाय मन्ये। मन्यग्रहणं किं। न त्वा तृणं चिन्तयामि। विकरणनिर्देशः किमर्थः। न त्वा तृणं मन्वे। अनादर इति किं। अश्मानं दृषदं मन्ये काष्ठमुलूखलं। अधाणस्त्वं सुतं मन्ये यस्य माता न पश्यति। अप्राणिष्विति किं। न त्वा शृगालं मन्ये। यदेतदप्राणिष्विति एतदनावादिष्विति वक्तव्यं। अव्यवस्थितविभाषा च ज्ञेया। न त्वा नावं मन्ये यावत्तीर्णं न नाव्यं। न त्वान्नं मन्ये यावन्न भुक्तं श्राद्धं। प्राणिषु च भवति। न त्वा काकं मन्ये। न त्वा शृगालं मन्ये इह च चतुर्थी द्वितीया च भवति। न त्वा श्वानं मन्ये। न त्वा शुने मन्ये। पुष्पदः कस्मान्न भवति चतुर्थी। एतदपि हि मन्यतेः कर्म। व्यवस्थितविभाषाविज्ञानादेव न भ

नं संपद्यत इति मत्वाह न त्वा तृणायेति मन्यकर्मण्यनादर उपमाने विभाषाप्राणिष्विति आपिशलिरधीते स्म न तत्र प्रतिषेधापेक्षा तथा वमहि अप्रयोगोऽस्मिन् दर्शनीयः। अश्मानं दृषदमित्यादि न त्वा त्वमात्मानं मतान्। यस्य माता न पश्यतीति। दर्शनयोरप्यव्यवस्थितविभाषा चेति। ननु पश्यप्राणिषु नेष्यते तेन काकादयो भविष्यन्तीति किं व्यवस्थितविभाषया। इति कारण एवात्र शास्त्रप्रयोजनं वक्ष्यति। न त्वा नावमिति नावा तार्यमुदकं नाव्यं तत्पर्यन्तं त्वेत्तीर्णमिति देवनावमपि संतीर्णा नाहं नावं मन्ये प्रयोजनस्य निष्पन्नत्वादिति भावः एवं यावद्भुक्तं श्राद्धमित्यत्रापि द्रष्टव्यं प्राणिषु तु भयमिति विषय विभागेन स्तद्यीति। एतदेव सा श्राद्धप्रयोजनमन्यत्र नावाहित्वादेवासिद्धेरित्यवोचाम॥ ७ ॥ ॥छ॥ ॥ ॥

कर्तृकरणे ॥ ॥ प्रकृत्याभिरूप इति क्रियायाश्चाश्रवणात्कर्तृकरणयोरभावात्षष्ठी प्राप्नोति प्रायेण याज्ञिका इति प्रायशब्दो बह्वर्थः बहवो याज्ञि-
का इत्यर्थः । गार्ग्योस्मीति प्रथमा षष्ठी वा प्राप्नोति समेनेति अत्र द्वितीया प्राप्नोति द्विद्रोणेनेति द्वयोर्द्रोणयोः समाहारः द्विद्रोणं पात्रादिः द्वौ द्रो-
णौ कृत्वेत्यर्थः अत्रापि द्वितीया प्राप्नोति पंचकेनेति पंच परिमाणमस्य पंचकः संघः तत्र संघसंबंधिनोरभेदविवक्षायां शितसनेनेतत्समाना-
धिकरणमित्यत्रापि द्वितीयैव प्राप्नोति । साहस्रेणेति सहस्रपरिमाणः संघः साहस्रः सर्वमस्य सर्ववत् । इत्युपसंख्यानानामीदृशमाणेस्यातिप्रापः ।
प्रत्याख्यानं तु इह तावत्प्रकृत्याभिरूप इति गम्यमानापि क्रिया करणं स्वियटेऽस्य निमित्तं इह च करोति क्रियागम्यते करणत्वं तु सुदासायचप्र
कृते ४ करणत्वे विवक्षितत्वभावेनायमभिरूपः कृतो न वस्त्रालंकारादिनेत्यर्थः । प्रायेणेत्यस्ययमर्थः अस्मिन्ग्रामे ये विप्राः संति ते बाहुल्येन यज्ञम

कर्तृकरणयोस्तृतीया ॥ कर्तरि करणे च कारके तृतीया विभक्तिर्भवति । देवदत्तेन कृतं । यज्ञदत्तेन भुक्तं । करणे ।
दात्रेण लुनाति । परशुना छिनत्ति । तृतीयाविधाने प्रकृत्यादीनामुपसंख्यानं । प्रकृत्याभिरूपः । प्रकृत्याभिरूपः ।
प्रकृत्या दर्शनीयः । प्रायेण याज्ञिकः । प्रायेण वैयाकरणः । गार्ग्योस्मि गोत्रेण । समेन धावति । विषमेण धाव-
ति । द्विद्रोणेन धान्यं क्रीणाति । पंचकेन पशून्क्रीणाति । सहस्रेण पशून्क्रीणाति ॥ ॥ छ ॥ ॥

धीयत इति तत्र याज्ञिकशब्दाभिधेयमध्ययनं प्रति बाहुल्यस्य करणत्वं संयोगी यज्ञमधीयत इत्यर्थः । इह तर्हि कियं विशिष्टत्वेष कांचित्र हृष्ट्वाध्य-
वस्यति प्रायेणायं याज्ञिक इति अत्रायमर्थः अस्मिंस्तावद्याज्ञिकानामाचारादिबाहुल्यमुपलभ्यते अतोनेनाचारादिबाहुल्येन याज्ञिकोय-
ज्ञानेनीयत इति तत्र प्रतीयमानज्ञानं प्रति करणत्वं । केचित्तु प्रायेणशब्दो विभक्तिप्रतिरूपको निपातो ज्ञातामिसस्यार्थे वर्तत इत्याहुः । इष्यते व
प्रायेणास्मामध्यविधो गुणानामिति प्रायेणा निष्क्रामति च क्रयाणामिति च गोत्रेणेति अनेनाहं ताम्रेऽनि ज्ञाना क्रियायाम् अस्मीति भावे क्रियायां
वा गोत्रस्य करणत्वं समेनेति पथो गमनकरणत्वं समेन पथेत्यर्थः द्विद्रोणेनेति द्विद्रोणपर्यंतमूल्ये द्विद्रोणास्थितद्रव्यस्य च क्रयं प्रतिकारणत्वं द्वि-
द्रोणादीनां च मूल्यं तेन द्विद्रोणाद्येव क्रीयत इत्यर्थभेदोपि नास्ति ॥ ॥

का॰ प॰ ५६

॥सहयुक्ते॥ ॥क्रियागुणद्रव्यैर्द्वयोः संबंधे सति सहशब्दस्य प्रयोगो भवति। अतः पुत्रेण सहागतः पितेत्यादौ निक्रियादिसंबंधे यथाक्रममुदा
हरणानुपपन्नत्वाभिन्नत्वात्र सर्वत्र सहार्थस्याभावाद्वे वपितुः पुत्रस्य चागमनादिना संबंधः प्रतीयते न तु कुतः। पितुः प्राधान्ये केचिदाहुः यस्य क्रियादि
संबंधो विशिष्टकालः प्रज्ञातः स प्रधानः यस्याप्रज्ञातः स यदन्यस्याप्रज्ञातविशिष्टकालक्रियासंबंधस्य तत्प्रतिपादनार्थमुपादीयते यथायं पुरुषः कदा
गत इत्यपेक्षायां राज्ञा सहागत इति पुरुषागमने विशिष्टकालमुपपादयितुं वाक्यं प्रवर्त्तत इति पुरुषस्य प्राधान्यं राज्ञस्तु फलभूतत्वेनोपात्तत्वाद
प्राधान्यमिति। एवं तु भट्टस्य सहराज्ञागत इत्यत्र न स्यात् न हि भृत्यागमनं प्रसिद्धकालं येन तत्कालत्वं राज्ञागमनस्य प्रतिपाद्येत यत्र द्वयोरप्य
ज्ञातः क्रियादिसंबंधस्तत्रापि न स्यात् पुत्रेण सहागतः पितेति तस्माद्वक्तव्यमप्राधान्यमत आह पितुरत्रेत्यादि पूर्वं प्रज्ञातो वा यस्य क्रियादिसंबं
धः शब्देनोच्यते तस्य प्राधान्यं यस्य तु सहार्थान्यथानुपपत्त्या प्रतीयते तस्याप्राधान्यं किं पुनः शब्देनोच्यते कस्य वा प्रतीयते यस्य विवक्ष्यते एतदु

॥सहयुक्तेऽप्रधाने॥ ॥सहार्थेन युक्तेऽप्रधाने तृतीया विभक्तिर्भवति। पुत्रेण सह आगतः पिता।
पुत्रेण सह गोमान्। पितुरत्र क्रियादिसंबंधः शब्देनोच्यते। पुत्रस्य तु प्रतीयमान इति तस्याप्राधान्यं॥ ८ ॥

क्तं भवति द्वयोस्तावत्क्रियासंबंधे सति सहशब्दस्य प्रयोगः तत्र यदा द्वयोरपि क्रियादिसंबंधः शब्देनोच्यते तस्य प्राधान्यं यस्य तु सहार्थान्यथानु
पपत्त्या प्रज्ञायते यो पिता पुत्रावितितदा द्वयोरपि प्राधान्यात्र भवति यदा त्वेकस्य क्रियादिसंबंधः शब्देन प्रतिपाद्यते अपरस्य सहार्थान्यथा
नुपपत्त्या तदा तस्याप्राधान्यात्तद्वाचिनस्तृतीयेति एवं वक्तव्ये सह शाखया प्रस्तरं प्रहरतीति यद्यपि प्रस्तरस्य प्रहरणसंबंधः प्रज्ञातः सूक्तवाके
न प्रस्तरं प्रहरतीति शाखायास्त्वज्ञातः तथापि सूक्तेन मायेन शाखा उद्दात्ता नीयापि स्थितिति विभक्तिव्यत्यासो न वाच्यः ननु पुत्रेण सहागत इत्य
त्रापि पितुरेव कर्तृत्वं कृदादिभिरभिधानं न त्वप्रधानस्य पुत्रादेः तस्यापि तु सहार्थसामर्थ्यात्कर्तृत्वं प्रतीयते तस्य चानभिहिते कर्तरि कर्तृकरणयो
रिति तृतीया सिद्धा। इह तर्हि पुत्रेण सहागमनं पितुरिति कर्तृकर्मणोः कृतीति षष्ठी प्राप्नोति इह च तिलैः सह माषान्वपतीति तिलानां माषान्वयती
र्थप्रतीतेर्द्वितीया प्राप्नोति। इह च पुत्रेण सह स्थूलः पुत्रेण सह गोमानिति द्रव्यगुणसंबंधप्रतिपादने एवं तात्पर्यमिति क्रियागंध एवाभा

राम॰ ५६

।सहार्थेन योगे विधानादिति। पुत्रं सह इत्यार्थग्रहणाल्लभ्यतेऽन्यथा सहेऽप्रधान इत्येव वाच्यं स्यात् विनापि सहशब्देन तद्योगे स्वेनेति निपातनादिति व्याचिम
यते। सह प्रधानवचनं प्रधाने हि स्वार्थे क्रियते पितुस्तृतीया माभूदिति। लक्षणाच्च पदिकमात्रापेक्षत्वात् तेन त्वात् सर्वथा भविष्यतीत्यार्थो प्रधानवचनेनेतिम
समासः एवं तु तत्राप्रधान इति किमिति। शिष्येण सहोपाध्यायस्य गौरिति यथा त्राप्रधाने षष्ठी विषयेऽतृतीया भवति एवं प्रधानेऽपि स्यादिति मन्यते अत्रा
हुः यथा ग्रामं नगरं गच्छतीत्यादौ ग्राम नगरयोः एवंसमभिसंबंधः पश्चात्तज्जा प्रतिषिध्यते एवमुपाध्यायस्य एवं गवा संबंधः पश्चात्तत्संबंधविशिष्टस्य
गोः सहार्थेन योगः अन्यथा कस्य सहत्वं प्रतिपाद्येत अतो गवा संबंधस्योत्तरकालत्वादुपाध्यायस्य षष्ठी भविष्यतीति नार्थोऽनेन।। ।।येनांग।। ।।अंग
शब्दोऽवयववाची प्रसिद्धस्ततश्चापसत्रार्थः स्यात् येन गुणेनांगस्यावयवस्य विकारस्ततस्तृतीयेति ततश्चाक्षि काणमस्येत्यादावेव तु स्यात् काणत्वेऽगुणत्व
चनेऽवयवस्यात्र अक्ष्णा काण इत्यादावस्यादेतत् स्यादिप्रयोगो न स्यात् यथा प्रयुज्यते। अंगशब्दोऽत्र त्यादिः अंगी अयं च प्रत्ययानतः शरीरवचनोंगशब्दः सूत्रे उपात्त
।।सहार्थेन च योगे विधानात् सत्यपि प्रयोगेऽपि भवति। पुत्रेण सार्द्धमिति। विनापि सहशब्देन भवति। वृद्धो यूनेति निर्देशनात्।।अप्र
प्रधान इति किं। शिष्येण सहोपाध्यायस्य गौः।। ।।येनांगविकारः।।अंगशब्दोऽंग समुदाये शरीरे वर्तते येनेति च तद्वयवो
हेतुत्वेन निर्दिश्यते। येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति। अक्ष्णा काणः। पादेन खंजः। पाणिना
कुणिः। अवयवधर्मेण समुदायो व्यपदिश्यते। अंगविकार इति किं। अक्षि काणमस्य।।
इत्यर्थः येनेति च यद्यपि समंगिनोंगित्वं सहेतुत्वेन निर्दिश्यते हेतुत्वेनोनिवर्तमेनेति हेतौ तृतीयेति दर्शयति विकृतेनेति साम्यर्थ्याद्वेतुत्वं लभ्यते
न यदि विकृतमंगमंगिनो विकारं प्रति हेतुः। अक्ष्णा काण इति कथं पुनः पुरुषः काणो यावता अक्षिधर्मः काणत्वं तेनास्यैव काणो भवति न पुरुषस्तत्राह
अवयवधर्मेणेति तदेवं यत्राङ्गात्तो विकारोऽवयवधर्मः समुदायस्यारोपादंगिनः प्रतिपाद्यते तत्र यदंगमनो विकारस्ततस्तृतीया भवति कथं पुनरक्षिश
ब्दः प्रयुज्यते यावता काणशब्दोऽसिगतमेव विकारमाचष्टे तत्र काण इत्युक्तेनेव संदेहो भवति किं स्वयमेव काणः किं वाक्ष्णा काणः तथेति
चेदेवं संदेहः किमक्ष्णा काणः तथोकाणः किं वा पादत्वस्येति तत्र नर्थक्योऽक्षिशब्दस्य प्रयोगः एवं पादेन खंजः पाणिना कुणिरित्यादौ द्रष्टव्यं।
उअतेत्यंगमुपक्रमेवाक्ष्णा अक्ष्णोत्युक्तेन तावते किं निरूपयति किं वा काण इति तत्र निरूपयत्यादिति न ये काणाद्वेद प्रयोगः यथा द्वागान यको
नोद्वाविनुक्तेऽत्रा ह्मणा गिरि। अंगविकार इति किमिति। अंगग्रहणं प्रतिप्रश्नः। क्वचित्तु तथैव पाठः अक्षि काणमस्येति। नन्वत्र परत्वात्प्रथमाभ
विष्यति न च समासाग्रहणे त्रैव स्यात् पुरुषोऽत्र विकारः उदाहरणे
तु गोत्राः अवयवधर्मस्यावयविन्यारोपात्।। ।। ।। ।।

का॰पद॰ ॥इत्थंभूत॥ ॥इदंशब्दात्सन्निहितवाचिनः प्रकारवचने थाल् इदमस्थमुरिति थमुप्रत्यये कृते इत्थमिति भवति न चात्र किंचित्सन्निहितमस्तीति इत्थं
५७ शब्दः सन्निहितपरित्यागेन प्रकारविशेषमाचष्टे भूः प्राप्तावात्मनेपदी वक्त्राधृष्यादिति णिज्भावपक्षे गत्यर्थत्वात् कर्तरि क्तः प्रत्ययः तदाह कंचिदिति। तस्य
इति कर्मणि षष्ठी लक्ष्यते येनेति लक्षणं येन श्वेतच्छत्रादिना राजत्वादिप्रकारविशेषो यत्र तत्तस्माल्लक्ष्यते तदित्थंभूतलक्षणं। तत्रेति वर्तमानादित्यर्थः।
कमण्डलुना छात्रमद्राक्षीदिति। छात्रेणाथ योगसिद्धो ऽन्वाचयस्य हत्वेकमण्डलुर्भवतिकमण्डलुना छात्रोपमितिज्ञानत्वादित्यर्थः यद्येवमीदृशो ज्ञाने कमण्ड
लोः करणत्वादेव तृतीया सिध्यति। एवं तर्हि परार्थं प्रमानान्तरमिति दृश्यमेवास्त्यनः गमिति विशेषं प्रति यादृपि तु वाक्यप्रयुंक्ते कमण्डलुनायं छात्र

॥इत्थंभूतलक्षणे॥ कंचित्प्रकारं प्राप्त इत्थंभूतः तस्य लक्षणमित्थंभूतलक्षणं तत्र तृतीया विभक्तिर्भवति।
अपि भवान्कमण्डलुना छात्रमद्राक्षीत्। छात्रेणोपाध्यायं। शिखया परिव्राजकं। इह न भवति। कमण्डलुपाणि
श्छात्र इति। लक्षणस्य समासे ऽन्तर्भूतत्वात्। इत्थंभूत इति किं। हेतुं प्रति विद्योतनं॥ ॥९॥ ॥

इति तदज्ञानक्रियायां अप्रतिभासात् प्रतिपाद्यत्वाच्च करणत्वासंभवः उदाहरणं त्वेवं मा रूपेयं कमण्डलुना छात्र इत्येवंरूपं ज्ञानमभूदिति। राम॰
कोऽर्थः अद्राक्षीदिति निर्दिष्टस्य द्रष्टुर्ज्ञानविशेषो ऽत्र कथमतेन प्रयोक्तुरित्यर्थः। इह न कमण्डलुपाणिश्छात्र इति बहुव्रीहौ कृते कमण्डलुशब्दात्तृ ५७
तीया प्राप्नोति न च प्रत्ययलक्षणेन प्रत्यय इति प्राप्ति प्रातिपदिकसंज्ञाप्रतिषेधः न ङिसंबुद्ध्योरिति लिंगात् न च सुपो धातुप्रातिपदिकयोरिति
संप्रयुक्तत्वात् तृतीयाया लुक् लभ्यते तेन सुपः समासप्रातिपदिकप्रत्ययत्वादित्यत आह इह न भवतीति। समासेऽन्तर्भूतत्वादिति। समासार्थ
प्रतिगुणीभूतत्वादित्यर्थः इत्थंभूतस्य लक्षणं यत्प्रधानं तत्र तृतीया बहुव्रीहौ तु वार्तिपदानां स्वार्थोपसर्जनात्मपदार्थाभिधायित्वान्नास्ति प्रा
धान्यं ॥ ९ ॥ ॥

संज्ञोऽन्य ॥ संजानीत इति संप्रतिभ्यामनाध्याने इत्यात्मनेपदं ज्ञाजनोर्जेति जादेशः । आध्याने तु अधीगर्थदयेशां कर्मणीति षष्ठी भवति मातुः सं
जानातीति कृत्ययोगे लनाध्याने पिपरत्वात् कर्तृकर्मणोः कृतीति षष्ठी भवति मातुः संज्ञातेति ॥ ॥हेतौ॥ ॥तत्प्रयोजको हेतुश्चेति शास्त्रीयस्य हे
तोश्चकारेण कर्तृसंज्ञाविधानात् कर्तृकरणयोरित्येव तृतीयायाः सिद्धत्वात् लौकिको हेतुर्गृह्यते । स चाह फलसाधनयोग्यपरत्वादि लोके यः कुशादि
कार्येषाद इने योग्यतामात्रप्रयुक्तो नाश्रितव्यापारो द्रव्यगुणक्रियाविषयो बीजादि हि हेतुः उक्तं च द्रव्यादिविषयो हेतुः कारकं नियतक्रियमिति ।
अनाश्रिते तु व्यापारे निमित्तं हेतुरुच्यत इति च उदाहरणेषु क्रियायास्त्र भावात् करणत्वमन्नाद्यं कनीयांस्यायदा विसित्रता द ... न तु मद
पि हेतुत्वमिति दाहरणस्य सामर्थ्यमेव भवति ॥ ॥अकर्त्तरि॥ ॥बंधित इति बंधेर्ण्यंतात् निष्ठांत स्वरूपं ग्रहणस्य ऋणं च भवतीति । उत्तमर्णापेक्षा

॥संज्ञोऽन्यतरस्यां कर्मणि॥ संपूर्वस्य जानातेः कर्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया विभक्तिर्भवति । पित्रा सं
जानीते । पितरं संजानीते । मात्रा संजानीते । मातरं संजानीते ॥ ॥हेतौ॥ ॥फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते । तद्वाचि
नस्तृतीया विभक्तिर्भवति । धनेन कुलं । कन्यया शोकः । विद्यया यशः ॥ ॥अकर्त्तर्यृणे पंचमी॥ ॥हेताविति वर्त्तते । कर्तृ
वर्जितं यदृणं हेतुस्ततः पंचमी विभक्तिर्भवति । तृतीयायाः अपवादः योगः । शताद्बद्धः । सहस्राद्बद्धः । अकर्त्तरीति किं शतेन बं
धितः । शतमृणं च भवति प्रयोजकत्वाच्च कर्तृसंज्ञं ॥ ॥विभाषा गुणेऽस्त्रियां॥ ॥हेताविति वर्त्तते । गुणे हेतावस्त्रीलिंगे
विभाषा पंचमी विभक्तिर्भवति । जाड्याद्बद्धः । जाड्येन बद्धः । पांडित्यान्मुक्तः । पांडित्येन मुक्तः । गुण इति किं धनेन कुलं ।
पंडितत्वात् प्रयोजकत्वाच्च कर्तृसंज्ञकमिति । तत्प्रयोजको हेतुश्चेति चकारेण ॥ अस्त्रियामिति किं । बुद्ध्या मुक्तः । प्रज्ञया मुक्तः ॥ ॥
णा कर्तृसंज्ञाविधानात् । ननु च पूर्वसूत्रे लौकिकस्य हेतोर्ग्रहणं अयं तु शास्त्रीयः शास्त्रीयस्यापि लौकिकत्वमस्त्येव । अथवा कस्य हेतोः पूर्व
सूत्रे शास्त्रीयस्याग्रहणं कर्त्तरि सिद्धत्वात् तृतीये निनन्वेवं पंचम्या असिद्धत्वादिहार्थमेव सामान्यग्रहणं स्यात् ॥ ॥विभाषा॥ ॥सत्वे निवि
शते पैतीति लक्षितस्य गुणस्य ग्रहणं तदनुरूपत्वादुदाहरणप्रत्युदाहरणयोरिति केचित् । अन्ये तु पर्वतो वह्निमान् धूमवत्वादित्यादावनेनैव
पंचमी सिद्धेतः परतंत्रमात्रस्य ग्रहणं वर्णयंति यथा घटस्य हि गुणास्य भावादिति विभाषा गुणे इति योगविभागात् नास्ति घटोऽनुपलब्धेरिति

स्त्रियामपि क्वचित् भवति केचिल्लभ्याद्वा नयं पंचमीमेतामिच्छंति तया
च नास्ति इह घटोऽनुपलब्धित इत्यपादाने वा हीयरुहोरिति तसिल् अपि भव
ति योगविभागवादिनोत्वा वादिला नसिः ॥ ॥

॥षष्ठीहेतु॥ ॥हेतुशब्दस्येति प्रयोगस्य शब्दधर्मत्वादेवमुक्तं न त्वनेनार्थग्रहणं आवर्त्यते यद्यपि प्रयोगेऽपि निमित्तकारणहेतुषु इति वक्ष्यमाणेन ष
ष्ठ्याः इष्टत्वात् हेतुशब्दस्य प्रयोगे सति हेतुहेतुमद्भावलक्षणस्यैव संबंधविशेषस्य नियमेन प्रतीतो हेतावितितृतीयापवादो योगः॥ ॥सर्वनाम्नः॥ ॥
सर्वनाम्नः इति प्रयोगापेक्षा षष्ठी सर्वनाम्नो हेतुशब्दस्य च प्रयोग इत्यर्थः चग्रहणात् तु हेतुशब्दात् स्वयं विधिर्न स्यात् कथं तर्हि सर्वनाम्नस्तृतीया भवतीति अ
त्रापि सर्वनाम्नः प्रयोग इत्यर्थो द्रष्टव्यः॥ निमित्तकारणहेतुषु इति यद्यप्येतस्मिन्न सूत्रे इदं हन्तिकोत्रायपठितं भाष्यकारेण तु हेताविस्त्र यठितत्वात्

॥षष्ठी हेतुप्रयोगे॥ ॥हेतोः प्रयोगो हेतुप्रयोगः॥ हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति। अन्नस्य हे
तोर्वसति॥ ॥सर्वनाम्नस्तृतीया च॥ ॥सर्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च। पूर्वे
ण षष्ठ्यामेव प्राप्तायामिदमुच्यते। कस्य हेतोर्वसति। केन हेतुना वसति। यस्य हेतोर्वसति येन हेतुना वसति। निमि
त्तकारणहेतुषु सर्वासां प्रायदर्शनं। किं निमित्तं वसति। केन निमित्तेन वसति। कस्मै निमित्ताय वसति। कस्मान्निमि
त्ताद्वसति। कस्य निमित्तस्य वसति। कस्मिन्निमित्ते वसति। एवं कारणहेत्वोरप्युदाहार्यं। अर्थग्रहणं चेत् तत्र पर्या
योपादानं तु स्वरूपविधिर्मा विज्ञायीति। तेनेहापि भवति। किं प्रयोजनं वसति। केन प्रयोजनेन वसति। कस्मै प्र
योजनाय वसति। कस्मात् प्रयोजनात् वसति। कस्य प्रयोजनस्य वसति। कस्मिन् प्रयोजने वसति १० राम॰

सर्वनाम्नोऽप्येतद्विभक्तिविधानं गम्यते तत्र च प्रायग्रहणादेवा सर्वनाम्नः प्रथमाद्वितीये न भवतो मा भूतां तथा दर्शनं भवंति अन्नेन कारणेन वसति अ ५८
न्नाय कारणाय वसति अन्नात् कारणात् अन्नस्य कारणेस्य अन्ने कारण इति। पर्यायोपादानं त्विति न तु विपरीतमिदं स्वरूपविधौ पर्यायोपादानं क
र्तव्यमर्थग्रहणे तु न कर्तव्यमिति किं च अर्थग्रहणे सत्येकशेषप्रसंगो विरूपाणामपि समानार्थानामेकशेषवचनात्। एवं मन्यते यथा कृतिगणे
षु केचिदुपलक्षणार्थं पठ्यंते एवमिहापि स्वरूपपरा एव निमित्तादिशब्दा उपलक्षणार्थाः एवमर्थानां ग्रहणमिति॥ १० ॥ ॥ ॥

॥अपादाने॥ ॥आगमादिति। अत्र ल्यबन्तस्याप्रयोगे ल्यबर्थो गम्यत इति द्वितीया प्राप्नोति। आसनादिति। सप्तमी अत्र प्राप्नोति प्रश्नाख्यानं तु प्रश्नस्याख्यानस्य चक्षुषा प्र
काशनं। तानेतेजसंचक्षर्वहिर्निःसरन्विषयान्गृह्णातीति निःसरणं कुचित्प्रेक्षणे ध्रुवत्वे जातेऽत्र गमनान्निःसरणं प्रति प्रासादादुपात्तविषयमपा
दानं भवति प्रासादात्प्रेक्षत इति कोर्थः प्रासादस्यप्रदेशं चाक्षुषं तेजो निःसृत्य पदार्थान्गृह्णातीति। प्रश्नाख्यानयोश्चेति विशिष्टे प्रश्नाख्याने गृह्ये
ते यत्र लोके पञ्चमी प्रयुज्यते। इहन भवति कस्याप्रयोगः मर्यादा एतोऽर्थ इति कुतो भवानिति क्रियाया अभावादनपादानत्वात्फलवद्वचनं। प्रत्यक्षादिप्रमाणासि
द्धागमनादिक्रियापेक्षस्तदं प्रयुज्यते तत्र प्रश्नो कुरा क्रमा तु श्वमन सितिपादित्तमानमागमनं प्रत्ययोहित्तक्रियमपादानं पाटलिपुत्रादीति प्रत्या

॥अपादाने पंचमी॥ ॥अपादाने कारके पंचमी विभक्तिर्भवति। ग्रामादागच्छति पर्वतादवरोहति। वृकेभ्यो बिभेति।
अध्ययनात्पराजयते। पंचमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानं। प्रासादमारुह्य प्रेक्षते प्रासादात्प्रेक्षते। अधि
करणे चोपसंख्यानं। आसने उपविश्य प्रेक्षते आसनात्प्रेक्षते। शयनात्प्रेक्षते। प्रश्नाख्यानयोश्च पंचमी वक्तव्या।
कुतो भवान् पाटलिपुत्रात्। यतश्चाध्वकालनिर्माणं तत्र पंचमी वक्तव्या। गवेधुमतः सांकाश्यं चत्वारि योजना
नि। कार्त्तिक्या आग्रहायणी मासे। तद्युक्तात्काले सप्तमी वक्तव्या। कार्त्तिक्या आग्रहायणी मासे॥ ॥

ख्यानं यतश्चेति पदद्वयविधित्वेनाध्वकालयोः परिच्छेद इत्यर्थः। गवीधुमन्नाम नगरं सांकाश्यं तथैव नां कृत्तिकायुक्तायां पौर्णमास्यां का
र्त्तिकी पौर्णमास्यां लुब्विशेष इति लुप्त भवति मासि पौर्णमासीत्यधिकारे विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्य इति निर्देशात्। अग्रहा
यनमस्यां इत्याग्रहायणी प्रज्ञादेराकृतिगणत्वात्स्वार्थिकोण् आग्रहायण्यश्वत्थादिति निपातनात्स्वत्वं। तद्युक्तादिति। तेन पंचम्यन्तार्थेनार्थ
द्वारेण युक्ता काले वर्त्तमानान्मासादिशब्दादित्यर्थः। पञ्चम्यन्तार्थेनायुक्तो योऽर्थः कार्त्तिक्यादिस्ततः परो यः कालो मासादिस्तत्र वर्त्तमानादि
त्यर्थः। अर्थतश्च परत्वं न शब्दत इति लभ्यते अपि भवति कार्त्तिक्या आग्रहायण्यो मध्यवर्त्ती मासः कार्त्तिक्याः परो भवति॥ ॥श्रीः॥ ॥छ॥

का॰प्र॰ ५९

॥अघनइतितयुक्तादिपपेक्ष्यते। प्रत्याख्यानंतुवावेकदेशस्यात्रप्रयोगः तदयमर्थः। गवीधुमतोनिःसृत्यमहाचत्वारियोजनानिगतानिभवंतिततःसांकाश्ये चतुर्षुयोजनेषुसत्सुसांकाश्यमिति। गंतानीतिचकर्मणिनिष्ठापरस्त्रजितेयोजनानिगतानिभवंतिमतस्तैःसांकाश्यमाप्यतइत्यर्थः। यद्वा अधवर्तिनोनिःसरणंगमनवा ध्वन्यारोप्यनिःसृत्यगतानीतिल्यपःकर्त्तरिक्तस्यचप्रयोगः तस्यप्रतीयमानत्वानिःसृत्येतिक्रियायेषुपायाद्दीनत्वंगतानीतिचयानिपदिकार्थस्यामतिरेकात्प्रथमागतेषुसत्स्वितियस्यचभावेनभावलक्षणमितिसप्तमी। आग्रहायण्यामासइतिकात्तिंकाःपरत्र्यमासेगतेसतिआग्रहायणीभवतीत्यर्थः। तत्राधिकृपोगलक्षणापंचमीसप्तमीएवंविता॥ ॥अन्यारादि॥ ॥अन्यइत्यर्थग्रहणमितिव्याख्यानात्। निर्दिश्यमानप्रतियोगीति। यथा

॥अघनःप्रथमासप्तमीचवक्तव्या। गवेधुमतःसांकाश्यंचत्वारियोजनानिचतुर्षुयोजनेषुवा॥ ॥अन्याराद्दितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते॥ अन्यआरात् इतर ऋते दिक्शब्द अञ्चूत्तरपद आच आहि इत्येतैर्योगेपंचमीविभक्तिर्भवति। अन्यइत्यर्थग्रहणात्तेनपर्यायप्रयोगेपिभवति। अन्योदेवदत्तात्। भिन्नोदेवदत्तात्। अर्थान्तरंदेवदत्तात्। विलक्षणोदेवदत्तात्। आराच्छब्दोदूरांतिकयोर्वर्त्तते। तत्रदूरांतिकार्थैःषष्ठ्यन्यतरस्यामितिप्राप्तेपंचमीविधीयते। आराद्देवदत्तात्। आराद्यज्ञदत्तात्। इतरइतिनिर्दिश्यमानप्रतियोगीपदार्थउच्यते। इतरोदेवदत्तात्। ऋतेइतिअव्ययंवर्ज्जनार्थे। ऋतेदेवदत्तात्। ऋतेयज्ञदत्तात्। दिक्शब्दः। पूर्वोग्रामात्। उत्तरोग्रामात्। पूर्वोग्रीष्माद्वसंतः। उत्तरोग्रीष्मावसंतात् दिक्छब्दइत्यत्रशब्दग्रहणाद्देशकालवृत्तिनापिदिक्छब्देनयोगेयथास्यात्। इतरथाहिदिक्पवृत्तिनैवस्यात्। इहपपस्मात्पूर्वेतिइहतुनस्यात् अपमस्मात्पूर्वःकालइति। अञ्चूत्तरपदः। प्राक्ग्रामात्। प्रत्यक्ग्रामात्। ननुचाप्यमपिदिक्शब्दएव। षष्ठ्यतसर्थप्रत्ययेनेतिवक्ष्यतितस्यापिपुरस्तादपकर्षः। आचू दक्षिणाग्रामात्। उत्तराग्रामात्। आहि। दक्षिणाहिग्रामात्। उत्त

देवदत्तपरइत्यनयोःप्रकृतयोरहदेवदत्तःपूर्वइतरःकालइतितस्यान्वार्थीनभवितव्यान्तती
तिचिंत्यं। अनेनपतदत्तादितिकथंयत्किंचिद्वानसूपमस्तेसोममिनिछांदसत्वात्। कथंनमामनेरामरमेनवालीतिक्ककर्मप्रध्वस्तफलतिपुरुषारधनमत्रइतिचनिरंकुशाःकवयः। उहग्रहणमितिसतिहिता स्मिन्नर्थेदिग्दृष्टःशब्दोदिक्शब्दस्तुत्तरपदलोपीसमासोलभ्यतेतनयदाकचिद्दिशिदृष्टेनसंप्रतिदेशकालवृत्तिनापियोगेभवतिग्रामात्पूर्वोदेशइत्यत्रात्पूर्वःफाल्गुनइतिअवयववाचिभिस्तुयोगेनभवतिपूर्वंकायस्येतितत्पर

राम॰ ५९

॥षष्ठ्यतसः॥ ॥अत्र तस्येति नञ्पूर्वस्याक्षिप्य तसिति रूपसंभवेपि प्रसज्यश्रुतत्वात् प्रत्ययाप्रत्ययपरिभाषया च प्रत्ययस्यैव ग्रहणमिति सिद्धं तार्थः प्रत्ययग्र
हणेन। पुरस्तादिति पूर्वाधरावराणामसि पुरधवश्चैषां। अस्ताति चेति पूर्वशब्दस्य पुर आदेशः। उपर्युपरिष्टादिति ऊर्ध्वशब्दस्योपशब्द आदेशो रिल्रिष्टातिलौ प्रत्य
यौ भवतः। ततः पश्चाद्भवतीति भाष्यकारप्रयोगात् पंचमी॥ ॥एनपा॥ ॥तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं स्वाधिकारात् तसरेणवा सह्यदि विधिनवि
रूपं भवति ततः परेणानाय मनुवर्त्तते इत्यादीनां चिंसंसाधुत्वं॥ ॥पृथग्विना॥ ॥अन्यतरस्यांग्रहणेन पक्षे यथाप्राप्तस्याभ्यनुज्ञातत्वात्तीयामुक्तेशेष

॥षष्ठ्यतसर्थप्रत्ययेन॥ ॥दक्षिणोत्तराभ्यामतसुजिति वक्ष्यति। अतसर्थेन प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति। दक्षिण
तो ग्रामस्य। उत्तरतो ग्रामस्य। पुरो ग्रामस्य। पुरस्ताद्ग्रामस्य। उपरि ग्रामस्य। उपरिष्टाद्ग्रामस्य॥ ॥एनपा द्वितीया॥ ॥
एनबन्यतरस्यामदूरेऽपंचम्या इति वक्ष्यति। तेन युक्ते द्वितीया विभक्तिर्भवति। पूर्वेणाषष्ठ्याः प्राप्तायामिदं वचनं। दक्षिणेन ग्रा
मं। उत्तरेण ग्रामं। षष्ठ्यपीष्यते। दक्षिणेन ग्रामस्य। उत्तरेण ग्रामस्य। तदर्थं योगविभागः कर्त्तव्यः॥ ॥पृथग्विनानाना
भिस्तृतीयान्यतरस्यां॥ ॥पंचमीग्रहणमनुवर्त्तते। पृथक् विना नाना इत्येतैर्योगे तृतीया विभक्तिर्भवति अन्य
तरस्यां पंचमी च। पृथक् देवदत्तेन। पृथक् देवदत्तात्। विना देवदत्तेन विना देवदत्तात्। नाना देवदत्तेन। नाना दे
वदत्तात्। पृथक् विनानाभिरिति योगविभागो द्वितीयार्थः। विना वातं विना वर्षं विद्युत्प्रपतनं विना। विना हस्तिक
नाद्दोषान्केनेमौ पातितौ द्रुमौ॥ ॥छ॥ ॥छ॥ ॥

त्वात्पक्षे षष्ठी प्राप्नोति। अथ स्यात् अनेकार्थत्वान्निपातानामन्यतरस्यांग्रहणं समुच्चयार्थं न विकल्पार्थमिति एवमप्यनंतरा द्वितीया समुच्चीयेत अथापि
योगविभागेनास्याः अपि सिद्धिः एवमपि तदनन्तरा षष्ठी समुच्चीयेत न कथं च न पंचमी स्याच्चेष्यते तत् कथमित्याह पंचमीग्रहणमिति इहेति नः पूर्वयोर्योगयोः
पंचम्या तयोरधिकाराभावं तियवत्तु ह्यनुवृत्तिसामर्थ्यात्पंचमी अन्यतरस्यांग्रहणं न हि किमर्थं समुच्चयार्थं तत्र किं समुच्चीयत इत्यपेक्षायां पंचमीग्रहणमि
हानुवर्त्तत इत्युक्तं योगविभागः कर्त्तव्य इति। असत्यपि मुक्तिरुपवचने अयोगवाक्यात् देवं आरभ्यते॥ ॥छ॥ ॥छ॥ ॥ ॥

॥करणे च॥ ॥यदा धर्ममात्रमिति। यथा योग्ह्यं स्तोकादि मयदेश मामारयतितेषुणा धर्मः उभयवचनाश्चेते इत्यमाद्व गुणं चस्तोकादिवत् यदा गुणाव
चनास्तदा सत्ववचनतेत्यर्थः॥ क्रियाविशेषणे कर्मणीति आख्यातेन हि क्रियासाध्यमाना तस्योच्यते चलति चलनं करोतीति अनन्तद्विशेषणस्तोकादि
कर्म भवति स्तोकं चलनं करोतीति। एवं तु विशेष्यवचन स्तोकशब्दो द्रव्यवचन इति नात्र प्रसंगः। यत्र च फलांतरसाधनं प्रतिधात्वर्थः करणतया विवक्ष्यते
तत्र विशेषणत्वं न स्यात् शाम्यनं ज्योतिष्टोमेन स्वर्गकामो यजेतेति अत्र हि यथा फलभावनायां करणभूतस्य यागस्याभिधायक ज्योतिष्टोमशब्दस्तती
या भवति तथा तद्विशेषणस्तोकादेरपि स्यात्। अग्निमस्त्वाहं संदर्शनं प्रार्थना व्यवसायेराध्यमानत्वात् क्रियायाः कर्मत्वात् तद्विशेषणस्य कर्मत्वं स्यात्

॥करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य॥ स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्यो सत्ववचनेभ्यः करणे कारके न्य
तरस्यां तृतीया भवति। पंचम्यपि पक्षे विधीयते तृतीया तु करणत्वेव सिद्धा। यदा तु धर्ममात्रं करणतया विवक्ष्यते तेन द्रव्यं त
दा स्तोकादीनामसत्ववचनता स्तोकान्मुक्तः स्तोकेन मुक्तः अल्पान्मुक्तः अल्पेन मुक्तः कृच्छ्रान्मुक्तः कृच्छ्रेण मुक्तः कति
पयान्मुक्तः कतिपयेन मुक्तः असत्ववचनस्येति किं स्तोकेन विषेण हतः अल्पेन मधुना मत्तः करण इति किं क्रियावि
शेषणे कर्मणि मा भूत् स्तोकं पचति॥ ॥दूरान्तिकार्थैः षष्ठ्यन्यतरस्यां॥ पंचम्यनुवर्तते दूरान्तिकार्थैः शब्दैर्योगे ष
ष्ठी विभक्तिरन्यतरस्यां पंचमी च। दूरं ग्रामात् दूरं ग्रामस्य विप्रकृष्टं ग्रामात् विप्रकृष्टं ग्रामस्य। अंतिकं ग्रामात् अंतिकं ग्रा
मस्य अभ्याशं ग्रामात् अभ्याशं ग्रामस्य अन्यतरस्यां ग्रहणं पंचम्यर्थं इतरथा हि तृतीयापि पक्षे स्यात्॥ १२ ॥ ॥

दितित्तस्यापि संदर्शनादीनां क्रियायाश्चाभेदविवक्षायां कर्मत्वं न स्यात् न हि तत्र क्रियायाः कर्मत्वमस्ति॥ ॥दूरान्तिकार्थैः॥ ॥पक्षे पंचम्यर्थं वचनं ष
ष्ठी तु शेषत्वादेव सिद्धा यद्येवमन्यतरस्यां ग्रहणमनर्थकं षष्ठीमात्रवचने वैयर्थ्यादेव प्रकृता पंचम्यपि विधास्यते तत्राह अन्यतरस्यां ग्रहणमिति व
चनसामर्थ्याद्धि प्रकृतविधाने विज्ञायमाने तृतीयाया अपि विधिः स्यात्। ननु कृतमप्यन्यतरस्यां ग्रहणं विकल्पार्थं समुच्चयार्थं वा विकल्पार्थेता
वत्सवा मुक्तेस्यादि सन्नेणा प्राप्ताः सर्वा एव विभक्तयः स्युः समुच्चयार्थेपि प्रकृतात् तृतीया कस्मान्न समुच्चीयते। उच्यते। इयष्विनानानाभिरित्यत्र तृतीया
दन्यतरस्यां ग्रहणेन पंचमी समुच्चीयत इत्युक्तं अतः स्थायेकमव्यवहितकत्वात् सैव समुच्चीयते। अतस्तात्पर्येण बोद्धव्यं अन्यतरस्यां ग्रहणे प्रकृते पुनरन्यत

॥ गदूरांति॥ ॥ प्रातिपदिकार्थे विधानमिति। अर्थान्तरस्यानिर्दिष्टत्वादिति भावः। नन्वनिर्दिष्टे पदार्थान्तरस्य शेषविषये पूर्वविभक्तिविषये च विधानमेतद्युक्तं प्रथमाविष
ये तु परत्वात्सैव प्राप्नोतीति नैष दोषः। उत्तरत्राप्येतदनुवर्तत इति तेनोत्तरविभक्तिविषयेऽपि सर्वत्र यथाभिधानं भवति तथा च दूरादावसथान्मूत्रमित्यस्मिन्नधिकरणेऽपि भवति
आवसथस्य दूरे इत्यर्थः। प्रातिपदिकार्थे विधानमित्येतत्तु द्वात्[illegible]विषयं द्रष्टव्यं। तथा च सत्त्ववचने यथायथं विभक्तयो भवन्तीति वक्ष्यति प्रातिपदिकार्थस्य त्वनुवि
धाने यथायथमित्यनुपपन्नं प्रथमैव भवतीति वाच्यं स्यात्॥ ॥सप्तम्य॥ ॥क्तस्येन्विषयस्येति। इन्नन्तः शब्दो विषयो यस्य क्तस्य तस्येत्यर्थः। अधीती
व्याकरण इति। अधीतमनेनेति विगृह्य इष्टादिभ्यश्चेतीनिः। इष्टादिभ्यश्चेति इनिप्रत्यये कृते तेन द्वितीयार्थे कर्त्रा सह एकीभूतस्याधीतस्य निर्दिष्टत्वाद्व्या

॥ दूरान्तिकार्थेभ्यो द्वितीया च। पञ्चम्यनुवर्तते। दूरान्तिकार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति। पञ्चमी तृतीया च समु
च्चीयते। दूरं ग्रामस्य दूराद्ग्रामस्य। दूरेण ग्रामस्य। अन्तिकं ग्रामस्य अन्तिकाद्ग्रामस्य। अन्तिकेन ग्रामस्य। प्रातिपदिकार्थे वि
धानं असत्त्ववचनग्रहणं चानुवर्तते। सत्त्वशब्देभ्यो यथायथं विभक्तयो भवन्ति। दूरः पन्थाः। दूराय पथे देहि। दूरस्य पथः स्व
॥ ॥ सप्तम्यधिकरणे च॥ ॥ सप्तमी विभक्तिर्भवत्यधिकरणे कारके। चकाराद्दूरान्तिकार्थेभ्यश्च। कटे आस्ते। शकटे आस्ते
। दूरे ग्रामस्य। अन्तिके ग्रामस्य। दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयो भवन्ति। द्वितीया तृतीया पञ्चमी
सप्तम्यः। सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानं। अधीती व्याकरणे। परिगणिती याज्ञिके। आम्नाती छन्द
सि। साध्वसाधुप्रयोगे च सप्तमी वक्तव्या। साधुर्देवदत्तो मातरि। असाधुः पितरि॥ ॥

करणादिना संबन्धाभावात्कथं सप्तम्येनानभिहिते व्याकरणादेर्गुणभूतयापि प्रकृतिवाच्ययाऽध्ययनक्रिययाऽधीतवान्व्याकरणमिति व्याकरणं कर्म तया संबध्यमानेन हि
न एव किंट मिति वद्द्वितीयायां प्राप्तायां सप्तमी विधीयते। इह मासमधीती व्याकरण इति कालकर्मणो बहिरङ्गत्वात्सप्तम्यभावः। साधुर्देवदत्तो मातरीति। अ
त्र साधुत्वासाधुत्वयोर्मातापितृविषयत्वेऽपि क्रियाया अभावादधिकरणत्वाभावादुक्तं। साधुनिपुणाभ्यामित्येव सिद्धे न चार्थमत्रासाधुग्रहणं तेन तत्त्वकथ
नेऽपि भवति अर्चाग्रहणं तत्र निपुणार्थं कथं तर्हि तत्र प्रत्युदाहरिष्यते अर्चायामिति किं साधुर्भृत्यो राज्ञ इति उक्तं ते राज्ञो भृत्येन सह शाठ्ये न पोन साधुना राज्ञो यो
भृत्यः स असाधुरिति तत्र राजनि गन्तव्यमेवेति नेतच्छब्देनच्छ उपते प्रत्यासत्त्या तु राजविषयमेव साधुत्वं गम्यत इत्येतावता तत्प्रत्युदाहरणं द्रष्टव्यं॥ ॥ ॥

का·पद०
६१

कारकार्हाणामिति। कारकशब्दोऽत्र साधनः कारकत्वार्हाणामित्यर्थः ऋद्धेष्विति ऋद्धा भोजनक्रियामर्हन्तीति कारकार्हाः। लक्ष्यलक्षणभावाविवक्षाया
मपि यथा स्यादिति वचनं दरिद्रेष्वासीनेष्विति दरिद्रा भोक्तुं नार्हन्तीत्यकारकार्हाः। तद्विपर्यासे चेति कारकार्हाणामकारकत्वे अकारकार्हाणां च कारकत्वे इत्य
र्थः। निमित्तात् कर्मयोग इति यत् क्रियाप्रयोजनं यदर्थं क्रियारम्भस्तत्फलमिह निमित्तं तद्वाचिनः सप्तमी भवति यदि तस्य निमित्तस्य कर्मणा कर्त्तुरीप्सित
तमेन सह समवायादिलक्षणः संबंधो भवतीत्यर्थः तत्र हेतुतृतीयायां प्राप्तायां वचनं तत्र हन्तीति कर्मणा द्वीप्यादिना चर्मादेर्निमित्तस्य समवायः संबंधः च

कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या। ऋद्धेषु भुंजानेषु दरिद्रा आसते। ब्राह्मणेषु तरत्सु वृषला आसते। अकारकार्हा
णां च अकारकत्वे सप्तमी वक्तव्या। दरिद्रेष्वासीनेषु ऋद्धा भुंजते। वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति। तद्विपर्यासे च सप्तमी व
क्तव्या। ऋद्धेष्वासीनेषु दरिद्रा भुंजते। ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति। निमित्तात् कर्मसंयोगे सप्तमी वक्तव्या। चर्मणि द्वी
पिनं हन्ति दन्तयोर्हन्ति कुंजरं। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥ ॥यस्य च भावेन भावलक्षणं॥ ॥सप्तमी निवर्त्त
ते। भावः क्रिया। यस्य च भावेन यस्य च क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति प्रसिद्धा च क्रिया क्रिया
न्तरं लक्षयति। गोषु दुह्यमानासु गतः। दुग्धास्वागतः। अग्निषु हूयमानेषु गतः। हुतेष्वागतः। भावेनेति किं। यो जटाभिः स
भुक्तो। पुनर्भावग्रहणं किं। यो भुंक्ते स देवदत्तः॥ १२ ॥ ॥

मरीमिति चमरशब्दाज्जातिलक्षणो ङी पुष्कलकः शंकुः सीम्नि सीमाज्ञानार्थं हतो निखातः इत्यर्थः तेन च निहन्यमानेन शंकुना सीम्नः संयोगः संबंधः
कर्मसंबंध इति किं वेतनेन धान्यं लुनाति॥ ॥यस्य च॥ ॥इह भूयोदर्शनाश्रयो लक्ष्यलक्षणभावो यथाग्निधूमयोः ततश्चोदितश्चादित्ये तमो नष्टं उदि
ते चंद्रमसि समुद्रः प्रवृद्ध इत्यादावेव स्यात् इह त्वग्निषु हूयमानेषु गत इत्यग्निहवनं यद्गमनेन सह पुनः पुनर्न दृष्टचरं तदा न तत्तस्य लक्षणमिति इह न स्यादि
त्याशंक्याह प्रसिद्धा च क्रियेति प्रसिद्धिरेव क्रियायाः क्रियान्तरलक्षणत्वे उपयुज्यते न पुनर्दर्शनं एतदुक्तं भवति निर्ज्ञातकाला क्रिया निर्ज्ञातायाः क्रि
यायाः सकृदपि कालपरिच्छेदहेतुत्वेनोपात्ता भवत्येव लक्षणमिति॥ ॥ १३ ॥ ॥

राम०
६१

॥षष्ठी च॥ ॥अनादर इति पूर्वेण सप्तमी एतच्च भावलक्षणभावस्य विशेषणं यस्य चानादरे सति भावलक्षणः सोऽनादरे सति भावलक्षणः सोऽनादराधिको भव
तीत्याह अनादराधिक इति अनादरविशिष्टे नाद्रियमाण इत्यर्थः॥ रुदतः प्राव्राजीदिति पित्रादिकं रुदन्तमनादृत्य प्रव्रजितो भूतवानित्यर्थः॥ ॥स्वामीश्वर॥ ॥

॥षष्ठी चानादरे॥ पूर्वेण सप्तम्यां प्राप्तायां षष्ठी विधीयते चकारात्सापि भवति अनादराधिके भावलक्षणे भाववतः षष्ठी
सप्तम्यौ विभक्ती भवतः रुदतः प्राव्राजीत्। रुदति प्राव्राजीत्। क्रोशतः प्राव्राजीत्। क्रोशति प्राव्राजीत्। क्रोशन्तमनादृत्य
प्रव्रजित इत्यर्थः॥ ॥स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च॥ षष्ठीसप्तम्यौ वर्तेते। स्वामिन् ईश्वर अधिपति दा
याद साक्षिन् प्रतिभू प्रसूत इत्येतैर्योगे षष्ठीसप्तम्यौ विभक्ती भवतः। गवां स्वामी। गोषु स्वामी। गवामीश्वरः। गोष्वीश्वरः। गवा
मधिपतिः। गोष्वधिपतिः। गवां दायादः। गोषु दायादः। गवां साक्षी गोषु साक्षी। गवां प्रतिभूः। गोषु प्रतिभूः। गवां प्रसूतः।
गोषु प्रसूतः। षष्ठ्यामेव प्राप्तायां पक्षे सप्तमीविधानार्थं वचनं॥ ॥आयुक्तकुशलाभ्यां चासेवायां॥ ॥षष्ठीसप्तम्यौ
वर्तेते। आयुक्तो व्यापारितः। कुशलो निपुणः। ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः। आ
सेवा तात्पर्यं। आयुक्तः कटकरणस्य। आयुक्तः कटकरणे। कुशलः कटकरणस्य। कुशलः कटकरणे। आसेवायामि
ति किं। आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः। तत्र सप्तम्येवाधिकरणे भवति॥ ॥यतश्च निर्धारणं॥ ॥षष्ठीसप्तम्यौ
वर्तेते। जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतो निर्धार्यते ततः षष्ठीसप्तम्यौ विभक्ती भवतः।
मनुष्याणां क्षत्रियः शूरतमः मनुष्येषु क्षत्रियः शूरतमः। गवां कृष्णा संपन्नक्षीरतमा। गोषु कृष्णा संपन्नक्षीरतमा॥
अध्वगानां धावन्तः शीघ्रतमाः॥ अध्वगेषु धावन्तः शीघ्रतमाः॥ ॥

गवां दायाद इति दीयत इति दायः अंशः दायमादत्त इति सोऽयमुपसर्गादपि दायाद्यं दायाद इति निपातनात्। गवामित्येतत्समुदायस्य विशेषणमवयवम
पि दायांशं स्पृशतीति गवात्मकस्य दायस्य दाता तस्य अयमर्थो भवति गवां प्रसूत इति गावस्तेनानुभवितुं जाता इत्यर्थः॥ ॥आयुक्त॥ ॥आयुक्तो गौः शक
ट इति। आ ईषदर्थे ईषद्युक्त इत्यर्थः॥ ॥यतश्च॥ ॥जातिगुणक्रियाभिरिति प्रदर्शनमेतत्। अमीषां छात्राणां देवदत्तः पटुरिति संज्ञयापि निर्धारणदर्शनात्॥ ॥

का॰प॰
६२

पंचमी॥ ॥विभक्तमस्यास्तीतिनिर्द्धार्यमाणात्तएतदुक्तंभवतिनिर्द्धार्यमाणस्यनिर्द्धारणाश्रयस्यचविभागोस्तीतिनिर्द्धारणंभवतिततश्चसर्वत्रैवनिर्द्धारणा
श्रयेविभक्तमस्तीतिसामर्थ्यादवधारणमाश्रीयतेयस्मिन्निर्द्धारणाश्रयेविभागएवनकेनचिदात्मभावइतितेनगवांकृष्णोत्यादौयद्यपिगोमंडलात्कृष्णा
गोःपृथक्क्रियतेतथापिगवात्मनांतर्भावोस्तीतिनभवति।उदाहरणेतुमाथुराणांपाटलिपुत्रेषुप्राणित्वेनांतर्भावेपिदेशाद्युपाध्याकारायेक्षयानंतर्भावाद्वि
भागएवेतिप्रत्याख्यातंचैतत्सूत्रमपादानप्रकरणेबुद्ध्यासमीहितैकत्वान्मंचालानकुरुभिःपृथक्कृत्वाविभजतेवक्तातदापायःप्रतीयतइति॥ ॥सा

॥पंचमीविभक्ते॥ ॥यतश्चनिर्द्धारणमितिवर्त्तते।षष्ठीसप्तम्योरपवादोयोगः।विभागोविभक्तं।यस्मिन्निर्द्धारणाश्रयेविभक्तमस्तिततःपंचमीविभक्तिर्भवति।माथुराःपाटलिपुत्रेभ्यःसुकुमारतराः।आढ्यतराः॥ ॥साधुनिपुणाभ्यामर्चायांसप्तम्यप्रतेः॥ ॥साधुनिपुणइत्येताभ्यांयोगेअर्चायांगम्यमानायांसप्तमीविभक्तिर्भवतिनचेत्प्रतिःप्रयुज्यते।मातरिसाधुःपितरिसाधुः।मातरिनिपुणः।पितरिनिपुणः।अर्चायामितिकिं।साधुर्भृत्योराज्ञस्तत्वकथनेनभवति।अप्रतेरितिकिं।साधुर्देवदत्तोमातरंप्रति।अप्रत्यादिभिरितिवक्तव्यं।साधुर्देवदत्तोमातरंपरि।मातरमनु॥ ॥प्रसितोत्सुकाभ्यांतृतीयाच॥ ॥प्रसितउत्सुकइत्येताभ्यांयोगेतृतीयाविभक्तिर्भवतिचकारात्सप्तमीच।प्रसितःप्रसक्तोयस्तत्रनित्यमेवावबद्धःसउच्यते।केशैःप्रसितः।केशेषुप्रसितः।केशैरुत्सुकः।केशेषूत्सुकः॥ १४ ॥ ॥

धुशब्दःकृवापाजिमिस्वदिसाध्यशूभ्यउणंतःपुणाकर्मणिशुभइत्यस्मान्निपूर्वादिगुपधेतिकेनिपुणइतिभवति।अर्चपूजायामित्यस्माद्गुर्वादिकाद्गुरोश्चहलइत्यका
रःचौरादिकात्तुयुचाभाव्यं।अप्रतेरित्यत्रप्रयोगइत्यध्याहार्यंतदाहनचेत्प्रतिःप्रयुज्यतइति।साधुर्भृत्योराज्ञइतिपूर्वमेवैतद्दूषितमुपपादितंच।निपु
णःपुत्रोमातुरितितुतत्वकथनेप्राप्यंप्रत्युदाहरणं॥ ॥प्रसिते॥ ॥षिञ्बंधनेप्रकर्षेणबद्धःप्रसितःतदाहयस्तत्रनित्यमवबद्धइतिनित्यमि
त्यनेनप्रशब्दस्यार्थमाचष्टेअवबद्धइत्यवबद्धःयोहिपत्रप्रसक्तःसतत्रावबद्धइवभवतीतिभावः।तेनप्रकर्षेणसितःभुक्तइत्यस्यग्रहणंनभवतीति
प्रदर्शितंभवतिकेशेषुप्रसितइतितत्परइत्यर्थः॥ १४ ॥

श्री॰दर्श॰
६२

॥ ॥नक्षत्रे॥ ॥नक्षत्रेप्रकृत्यर्थेसतियोलुप्लुप्संज्ञयालुप्यमानस्यप्रत्ययस्यार्थस्तत्रवर्तमानादितिसूत्रार्थस्तत्रान्वयः यच्चोक्तंतेनसूत्रेलुपीतिपंचम्य
र्थेसप्तमीलुबंतान्नक्षत्रवाचिनइत्यर्थ इतितत्रोत्तरमाह पुष्यफल्गुनीभ्यांनोत्तरांगच्छेदितिविशेषणान्नस्यात्लुप्लुबंतत्वात्कथंतर्हिलुबंतान्नक्षत्राभिधा
यिनः शब्दादितिचेत् प्रायोवृत्त्येतदुक्तंलुबंतार्थाभिधायीप्रायेणालुबंतोभवतिलुबर्थाभिधायिनः शब्द मात्रादित्यर्थः लुबंतादितिलुबंतेसप्तम्याव
स्येतिबहुव्रीहिः स्यान्निर्धारकेचलुप्योंसावयववत्त्वंइष्टमेव अधिकरणइतिवर्ततइति एवंचपुष्यभतीक्ष्णतेपुष्यासमूहपतिपुष्यस्यसमीपस्मादवयविनिभव
ति॥ ॥प्रातिपदिक॥ ॥प्रातिपदिकार्थः सत्तेतिअत्रजिज्ञासितस्येदंलक्षणंनप्रातिपदिकार्थमात्रस्यगौः शुक्लः पाचकोडित्थइत्यादावसंभवात्तथार्थः
सत्तैवकेवलंनजातिसाहित्येनलिंगसंख्याकार कृदादिप्रयोगीसहप्रातिपदिकार्थत्वेनविवक्षितोयथाभयार्थइत्यर्थः ॥अथयार्थोहिकेवलमस्तीतिश

॥नक्षत्रेचलुपि॥ तृतीयासप्तम्यावनुवर्तेते। लुबंतान्नक्षत्रशब्दात् तृतीयासप्तम्यौविभक्तीभवतः। पुष्येणपायसमश्नी
यात्। पुष्येपायसमश्नीयात्। मघाभिःपललौदनं मघासुपललौदनं। नक्षत्रइतिकिं। पंचालेषुवसति। लुपीतिकिं। मघासु
ग्रहः। इहकस्मान्नभवति। अद्यपुष्यः। अद्यकृत्तिका। अधिकरणइतिवर्ततेवचनंतुयत्रतृतीयाविधानार्थं॥ ॥प्रातिपदि
कार्थलिंगपरिमाणवचनमात्रेप्रथमा॥ ॥प्रातिपदिकार्थः सत्ता। लिंगंस्त्रीलिंगपुल्लिंगनपुंसकानि। परिमाणं। द्रोणः
खारी आढकं। वचनमेकत्वद्वित्वबहुत्वानि। मात्रशब्दः प्रत्येकमभिसंबध्यते। प्रातिपदिकार्थेलिंगपरिमाणवचनमात्रे
११ प्रथमाविभक्तिर्भवति। प्रातिपदिकार्थे॥ ॥

मात्रेवक्तुंनपुनरीदृशात्तादृशइतिगौः शुक्लइत्यादौतुसत्त्वरूपेर्थेलिंगग्रहणादेवसि
ध्यतीतिभावः। अन्येत्वाहुः अन्वयव्यतिरेकाभ्यांयस्यार्थः प्रातीयमर्थंप्रातिपदिकंनव्यभिचरतियेनक्रियाप्रातिपदिकस्याप्रयोगः ससर्वः प्रा
तिपदिकार्थः सत्ताग्रहणंतूपलक्षणंतेनसत्तागौस्त्रीकंस्त्रीशुक्लोगुणः पाचकोडित्थोगौः शुक्लइत्यादिकमप्युदाहरणमिति। नचयत्रसर्वत्रलिं
गग्रहणादेवसिद्धंतमात्रग्रहणंक्रियतेतच्चावधारणार्थंपयोमात्रंप्रयतीतिवत् ततःस्त्रीयुमाभवतीत्युच्यतेइहं नपुंसकमित्यादावेवतुस्मात् यत्रलिंग
मेवार्थः सत्तेत्यादौतुजातादिप्रातिपदिकार्थमप्रात्यगान्नस्यात् अथकन्यामात्रंवदतइत्यतीतिवन्मात्रशब्दस्यप्रतिवचनत्वात् लिंगमात्रेप्रथमालिंगमस्त्येवप्रथ
माभवतीतिप्राप्यानादप्रातिपदिकार्थमप्राप्तेपिप्रथमाभवतीत्युच्यतेहंतेवंहसंयत्स्वरूपेसाटीकर्मादिसप्राप्तेपिलिंगमस्तीसेवप्रथमास्यातकर्मण्येवाङ्गीकारेस
स्मिन्न्याययनियमपक्षेकर्मादौनाद्वितीयादिप्रनियतत्वात् वचनमेकत्वादीति पूर्वाचार्यप्रसिद्धेरितिभावः॥

उच्चैरिति। अत्र प्रथमायां सत्यां ग्रामउच्चैस्तत्रस्वमित्यादौ न स्यात्। प्रथमाया विभाषेति तेन प्रथमायाः विकल्पो भवति पदत्वं तु षष्ठ्यापि सिद्धं प्रथमा द्वितीयाद्यर्थे न विहिताः सङ्ख्येयं न त्वसंख्येयत्वात्‌ अयमर्थः कथं षष्ठी स्यात्‌ उच्यते। एकत्वाद्यर्थ नियमे षष्ठ्याः संख्यायाम नियतत्वात्‌ प्रत्यय नियमे पि तुल्य
जातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परमेवव्यावर्तनात्‌। विधिवाक्ये तु स्वादिसूत्रेणा सह भिन्नवाक्यत्वं द्व्येकयोर्द्विवचनमित्यादेः संख्या संभव
विषयत्वात्‌। ननु प्रातिपदिकात्स्वादयो विधास्यन्ते तेनात्रार्थे प्रथमेत्युक्ते कस्यार्थ इत्यये स्वादयो यस्मात्स्वादि विधिस्तदर्थ इति विज्ञास्यते नार्थः प्रातिपदि
कग्रहणेन तत्राप्ययमर्थः। लिंगग्रहणेन कर्तव्यं भवति कुमारी हामेत्यादावव्याप्त एव सिद्धं प्रातिपदिकग्रहणे तु क्रियमाणे ग्रामादिशब्दानां स्त्रीपुंसार्था
व्यभिचारे प्रसज्यात त्वेना प्रातिपदिकत्वात्तदर्थे प्रथमा सिद्धार्थे लिंगग्रहणं कर्तव्यं स्यात्। उच्यते प्रातिपदिकग्रहणं नावदर्थपदेनासंबद्धमित्यत्रैव

उच्चैर्नीचैः। लिंगग्रहणं किं कुमारी वृक्षः कुंडमित्यत्रापि यथा स्यात्‌॥ १५ ॥ ॥

वक्ष्यते लिंगग्रहणमनेकलिंगार्थं तटस्तटं तटी कुमारः कुमारी कुंडं कुंडः कुंडिका अन्यथा येनार्थेन विना प्रकृतेरप्रयोगस्तदर्थमात्रे विधीयमाना
प्रथमा नान्यलिंगाभ्यस्त त्र हि शेषमन्तरेण प्रयुज्यमानेभ्यो न स्यात्‌। अर्थमात्रग्रहणापकत्वाभ्यामिवचनं त्वनाकस्मिकार्थसद्भावे पि उक्ता इति प्रकृ
त्यर्थस्यान्वयादिति स्यात्‌ यद्येवं वृक्षः पचत्येतस्यादि कर्माद्याधिक्ये पि स्यात्प्रत्यय नियमयत्नेतदि हवृत्तौ कुमारी कुंडमित्युदाहरणं वृक्षशब्दस्त्वर्थादुदा
हृतः। ननु मा भून्मात्रग्रहणं मा च भूल्लिंगग्रहणं मा च कारिसंबोधने चेति सूत्रं सर्वत्रार्थस्यैव प्रथमा भविष्यति नैवं कर्मादिष्वपि प्रसंगः। कर्मणि
द्वितीयेत्येवमर्थनियमस्याश्रयणात्‌ एवमपि राज्ञः पुरुष इति षष्ठ्यर्थेपि स्यात्‌ शेषलक्षणा हि षष्ठी उपयुक्तादन्यश्च शेषः तत्र यदि प्रकृत्यर्थ
स्याधिक्ये पि प्रथमा स्यात्तत्तस्या अपि प्रथमा विधानुपयुक्तत्वात्‌ षष्ठी न स्यात्‌ अर्थवचनसामर्थ्यात्स्वस्वामिभावादौ षष्ठी भवेत्‌। लिंगाधिक्ये पि स्यात्तस्मा
न्मात्रग्रहणं तावत्कर्तव्यं तस्मिंश्च क्रियमाणे लिंगग्रहणं संबोधने चेति सूत्रं च कर्तव्यं तदाधिक्ये पि यथा स्यादिति॥ १५ ॥ ॥ ॥

परिमाणग्रहणं किमिति। अर्थ इति वा लिंग इति वा सिद्धिं मन्यते। द्रोणः खारीति। अयं भावः येनार्थेन विना प्रकृतेरप्रयोगस्तस्मिन्नर्थे प्रथमा। द्रोण
शब्दश्च शब्दो लोहं दारुमयं परिमाणमुपमेतार्थं न व्यभिचरतीति यदा तु द्रोणादिः परिमिते व्रीह्यादौ वर्त्तते तदा तस्य व्यभिचारित्वान्न स्यात्। न च लिंगग्रहणाद
पि सिद्धिः न ह्याधिक्यमात्रे हि तेन स्यादिति परिमाणग्रहणं द्रोणमानादीनामुपलक्षणं तेन नष्टं तपलमित्यादावपि भवति। अथ लवणो न संसृष्टो लवणः सूपो
लवणो शाकमित्यत्र कथं प्रथमा लवणशब्दो हि लवणजातीयमेव द्रव्यं न व्यभिचरति व्यभिचरति तु संसृष्टं। उच्यते साधारणशब्दोयं लवणजातीयस्य सं
सृष्टस्य चाक्षादिद्रव्यवत्। एवं च लवणाल्लुगिति वचनात् द्विजायते तत्र यदा द्विधा द्विकशब्दयोः प्रथमा भवत्येवमत्रापि भविष्यतीति चेत्। हि किमर्थं सुल्कः

॥परिमाणग्रहणं किं। द्रोणः खारी आढकमित्यत्रापि यथा स्यात्। वचनग्रहणं किं। एकत्वादि
षु केष्वपि यथा स्यात्। एकः द्वौ बहवः॥ ॥४६॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

पट इति शुक्लशब्दो हि गुणमेव न व्यभिचरति व्यभिचरति तु तद्वन्तं यदा एष शुक्ल इति दर्शनात् अत्रापि गुणवचनेभ्यो मतुपो लुग् इति वचनात्साधा
रणशब्दत्वेन इह तर्हि कथं गोर्वाहीक इति गोशब्दो हि सास्नादिमन्तमेव न व्यभिचरति व्यभिचरति तु वाहीकं अत्रापि वाहीके सास्नादिमद्रूपारोपेण गोशब्दः
प्रयुज्यते तेन तत्र यथा सास्नादिमद्वस्तुनि भवति एवं वाहीकवस्तुन्यपि भविष्यतीति यद्येवं द्रोणः खारीत्यादावप्येवमेव भविष्यति द्रोणादिशब्दानां लवणादिशब्द
वत्साधारणशब्दाः सुगोर्वाहीकस्यादिव द्रोणनागगंगायां घोष इतिवल्लाक्षणिकानामन्यागतिरस्ति सर्वथा सिद्धा प्रथमा किं च परिमेयवृत्तिभ्यो
द्वितीयादयोपि यथा भवन्ति तथा प्रथमापि भवति॥ ॥

का·प·२०
६४

अथ प्रस्थेन परिमिता व्रीहय इत्येवं प्रातिपदिकार्थव्यतिरेकेपि यथा स्यादिति परिमाणग्रहणं यद्येवं प्रस्थेनेति तृतीया न स्यात् द्रोणवि
वक्षायां च षष्ठी न स्यात् प्रास्थिक इति तद्धितश्च न स्यात् तदेतत् परिमाणग्रहणं चिन्त्यप्रयोजनं । उक्ते द्वयीति । अत्र प्रथमानभिहिताधि
काराद्ध्रुवकृच्च न मित्यादिनास्य प्रकरणस्यैकवाक्यत्वान्निर्दिष्टत्वात् तद्धितसमासेष्विति यिंगशानस्य च प्रसारम्यातत्वादेकादि
शब्दैरेकत्वादीनामभिहितत्वादनभिहिताधिकारस्य प्रसारम्यातत्वाद् कार्थत्वाद्वानछादिति भावः । एको द्वौ बहव इति । अ
थ कथमेकं पश्येकेन कृतमित्यादौ द्वितीयादयो भवंति नहि तत्र कश्चिद्यत्नोस्ति उच्यते तत्रार्थद्वयमस्ति कर्मादि एकत्वादय
श्च तत्रैकत्वादीनामभिधानेपि कर्मादिप्रतिपादनाय द्वितीयादयो भविष्यन्ति इह त्वनभिहितार्थान्तराभावान्न स्यात् । ननु च
त्र्यैकादिभिः शब्दैरेकत्वादिविशिष्टं द्रव्यमभिधीयते तत्रैकत्वादिगुणस्य निष्कृष्याभिधानाय प्रथमा भविष्यतीति यथा
गुणोपसर्जनद्रव्यवचनाच्छुक्लादिशब्दात् प्रवृत्तिनिमित्तभूतस्य गुणस्य निष्कृष्याभिधाने भावप्रत्ययः पटस्य शौक्ल्यमि
तितदेवं वचनग्रहणमपि शक्यमकर्तुं ॥ ॥१६॥ ॥ श्रीः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ४
६४

प्रातिपदिकग्रहणं किमिति उक्तोत्र प्रष्टुरभिप्रायः निपातस्यानर्थकस्येति अनन्यार्थाभावात्तस्मात् इति भावः। प्रलंबत इति। किं पुनरत्र प्रथमया प्रार्थ्य
ते परत्वं षष्ठ्यामथेतसि रुंत तथा हि कर्मादिषु द्वितीयादयो विहिताः प्रकृत्यर्थमात्रे प्रथमा तत्र प्रकृत्यर्थाभावे स्वत्वामिभावादिसंबंधसद्भावे षष्ठ्युपयुक्ता
स्यात्। सिद्धा षष्ठी न च तस्याः एकत्वादिषु नियमः। उक्तोत्तरत्वात्तदेव मर्थलिंगमात्रे प्रथमेत्येतावदेवास्तु वक्तव्यं किं मात्रग्रहणमपि न कर्तव्यं कमीधा
धिकेकस्मान्न भवति ज्ञापकात् पटस्य संबोधने चेत्याह यदि स्याधिके पि स्यात्तदनर्थकं स्यात्। उत्तरार्थं हि संबोधने सामंत्रितमित्येव वक्तव्यं किं योगविभागेन
रहावधारणार्थान्मात्रग्रहणात् संबोधने चेति ज्ञापकाद्धाऽधिके प्रथमया न भवितव्यं तत्र वीरः पुरुष इत्यादौ यदसामानाधिकरण्ये विशेषणविशेष्य
भावस्याधिकार्थस्य प्रतीतेः प्रथमा न प्राप्नोति। न वा गमकार्थत्वात् यत्राधिक्यं स वाक्यार्थः प्रातिपदिकार्थमात्रनिष्ठाभ्यामुभाभ्यां प्रथमा विधीयते यस्माल्लोके

प्रातिपदिकग्रहणं किं। निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तं ततोपि यथा स्यात्। प्रलंबते। अ
ध्याय इति॥ ॥४७॥ ॥[illegible]॥ ॥[illegible]॥ ॥[illegible]॥ ॥[illegible]॥ ॥

क्षादिवशेनान्योन्यान्वये विशेषावगतिरुपजायमाना बहिरंगत्वात्प्रथमप्रवृत्तं नदंनरंगसंस्कारं न बाधत इत्यर्थः। अपरस्त्वाह अभिहिते प्रथमे
ति लक्षणं कर्तव्यमिति आदिभिरभिहिते कर्त्रादौ ह्यस्ति तिष्ठति कृतः कटः शायः प्राप्नोदकोयामदत्यादौ प्रथमापवतीमर्थः तत्र वीरः पुरुष इत्यादावा
धिक्येप्यभिहितत्वात् सिद्धा प्रथमेति। अत्र को दोषः यत्र क्रिया नास्ति तत्र न स्यात् वृक्षः प्लक्षः तत्रापि क्रियास्ति कथं वृक्षः प्लक्षः अस्तीति गम्यते
इह तर्हि प्रासादस्थास्त्वरतिसादि क्रियायाश्चाभिक्रियायाश्चैकमधिकरणं प्रासादस्थं तत्र सतिप्रत्ययेन तत्राभिहितं प्रसीदत्यस्मिन्नासा इति
आसप्रत्ययेनातिरनभिहितं तत्र सतिप्रत्ययेन यदभिधानं तदा अथ प्रथमा प्राप्नोति यत्र च विशेषणसंबंधे तात्पर्यं नीलमुत्पलं न रक्तमिति तत्रापि न
स्यान्न क्रियायास्त्वभावात्॥ ॥११॥ ॥[illegible]॥ ॥

का॰ प८०
९५

अन्यस्त्वाह तिङ् समानाधिकरणे प्रथमेति लक्षणं तिङ् तेन यत्समानाभिधेयं देवदत्तः पचतीति तत्र प्रथमा प्राप्नोति आस्त इत्यत्र तु वैयधिकरण्यात्
तदभावः वीरः पुरुष इत्यादौ वाधिकोपि तिङ् सामानाधिकरण्यं प्रतियोग्यत्वाद्भवतीति अत्र को दोषः इह देवदत्तः पचतीति देवदत्त पचन् लट् इत्थं स्थि
ते अधुनागच्छति॥ यावान्ति ङामुत्पत्तिर्नास्ति तावत्तिङ् सामानाधिकरण्याभावात् प्रथमैवेति नियमस्याप्रवृत्तौ देवदत्तशब्दाद्विशेषणाविहिताः स्वा
द्यः स्थिता इति शतृशानचोर्निमित्तस्य प्रथमासामानाधिकरण्यस्य विद्यमानत्वात्तावेव स्यातां तिङ् तु भावः स्यात् न च तिङ् विधेरानर्थक्यं लिङ्
दिषु सावकाशत्वात् प्रथमैवेति नियमस्यापि स एव विषयः स्यादिति दोषः पक्षे चायं दोषः कतरस्मिन् पक्षे लटः शतृशानचावित्यत्र ह्योयः सो अप्र
थमेति पर्युदासः प्रसज्यप्रतिषेधो वेति तथा कर्मणि द्वितीयेत्यादावपि प्रकरणे द्वैतं भवति विभक्तिनियमः स्यादर्थनियमो वेति तत्र यद्यर्थनियमः
पर्युदासश्चाश्रीयते तदायं दोषः। कथं कर्मणि द्वितीयैवेत्यस्मिन्नियमे द्वितीयादीनामनियतत्वात् प्रातिपदिकार्थमात्रेपि भावात् तदाश्रयोः शतृ
शानचोः प्राप्नुतः प्रसज्यप्रतिषेधे तु प्रथमाया अपि तत्राभावात्तदाश्रयः प्रतिषेधः प्रवर्त्तत इति न दोषः शतृशानचोरभावात्तिङ् श्रुसत्सु तत्सामा
नाधिकरण्यात्प्रथमैवेति नियमेन द्वितीयादीनां व्यावर्त्तितत्वात् यदा तु द्वितीयादीनां कर्मादिषु नियमः कर्मण्येव द्वितीयेति तदा तदभावे तासामभा
वादनियतायाश्च प्रथमायाः सन्निधानात्पर्युदासे प्रसज्यप्रतिषेधे च नास्ति शतृशानचोः प्रसंगः। तदभावे च तिङ् श्रुसत्सु तत्सामानाधिक
रण्यात्तत्रैव प्रथमा भवतीति नियमेन कर्मादिषु प्रथमाया अप्राप्तौ इति न दोषः। ननु च विभक्तिनियमे कर्मणोऽभावे न यद्यपि द्वितीयादीनां तत्रा
भावस्तथापि शेषषष्ठी प्राप्नोतीति तथाहि यदि तिङ् सामानाधिकरण्य एव प्रथमेत्यस्मान्नियमात्प्रागेव द्वितीयादिवत् षष्ठ्यपि नियता स्यात् स्यात्त
त्राप्रसंगस्तस्याः स्यात्तु शेषलक्षणा यत्र वदिमत्वेन तस्यानियमो न कृतः स शेषः ततश्च तिङ् सामानाधिकरण्यात्प्राक् शेषत्वात् षष्ठी प्राप्नोती
ति तत्सामानाधिकरण्याच्छतृशानचावेव स्यातां पर्युदासे प्रसज्यप्रतिषेधे तु न दोषः प्रथमाया अपि भावात्। सत्यं द्वयोरपि पक्षयोः पर्युदासे
भवत्येव दोषः। भाष्ये तु विभक्तिनियमे पर्युदासेपि न दोष इत्यनास्थावादः। पाक्षिक एष दोष इत्यत्रैव तात्पर्यं संतत्त्वं च किंचिदुक्तं थामिधानमिसुप
रम्यते॥ ॥१२॥ ॥

राम॰
९५

॥ ॥संबोधने॥ ॥आभिमुख्यकरणमितियद्वस्तुयेनाकारेणसिद्धंतस्यतेनाकारेणाभिमुखीकरणंसंबोधनंतत्वेकश्रुतिविषयाविकृतस्यचिदर्थ
स्यानुष्ठेयतायाप्रसाधनंवाकार्थोहिसः अभिमुखीकरणंतुनवाकार्थःयेनवीरः पुरुषःस्यादिव घटश्चाधिकंसवाकार्थइतिप्रथमासिद्धेतय
स्यपदांतरसंप्रयोगेसवसेवप्रतीतिः सवाकार्थःइहतुदेवदत्तेत्येतावत्युक्तेआभिमुख्यकरणंगम्यतेअतःपदार्थएवात्राधिकामितिषष्ठ्याप्रसाप्य
मिदंवचनंतदाहतदधिकेप्रातिपदिकार्थइति। असिद्धेनवाकारेणाभिमुखीकरणंनसंभवतिराजाभवबुध्यस्वस्वाहेंद्रशत्रुर्वर्द्धस्वेतिहेपचनहे
पचमानेत्यादौशात्शानचोःसंबोधनेविधानेपिविभक्तिःएहितयोस्तयोःकर्त्रभिधानएवसामर्थ्यंययालोकेद्विर्वचननिरपेक्षस्येत्सनेमप्रथमा

॥संबोधने॥ आभिमुख्यकरणंसंबोधनं। तदधिकेप्रातिपदिकार्थेप्रथमानप्राप्नोतीतिवचनमारभ्यते। संबो
धनेचप्रथमाविभक्तिर्भवति। हेदेवदत्तौहेदेवदत्ताः॥ ॥सामंत्रितं॥ संबोधनेयाप्रथमातदंतंशब्दरूपमामं
त्रितसंज्ञंभवति। तथाविवेगोदाहृतं। आमंत्रितप्रदेशाः आमंत्रितंपूर्वमविद्यमानवत्। इत्येवमादयः॥ ॥एकव
चनंसंबुद्धिः॥ ॥आमंत्रितप्रथमायायदेकवचनंतत्संबुद्धिसंज्ञंभवति। हेपचेहेदेवदत्त। संबुद्धिप्रदेशाः एङ्
ह्रस्वात्संबुद्धेरित्येवमादयः॥ १८ ॥छ॥ ॥

भवतिपष्ठ्यापिविहितःसोर्थेतिभूतःप्रातिपदिकार्थःसंपन्नइतिपूर्वेणभविष्यतिनियोगविभागउत्तरार्थः॥ ॥सामंत्रितं॥ ॥तदंतंच्छब्दरूपमि
तिमहासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थंआमंत्रणमामंत्रितमिति। अभेदोपचारात्तत्साधनेशब्देवर्त्ततेविभक्त्यंतेनचामंत्र्यतेनकेवलयाविभक्त्येति
संज्ञाविधौप्रत्ययग्रहणेतदंतस्यग्रहणमितिभावः उदाहरणेष्वामंत्रितस्यचेत्याद्युदात्तत्वंभवतिसेतिवचनंप्रातिपदिकार्थसूत्रेणापिसंबोधने
विहितायाप्रथमातदंतस्यापिसंज्ञायथास्यातहेपचमानअसतितुतस्मिन्ननंतरस्यविधिर्वाप्रतिषेधोवेत्यनंतरस्यैवविहितायाएवस्यात्॥ ॥एक
व॥ ॥हेपटोइतिसंबुद्धेर्ह्रस्वस्यगुणइतिगुणः। सुःसंबुद्धिरितिवक्तव्येएकवचनग्रहणमेकोर्थउच्यतेयेनतावन्मात्रस्यप्रत्ययस्यसंज्ञार्थंअथा

॥ ॥षष्ठीशेषे॥ ॥उपयुक्तादन्यः शेषः कर्मादयश्च प्रातिपदिकार्थपर्यन्ता उपयुक्ताः सह कर्मादिभ्योऽन्य इति। ननु न कर्मादिभ्योऽन्यः प्रातिपदिकार्थस्य
व्यतिरेकः संभवति कथं क्रियाकारकयोरसंबंधानुपपत्तेः सर्वत्र तस्यास्तन्निमित्तानां कर्मादीनां चावश्यंभावात्। तथा हि राज्ञः पुरुष इति राज्ञा कर्त्रा लो-
दत्तं पुरुषाय ददातीत्यर्थसंप्रसवात्। वृक्षस्य शाखेति लोकप्रसिद्धा आद्य हेत्वधिकरणं। तत्किं कर्मप्रक्रियायां तु शाखा॥ देवदत्तस्य गोरित्यादौ तु प्रतिग्रह-
णादौ कर्मत्वं प्रतीयते देवदत्तः प्रतिगृहीता क्रेता विनिमाता अपहर्ता वेति। उच्यते न दृश्यस्य श्रवणो नीतस्तत्र ताव क्रियाकारकसंबंधरूप एव शेषः कथं न्या-
ख्यातो यथा योगारत्सु यथा योगं ग्रहणान्न दृश्यस्यादानसंज्ञानास्ति दुस्यादिषु रिगणानां कथितत्वे पि कर्मसंज्ञा नास्ति तदपेक्षया क्रमेव शेषः। यद्वा उक्तं क्रि-
याया तन्निमित्तानां च सर्वत्र भावान्नान्यः प्रातिपदिकार्थस्य व्यतिरेक इति। तन्न। प्रतिग्रहक्रयादिजन्यस्य सर्वलोकप्रसिद्धस्य स्वस्वामिभावादिसंबंध-
स्यापि दुरपलापत्वात् यद्यपि परस्परमुपकार्योपकारकभावाभावे संबंधानुपपत्तेः क्रियाकारकसंबंधोपि सर्वत्र वस्तुस्थित्या तथापि स्वयं नेत। अस्तु तथा

॥षष्ठी शेषे। कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसंबंधादिः शेषस्तत्र षष्ठी विभक्तिर्भवति।

राज्ञः पुरुषः। पशोः पादः। पितुः पुत्रः॥ ॥१८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥४॥

स्थापि शेषः न हि यद्यद्वस्तुस्थित्यास्ति तत्तदभिधातव्यं यदेव तु विवक्षितं तदेव शब्दनिमित्तां विभक्तिं प्रसूते तत्र स्वस्वामिभावादिसंबंधविवक्षायां स-
त्यपि क्रियाकारकसंबंधो न विवक्ष्यत इति द्वितीयाद्यभावे षष्ठी भविष्यति। एवं च मातुः स्मरति न मा षाणामश्नीयादनुकरोतिभावनो नारायणस्ये-
त्यादौ स्मृत्यमा शोपि क्रियाकारकभावे मातृसंबद्धं स्मरणमिति संबंधमात्रे विवक्षितं कर्मत्वं तु सदप्यविवक्षितमिति षष्ठी भवति। उक्तं च संबंधः कारकेभ्यो-
न्यः क्रियाकारकपूर्वकः श्रुतायामश्रुतायां च क्रियायां सोऽभिधीयत इति॥ षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः स्वस्वामिभावादिसंबंधः यश्चार्थः स
च द्विष्ठः तत्र यद्यप्येकस्मादुत्पन्नया षष्ठ्या द्विष्ठस्यापि संबंधस्यावगमात् उभाभ्यां षष्ठी न भवति तथापि कदाचिद्विशेष्यादपि प्राप्नोति प्रथमा च न
प्राप्नोति संबंधस्याधिकस्याभावात्॥ न वाकार्थत्वात्॥ यदत्र पुरुषस्याधिकं स वाक्यार्थः राज्ञ इत्येतत्सन्निधानात्पुरुषस्य संबंधः प्रतीयते॥ ॥ राम०

।पुरुषप्रातिपदिकं तु स्वार्थमात्रेवर्त्तते इति तत्र प्रथमा च भविष्यति षष्ठी च न भविष्यतीति एतदुक्तं भवति। राज्ञ इति केवलपदउच्चार्यमाणे सं
बंधिलमनियतप्रतियोगिकमवगम्यते पुरुषपदसंनिधौ तु सविशेषस्य प्रतीतिरिति तेनावत्। तत्रश्चानियतस्यमपेक्ष्य प्रथममेव संबंधाश्रयाष
ष्ठी भवति ननु वषष्ठ्युच्चारणानुच्चारणकृतार्थविशेषः अंगभावान् पुरुषपदादपि षष्ठीमुच्चारयतु गांस्य तेस विशेषः। नैतत् षष्ठ्यान्तेन हि
राज्ञ्यस्य भावाभावाभ्यामर्थस्य भावाभावौ क्रियेते किं तर्हि विद्यमान एवार्थः प्रतिपिपादयिषितश्च वाचकपदप्रयोगे हेतुर्भवति। तत्र गुणस्य
ोपकारकत्वेनाविवक्षितत्वान्न द्वितेषष्ठी भवति पुरुषस्य तदुपकार्यत्वात्तु विशिष्टत्वेन विवक्षितत्वात्प्रथमा भवति तत्र च संबंधो गुणो यद्वि निधा
यप्रधानमपि स्व इति गुणाश्च प्रधानोपकारकत्वप्रवृत्तोऽन्यथानुपपत्तेरुपोतरमाश्रयति प्रधानं तु स्वनिष्ठत्वेन न रूपांतरं भजते उक्तं च द्विष्ठोप्य
सौ परार्थत्वाद्गुणेषु व्यतिरिच्यते तत्राभिधीयमानः सन्प्रधानेष्वप्युपयुज्यते इति। यदा तु पुरुषस्याप्राधान्ये राज्ञश्च प्राधान्यं विवक्ष्यते त
दा पुरुषस्य राजेत्यपि भवत्येव यदा च राज्ञः पुरुषस्य गृहमिति तत्र पुरुषस्य गृहाद्संबंधो विवक्ष्यते तदैकस्यापि वस्तुनो भिन्नविषयो गुणप्र
धानभावेन विरुध्यत इति द्वाभ्यामपि षष्ठी भवति राज्ञ इति हि षष्ठ्या राजपुरुषयोरेव संबंधोभिहितो न पुरुषस्य गृहस्य च इह यं च केप्राति
पदिकार्थे कर्मणि द्वितीयेत्यादौ वार्थनियमपक्षे शेषग्रहणाशक्या व कर्तुं किं तथा कर्मादयो नियताः शेषोऽनियतः ततश्च स्वादिसूत्रेणाद्वि
तीयादिषु षष्ठ्यां च शेषे प्राप्ते पुनः षष्ठीमितावद् प्युच्यमाने नियमार्थं संपद्यते षष्ठ्येव भवतीति यत्र च षष्ठी च प्रत्ययांतरं च प्राप्नोति तत्रैव विधी
नियमः स्यात् तथाच्छेषराद्यभविष्यतीति उच्चारणार्थमेव तद्वचनं शेषग्रहणं कर्त्तव्यं विकल्पे तु स्वार्थे षष्ठी माभूदिति द्वितीयादीनामिव कर्मादिः शे
षो वाभ्यां त्वेन विधातव्यः। तथा प्रत्ययनियमपक्षे कर्मादीनामनियतत्वात्तेष्वपि षष्ठ्याः प्राप्तायां शेष एव षष्ठी न कर्मादिष्विति षष्ठीनियमा
र्थं शेषग्रहणं कर्त्तव्यम्॥ ॥१९॥ ॥छ॥ छ॥ ॥छ॥ छ॥ ॥छ॥ छ॥ ॥छ॥ छ॥ ॥

का·प०
६७

॥ज्ञोविद॥ ॥असंदेहार्थंविदर्थस्यज्ञः करणाइत्येववक्तव्ये तदकरणाद्विदर्थस्येतिपदच्छेदः लुप्तिकरणाश्चविदिर्ग्रह्यते तदर्थएवजानातेर्वृ
त्तिसंभवात्तदाह अविदर्थस्याज्ञानार्थस्येति सर्पिषोजानीत इत्यत्रापह्नवेज्ञः अकर्मकाच्चेत्यात्मनेपदं प्रवृत्तिवचनइति ज्ञानपूर्विकायांप्रवृत्तौव
र्तमानइत्यर्थः सर्पिषिरक्तइतिरागोमिथ्याज्ञानस्यहेतुः द्वेषोपघातरक्तोहि कीचकोरहासिभीमसेनमालिंग्यावोचत् अहोउत्तमांगनामीदृशी

॥ज्ञोविदर्थस्यकरणे॥ ॥जानातेरविदर्थस्याज्ञानार्थस्यकरणेकारकेषष्ठीविभक्तिर्भवति। सर्पिषोजानी
ते। मधुनोजानीते। सर्पिषाकरणेनप्रवर्त्ततइत्यर्थः। प्रवृत्तिवचनोजानातिरविदर्थः। अथवामिथ्याज्ञानवच
नः सर्पिषिरक्तः प्रतिहतोवाचित्तभ्रांत्यातदात्मनासर्वमेवग्राह्यंप्रतिपद्यते। मिथ्याज्ञानमज्ञानमेव। अवि
दर्थस्येतिकिं। स्वरेणपुत्रंजानाति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

मुस्पर्शइतिस्ति प्रतिहतोवेतिप्रतिघातोद्वेषस्यहेतुः द्वेषश्चमिथ्याज्ञानस्यहेतुः योहियदीहामसफलेनकेनकेनकेनचित्प्रत्यादिकमश्नु
तेद्वेष्यंनिहिघ्नोक्तः सर्पिरेतस्मिन्वेतिमतत्रप्रतिहतस्तत्त्वारभ्यसर्पिर्द्वेष्टिद्विषतश्चात्तस्मिन्नपितज्ज्ञानमुत्पद्यतेयदिदंसर्वमेवग्राह्यंतदा
त्मनासर्पिः स्वभावतयाप्रतिपद्यतेएवंसत्यविदर्थत्वंनोपपद्यते तत्राह मिथ्याज्ञानमज्ञानमेवेति ज्ञानकार्याकरणादितिभावः। अविद्यु
तविषयपरिच्छेदोहिज्ञानकार्यंतच्चमिथ्याज्ञानेननक्रियते। अस्मिन्पक्षेउदकादिकर्मणासकर्मकत्वादकर्मकाच्चेत्यात्मनेपदानुपपत्तेः
परस्मैपदमुदाहरणमन्यते॥ ॥छ॥ ॥

राम·
६७

अधीगर्थः॥ ॥इक्स्मरणे कर्मणि (?) अकारोऽत्रैव विशेषणार्थः। अधि पूर्वस्येङो विशेषणं नाक्तमेव अपेक्षितं (?) इति ज्ञापनार्थं। शेषत्वेन विवक्षित इति ननु शेषत्वेन विवक्षिते एवं लोके सिद्धा षष्ठी यथा न माषाणामश्नीयादनुकरोति भगवतो नारायणस्येति। सत्यं प्रकरणे तु नियमार्थं आसां विषये षष्ठी भवत्येव अन्य (?) यत एव न लुप्यत इति किंकृतं भगवति समासो निवर्तितो भवति मातुः स्मरणमिति। एवं पूर्वसूत्रे परत्र च प्रकरणे सर्वत्र द्रष्टव्यं। समासे सति सुपो धातुप्रातिपदिकयोरिति षष्ठी लुप्येत तेन प्रतिपदविधाना षष्ठी न समस्यत इति सिद्धं भवति। कथं तर्हि विशेषस्मृतेः संशय इति समासः। उच्यते शेषषष्ठ्या एव समासनिषेधः इह तु कर्तृकर्मणोः कृतीति कर्मरूपविवक्षायामेव षष्ठीसमासो भविष्यतीति॥

अधीगर्थदयेशां कर्मणि॥ शेष इति वर्तते। अधीगर्थाः स्मरणार्थाः। दय दानगतिरक्षणेषु। ईश ऐश्वर्ये एतेषां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। मातुरध्येति। मातुः स्मरति। सर्पिषो दयते। सर्पिष ईष्टे। मधुन ईष्टे। कर्मणीति किं। मातुर्गुणैः स्मरति। शेष इत्येव मातरं स्मरति॥ ॥कृञः प्रतियत्ने॥ ॥सतो गुणान्तराधानं प्रतियत्नः। करोतेः कर्मणि कारके शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी विभक्तिर्भवति। एधोदकस्योपस्कुरुते। शास्त्रपत्रस्योपस्कुरुते। प्रतियत्न इति किं। कटं करोति। कर्मणीति किं। एधोदकस्योपस्कुरुते प्रज्ञया। शे

पुनरत्र विशेषः शेषषष्ठ्याः समासः स्यात्कारकषष्ठ्यास्तु न प्राप्तिविशेषः कारकषष्ठ्याः समासे कृत्स्वरो भवति शेषषष्ठ्याः समासे तु समासान्तोदात्तत्वं स्यात् अन्तोदात्तसमासमसिद्धि नये प्रकरणे यत्र च कारकषष्ठी प्रतिषिध्यते यथा मातुः स्मृतमिति तत्र समासोऽपि माभूत् एवं चात्र प्रकरणे ये तु पात्राः यानि चात्र प्रत्युदाहरणानि तेषूभयेषु अपि तिष्ठायोगे शेषषष्ठ्याः समासः अन्यत्र कारकषष्ठ्या अर्पीति वेदितव्यं। गुणैरिति गुणा बुद्धेषत्वे न विवक्षितेषु अस्य नियमस्याभावात्समासो भवत्येव स्यर्थः इयमेवास्मिन्प्रकरणे प्रत्युदाहरणेऽगतिरिति॥ ॥कृञः॥ ॥एधोदकस्येति। जातिरप्राणिनामित्येकवद्भावः। उपस्कुरुत इति गंधनादिसूत्रेण तनेपदं। उपात्प्रतियत्नेत्यादिना सुट्॥ २० ॥ ॥छ॥ ॥

कारकप्रकरणसिद्धान्तकौमुदी ॥ ९० ॥

का॰ प॰

६८

॥रुजार्थानां॥ ॥रुजो तं गे भिदादिपाठात् तस्मादेव निपातनाद्वा अङ् ॥ भाववचनानामिति नायमर्थो भाववाचिनामिति धातूनां भाववाचि
त्वाभिधानात् किं तर्हि भावशब्देन घञादिवाच्यः सिद्धरूपो भाव उच्यते वचन इति कर्त्तरि ल्युट् । तत्र च प्रकृत्यर्थो न विवक्ष्यते न हि रुजार्थानां भावो
वक्तुं प्रतिपादयितुं धारयितुं वा उपपद्यते तस्मात् प्रत्ययार्थ एव कर्त्ता विवक्षितः भावो वचनः कर्त्ता येषामित्यर्थः तदाह भावकर्तृकाणामिति । चौ
रस्यामयतीति अम रोगे चुरादिः । नान्ये मितो ऽहेताविति चुरादेर्वचनात् ज्ञाप्यते घटादिषु रञ्जेर्मं नाश्चेति मित्वं न भवति । ज्वरमिच्छेत्सारम्यनामे

॥रुजार्थानां भाववचनानामज्वरेः॥ रुजार्थानां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्म्मणि कारके
शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । चौरस्य रुजति रोगः चौरस्यामयति आमयः । रुजार्थानामिति किं । ए
ति जीवन्तमानन्दो नरं वर्षशतादपि । जीव पुत्रक मामेवं तपः साहसमाचर । भाववचनानामिति किं । नदी कू
लानि रुजति । अज्वरेरिति किं चौरं ज्वरयति ज्वरः । असंतापेरिति वक्तव्यं । चौरं संतापयति संतापः । शोष
इत्येव । चौरं रुजति रोगः ॥ ॥आशिषि नाथः॥ ॥नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु पठ्यते तस्याशीः
क्रियस्य कर्म्मणि कारके षष्ठी विभक्तिर्भवति । सर्पिषो नाथते । मधुनो नाथते । आशिषीति किं । माणवकमुप
नाथति अंग पुत्रकाधीष्व ॥ ॥

मितो ऽहेतौ हेताविति प्राप्ते घटादिषु पठितास्तस्य एव चुरादिषु मितो भवन्ति नान्य इत्यर्थः । आमय इति
आङ्पूर्वस्य मानाते रेरच मीनातिमिनोती त्यात्वस्यानि मिमीलियां खलचोरिति प्रतिषेधः । नदीकूलं रुजतीति । अत्र नदीकर्त्रनिभा
वः । ननु रुजा शब्दो व्याधौ रूढ इति नात्र प्रसंगः । एवं तर्हि प्रत्युदाहरणादिति यदृज्जितं रदंतु प्रत्युदाहरणं श्लेष्मा पुरुषं रुजतीति व्याधिना
कामादिना ग्राहयतीत्यर्थः । ज्वरयतीति ज्वर रोगे घटादिः । संतापयतीति हेतुमति चेति णिच् । संतापोत्र भावः कर्त्ता ॥ ॥आशिषि॥
॥नाथत इति आशिषि नाथ इत्युपसंख्यानादात्मनेपदं तत्रानुदात्तेत्वादेव सिद्धे नियमार्थं आशिष्येव नाथ इति तेन प्रत्युदाहरणे परस्मैपदं ॥ ॥

एम॰

६८

॥जासि॥ ॥नदैवादिकस्येति जासीति निर्देशाद्धिंसायामिति वचनाच्च। निप्राभ्यां यथासंभवमुपसृष्टो हन्तो निप्रहण इति हन्तेरुपसर्गस्येति णत्वं। प्रणि
हन्तीति नेर्गदेत्यादिना णत्वं। नट अवस्यन्दने चुरादिः। नटनृत्ताविति स्पष्टं तु घटादिपठितस्य ग्रहणं विकृतनिर्देशात्। निपातनाद्वृद्धिरिति। घटादिपाठस्तु
ज्वरादयः षितः स्यातिदीर्घे कोऽङ् यथा स्यात्। चिणमुलोर्दीर्घोऽन्यतरस्यामिति दीर्घश्च यथा स्यादित्येवमर्थः॥ ॥व्यवहृ॥ ॥समर्थयोरिति संज्ञो

॥जासिनिप्रहणनाटक्राथपिषां हिंसायां॥ जासिनिप्रहणनाटक्राथपिष इत्येतेषां हिंसाक्रियाणां कर्मणि कारके षष्ठी विभक्तिर्भवति। जसु हिंसायां जसु ताडन इति च चुरादौ पठ्यते तस्येदं ग्रहणं। न दैवादिकस्य जसु मोक्षण इत्यस्य। चौरस्योज्जासयति। वृषलस्योज्जासयति। निप्रहण इति संघातविगृहीतविपर्यस्तग्रहणं। चौरस्य निप्रहन्ति। चौरस्य निहन्ति। चौरस्य प्रहन्ति। चौरस्य प्रणिहन्ति। चौरस्योन्नाटयति। वृषलस्योन्नाटयति। चौरस्य क्राथयति। वृषलस्य क्राथयति। निपातनाद्वृद्धिः। अयं हि घटादौ पठ्यते। क्नथ क्रथ क्लथ हिंसार्था इति तत्र घटादयो मित इति ह्रस्वत्वं स्यात्। चौरस्य पिनष्टि। वृषलस्य पिनष्टि। हिंसायामिति किं। धानाः पिनष्टि। शेषविवक्षायां च। चौरमुज्जासयति। एषामिति किं। चौरं हिनस्ति। निप्रहण इति किं। चौरं विहन्ति॥ ॥व्यवहृपणोः समर्थयोः॥ ॥व्यवहृपण इत्येतयोः समर्थयोः समानार्थयोः कर्मणि कारके षष्ठी विभक्तिर्भवति। द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः। शतस्य व्यवहरति। सहस्रस्य व्यवहरति। शतस्य पणते। सहस्रस्य पणते। आयप्रत्ययः कस्मान्न भवति। स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते। समर्थयोरिति किं। शलाकां व्यवहरति। ब्राह्मणान् पणायते स्तौतीत्यर्थः। शेषविवक्षा शतं पणते॥ ॥दिवस्तदर्थस्य॥ व्यवहृपणोः समानार्थस्य दीव्यतेः कर्मणि षष्ठी विभक्तिर्भवति। शतस्य दीव्यति। सहस्रस्य दीव्यति। तदर्थस्येति

क्तौ समानार्थौ। समशब्दस्य वा निपातनात्सरूपमिति भावः। संबद्धार्थयोरिति तु न विज्ञायते व्याख्यानात्। न संभवति हि व्यवहृपणोर्हेतुमद्भावः संबंधः। शतस्य व्यवहरतीति शतं क्रयविक्रयव्यवहारेण विनियुंक्ते दीव्यति वेत्यर्थः। शलाकां व्यवहरति निगणयतीत्यर्थः॥ ॥दिवस्तद॥ ॥अत्रशेष इति नानुवर्तते उत्तरसूत्रद्वयारंभसामर्थ्यात्। अथ पूर्वसूत्र एव दिविरपि कस्मान्न पठितः। एवं हि तदर्थस्येति न वक्तव्यं भवति तत्राह योगविभाग इति॥२१॥

॥विभाषा॥ ॥शलाकां प्रतिदीव्यति अत्र विजिगीषादेर्दिविर्वर्त्तते न व्यवहारे॥ ॥द्वितीया॥ ॥मंत्र व्यतिरिक्तो वेदभागो ब्राह्मणं ग्रामस्य तदहः
सभायामिति ग्रामस्य सभायामिति संबन्धः तदहरिति तदुदाहरणं स्त्रमोर्नपुंसकादिति लुक् अह्नलिति टच् अनुपसर्गस्येति षष्ठ्यां प्राप्तायामिति
दिवस्तदर्थस्येत्यनेन अथ सोपसर्गस्यापि पूर्वेण षष्ठ्यामपि प्राप्तायां नित्यं द्वितीयार्थं किमात्र भगवत्याह सोपसर्गस्येत्यादि॥ ॥प्रेष्यब्रु॥ ॥इष्य

॥विभाषोपसर्गे॥ ॥दिवस्तदर्थस्येति नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते। उपसर्गस्येति दिवः कर्म
णि कारके विभाषा षष्ठी विभक्तिर्भवति। शतस्य प्रतिदीव्यति। सहस्रस्य प्रतिदीव्यति। शतं प्रतिदीव्यति। सहस्रं प्रति
दीव्यति। उपसर्गस्येति किं। शतस्य दीव्यति। तदर्थस्येत्येव। शलाकां प्रतिदीव्यति॥ ॥द्वितीया ब्राह्मणे॥ ॥ब्राह्म
णविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया विभक्तिर्भवति। गामस्य तदहः सभायां दीव्येयुः। अनुपसर्ग
स्य षष्ठ्यां प्राप्तायां इदं वचनं। सोपसर्गस्य तु छंदसि व्यवस्थितविभाषया पि सिद्धमेति॥ ॥प्रेष्यब्रुवोर्हविषो देवतासं
प्रदाने॥ प्रेष्य इति इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषस्यैकवचनं। तत्साहचर्यात् ब्रुवि रपि तद्विषय एव गृह्यते। प्रे
ष्यब्रुवोर्हविषः कर्मणः षष्ठी विभक्तिर्भवति। देवतासंप्रदाने सति। अग्नये छागस्य हविषो वपाया मेदसः प्रे
ष्य। अग्नये छागस्य हविषो वपाया मेदसोनुब्रूहि। प्रेष्यब्रुवोरिति किं। अग्नये छागं हविर्वपां मेदो जुहुधि। हविष
इति किं। अग्नये गोमयान् प्रेष्य। देवतासंप्रदान इति किं। माणवकाय पुरोडाशं प्रेष्य। हविषः प्रस्थितस्य प्रतिषेधो

दैवादिकस्येति। इषु गताविति स्वरूपेणानिर्देशादिच्छतीषणातिसोरिच्छाभीक्ष्णार्थयोर्निवृत्त्यर्थमित्यर्थः। तद्विषय एवेति लोण्मध्यमैकवचनांतः
देवता संप्रदान इति देवता संप्रदानं यस्यार्थस्य तत्र वर्त्तमानयोः कर्मणि कारक इत्यन्वयः हविषो हविर्विशेषवाचिन इत्यर्थः। प्रेष्येति ब्रूहि प्रेष्य
त्यादिना प्लुतः। अग्नये गोमयानिति प्रेष्यतिगोमयं हविर्न भवति न चापि नचोदितं। हविषः प्रस्थितस्येति प्रस्थितशब्देन यद्विशेष्यते तस्येत्यर्थः इदं च भाष्ये

…देवताभ्यः। इन्द्राग्निभ्यां छागस्य हविर्वपा मेदः प्रस्थितं प्रेष्य॥
…पि भवति उत्तरत्र छन्दोग्रहणात्॥ ॥७॥ ॥

।। ।।चतुर्थ्येव।। ।।याखर्वेणेति।रजस्वलायाः खर्वयानाडिप्रतिषेधार्थोपमर्थवादः तत्राहि विकल्प्यं षष्ठ्यर्थे चतुर्थीति न वक्तव्यं।योगविभागा
त्सिद्धं। चतुर्थ्यर्थ इति नायं समासः किंतर्हि चतुर्थ्याः अर्थ इति योगो विभक्तव्यः षष्ठीत्यनुवर्तते अर्थे षष्ठी भवति चतुर्थी चेति तत्र स्वार्थ एव षष्ठी च

।।चतुर्थ्यर्थे बहुलं छंदसि।। ।।छंदसि विषये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति बहुलं।पुरुषमृगश्चंद्रमसः।पुरुषमृ
गश्चंद्रमसे।गोधा कालका दार्वाघाटस्ते वनस्पतीनां।ते वनस्पतिभ्यः बहुलग्रहणं किं।कृष्णो रात्र्यै।हिमवतो हस्ती।ष
ष्ठ्यर्थे चतुर्थी वक्तव्या।या खर्वेण पिबति तस्यै खर्वो जायते।याद्दतो धावति तस्यै श्यावदन्।या नखानि कृंतति तस्यै
कुनखः।यांक्ते तस्यै काणः।याभ्यंक्ते तस्यै दुश्चर्म्मा।या केशान्प्रलिखति तस्यै खलतिः।अहल्यायै जारः।। ।।यजेश्च
करणे।।यजेर्धातोः करणे कारके छंदसि बहुलं षष्ठी विभक्तिर्भवति।घृतस्य यजते।घृतेन यजते।सोमस्य यजते।
सोमेन यजते।। ।।कृत्वोऽर्थप्रयोगे कालेऽधिकरणे।। छंदसि बहुलमिति निवृत्तं। कृत्वोऽर्थानां प्रत्ययानां प्रयो
गे कालेऽधिकरणे षष्ठी विभक्तिर्भवति।पंचकृत्वोऽह्नो भुंक्ते।द्विरह्नोऽधीते।कृत्वोऽर्थग्रहणं किं।अह्नि शेते।रा
त्रौ शेते।प्रयोगग्रहणं किं।अहनि भुंक्ते।गम्यते हि द्विस्त्रिश्चतुर्वेति न तु प्रयुज्यमाने भवति।कालग्रहणं किं।
द्विः कांस्यपात्र्यां भुंक्ते।अधिकरण इति किं।द्विरह्ना भुंक्ते।शेषस्यैव द्विरहन्यधीते।। २२ ।।

तुर्थ्या विधानमनर्थकमित्यन्योन्यसंनिधानादन्योन्यार्थे विभक्तिरूपविज्ञायते।। ।।कृत्वोर्थ।। ।।कृत्वसुचाऽर्थे लक्ष्यते कृत्वः अर्थो येषां ते
कृत्वोऽर्थाः।पंचकृत्व इति।संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् द्विरिति द्वित्रिचतुर्भ्यः सुच् अर्थग्रहणमेतदर्थं।। २२ ।। ।।

का॰ पद॰ ७०

॥कर्तृका॥ ॥इह क्रिया याः साधनं भवतीति कर्तृकर्मभ्यां क्रियायां संनिधाप्यते धातुरेव क्रियावाची धातोश्च रूपे प्रत्ययाः कृतस्तिङश्च तत्र तिङः प्रयोगेन लो
काव्ययेति लप्रतिषेधेन भाव्यं सत्त्वावस्थायां प्रतिषेधः कर्तृत्वमः ये कृतो लादेशास्तद्धर्थं ओदनं पचन् ओदनं पचमानः पपिः सोमं ददिर्गा इति इह तु ना
र्थः कृद्ग्रहणेनेति मत्वा पृच्छति। कृतीति किमिति। कृत एवं क्रि? मिति। ननु कृतः कर्तुः एवं मनेनेत्यस्मिन् विग्रहे कस्य कर्मणी विधानात्तेनैव कर्म
णोऽभिहितत्वात्तेन द्वितीयया भाव्यं एवं च तदपवादः षष्ठ्यपि न प्राप्नोति इहाप्यनभिहिताधिकारात्। कृतपूर्वी कटमित्यत्र कराये भावस्य समासो दुर्लभः
एतेन तद्धितोऽसामान्यात्। तस्मादयमसाधुरेव प्रयोगः संज्ञाविशेषविवक्षायां तेन समासत्तद्धितो भवतः यदा तु कृतं पूर्वमनेनेति कर्मसामान्ये भावे

॥कर्तृकर्मणोः कृति। कृत्प्रयोगे कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति। भवतः शायिका। भवत आसिका। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। कर्तृकर्मणोरिति किं। शस्त्रेण भेत्ता। कृतीति किं। तद्धितप्रयोगे मा भूत्। कृतपूर्वी कटं। भुक्तपूर्वी ओदनं। शेष इति निवृत्तं पुनः कर्मग्रहणात्। इतरथा हि कर्तरि च कृतीति ब्रूयात्॥

॥ २३ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥श्रीः॥ ॥ २३ ॥ ॥

गकृत उत्पद्यते तदा सापेक्षत्वाभावात्समासः। केनासुसुपेति ततः पूर्वादिनिः सपूर्वाच्चेति इनिः प्रत्ययः न च कटस्य क्तेनाभिधानं करोतेरुत्पद्यमानः
क्तप्रत्ययः कर्मसामान्यमेवाह विशेषकर्मसंबंधात्तु तस्याभिधानं न चात्र तद्धितेनैकार्थीभूतस्य कृतशब्दस्य निष्कृष्य कटेन संबंधः संभवति। क्रियया तु गु
णभूतयापि कारकाणां संबंधो भवति यथा कटं कृतवानिति कृतपूर्वीत्यत्र कृष्णार्यं पूर्वं कृतमनेनेत्यस्मिन्नर्थे मुख्यादितः पूर्वं कृतवानित्यनेन समा
नार्थः संपद्यते तस्य कृतशब्दस्य त्वकरोतीति क्रियापेक्षमस्ति कटस्य कर्मत्वं। अनभिहितं च तदितीति द्वितीया ग्रहणो षष्ठी स्यात् यत्र च निष्ठा तेन शब्देन कर्तृ
कर्मणोः संबंधस्तत्रैव निष्ठाश्रयः प्रतिषेधः यथा कटं कृतवान् कृतः कटो देवदत्तेनेति इह तु कृतस्य कटेन संबंधो न भवतीत्युक्तमेव॥ ॥ ॥

राम॰ ७०

अथ तु वस्तुतो निष्ठाने पदे धातुवाच्यक्रियायेक्षयैककर्तृकर्मणी तयोः प्रतिषेधस्तथापि सति नेदं कृद्ग्रहणस्य प्रयोजनं तेनैतदपि निरस्तं अस
ति कृद्ग्रहणे कटं कारयति याचयति सोदनं देवदत्तो यज्ञदत्तेनेति णिच्प्रकृतेः पचेरर्थं प्रति कर्तृकर्मणोः षष्ठीप्रसंगः सति तु कृद्ग्रहणे णिचोता
न्न भवतीति कथमिव निरस्तं न लोके सत्रेनैवं विज्ञायते लप्रकृतिभूतस्य धातोर्ये कर्तृकर्मणी इति किं तर्हि लान्तेय देया क्रियाश्वतेप्राधान्येनगु
णभावेन वा तत्र ये कर्तृकर्मणी तयोः षष्ठी न भवतीति तेनेदमप्य प्रयोजनं अथ स्यात् नलोकाव्ययेत्यत्राव्ययेत्यत्राव्ययनिर्देशणार्थं कृ
द्ग्रहणं तेनोच्चैः कयनोप्रश्लेषज्ञाकृतोप्यव्ययस्य प्रयोगे निषेधाभाव इति तदपि न अव्ययेन कर्तृकर्मणी विशेषयिष्यामः अव्ययस्य
ये कर्तृकर्मणी तयोः षष्ठी नेति न चात्र कृत उच्चैस्कर्तृकर्मणी संभवतः इह तर्हि करोतीति कारिरिति कृच्छ्रे नक्लेचितेतत्र कर्तृकर्मणो
रप्येव षष्ठ्यामपि सिद्धायां पुनर्विधानं गुणभूतेपि कर्तरि यथा स्यात् इरिका देवदत्तस्य पत्तस्य काष्ठानामिति भिदेरर्थे तात्पर्यार्थादिना गुण
अप्रधान्यस्य प्राधान्यात्प्रयोजककर्त्ता प्रधानं प्रयोज्यकर्ता तु प्रकृत्यर्थस्य गुणभावाद्गुणभूत प्रधाने त्वतरस्तन्निधौ प्रधानादेव स्यात् कृद्ग्रह
णादप्रधानादपि भवति एतदपि नास्ति प्रयोजनं तृतीया वा सिद्धं तद्यथा पचित ओदनो देवदत्तेन यज्ञदत्तेनेति सा हि प्रधानाप्रधानयोर्द्व
योरपि कर्त्रोरुक्तत्वाभावे भवतितत्कस्माद्धेतोः एकशब्दवाच्यत्वाभावात्केन विरोधाभावात् तथा षष्ठ्यपि भविष्यति इह तर्हि प्रयोजनं उभयप्राप्तौ
कर्मणीति बहुव्रीहिर्यथा स्यात् आश्चर्यमपदार्थस्यानुपात्तत्पुरुषः स्यात् तत्र वा निर्देशस्सतेयधेवमुत्तरत्रैव कृद्ग्रहणं कर्तव्यं अथवा
नुपात्तेप्यस्य पदार्थस्याख्यानाद्बहुव्रीहिर्भविष्यति यथैकावो ह्यप्रथमस्येति तदेतत्कृद्ग्रहणं चिंत्यप्रयोजनं केचिदाहुः इहैव तद्धितनिवृ
त्त्यर्थं कृद्ग्रहणमिति प्रजानातीति प्रज्ञः प्रज्ञ एव प्राज्ञः प्रज्ञ एव प्राज्ञः प्रज्ञादिभ्यश्चेति स्वार्थिके णि कृते व्याकरणे प्राज्ञ इद्दत्तत्र षष्ठी न भवति।
ननु क्रियमाणेपि कृद्ग्रहणे कस्मादेवात्र न भवति यावता भवत्येव कृतोत्र प्रयोगः न ह्यत्रैतच्छक्यं वक्तुं प्रत्ययार्थेनैकार्थीभूतस्य कृ
दन्तस्य निःकृष्य व्याकरणेन संबंधो न संभवतीति प्रत्ययस्य स्वार्थिकत्वेनार्थान्तराभावात् नैष दोषः कृद्ग्रहणसामर्थ्यात्कृदन्तेनैव योगोव
श्यं विज्ञास्यते इह तु कृतान्तद्धितेन चैकस्य संबंध इति न भविष्यतीत्यलमतिक्षोदेन शेषरतिनिवृत्तमिति तेनायमा सा षष्ठी विधीयत इत्यस्याः
समासो भवतीति कृद्योगा च षष्ठी समस्यत इति न वक्तव्यं भवति २३ ॥

॥उभय॥ ॥उभयशब्देनप्रकृतत्वात्कर्तृकर्मणीसंबध्येते उभयप्राप्ताविति बहुव्रीहिरिति निनत्पुरुषः उभयोः कर्तृकर्मणोः षष्ठीप्राप्तौ सत्यामि
ति अत्रप्रयोजनंवक्ष्यतिकर्मण्येवेति विपरीतस्तु नियमोनभवति उभयप्राप्तावेवकर्मणीति एवं हि पूर्वसूत्रेकर्मग्रहणमनर्थकंस्यात् अने
नैवविशिष्टविधानमाश्रीयणीयंस्यादितिभावः आश्चर्यइतिसकर्मकेभ्योभावेक्त इतिविहितेकर्मणि कर्तरिचषष्ठीप्राप्तानियमेनकर्तुरपनी
यते। प्राप्तिग्रहणाच्चप्राप्तिमात्रेनियमइतिकर्तृकर्मणोरप्रयोगेपिकर्तरितृतीयाभवति अतश्चैयेनादर्शनमिच्छतीति अत्रस्थात्मनइतिग
म्यमानत्वात् स्तुभयोःप्राप्तिः अत्रचानंतरस्यविधिर्वाप्रतिषेधोवेतिकर्तृकर्मणोरितिप्राप्तिर्नियम्यतेशेषषष्ठीतुकर्तर्यापिभवत्येवनियमए
प्रयोजनंयत्रेतृतीयाश्रवणं। कर्मीयियदाशेषत्वेनविवक्ष्यतेतदातत्रापिशेषषष्ठीभवत्येव। तस्मात्स्वकर्मणिचेति निषेधाभावात्समासोपि

॥उभयप्राप्तौकर्मणि॥ ॥पूर्वेणषष्ठीप्राप्तानियम्यते उभयप्राप्ताविति बहुव्रीहिः उभयोः प्राप्तिर्यस्मिन्क्त
तिसोयमुभयप्राप्तिः तत्रकर्मण्येवषष्ठीविभक्तिर्भवतिनकर्तरि। आश्चर्योगवांदोहोऽगोपालकेन। रोचतेमे
ओदनस्यभोजनंदेवदत्तेन। साधुखलुपयसःपानंयज्ञदत्तेन। बहुव्रीहिविज्ञानादिहनियमोनभवति। आ
श्चर्यमिदमोदनस्यपाकोब्राह्मणानांचप्रादुर्भावइति। अकाकारयोः प्रयोगेनेतिवक्तव्यं। भेदिकादेवदत्त
स्यकाष्ठानां। चिकीर्षादेवदत्तस्यकटस्य॥ ॥

भवतिनिषेधस्यतुप्रयोजनंकृत्स्वरोमाभूदिति एतदपिसूचितंपूर्वेणषष्ठीप्राप्तानियम्यतइतिनि आश्चर्यमिदमित्येतावदेकंवाक्यंकिंत
दित्याह ओदनस्येति। अत्रपाकेओदनस्यकर्मत्वंप्रादुर्भावेचब्राह्मणानांकर्तृत्वेमित्यनेकत्वात् तदुभयप्राप्तिर्भवति। लभेदिकेतिपर्याया
द्विपुण्वुच्च चिकीर्षेति अप्रत्ययात्। अत्रोभयत्रापिकर्तरितृतीयानभवति षष्ठी तु शेषविवक्षयापिसिध्यतिसमासोप्यत्रभवतिधर्मजिज्ञा
सादेवदत्तस्यशिष्यस्याचार्यशुश्रूषेति शेषेविभाषेतितत्रपक्षेनियमेनकर्तरितृतीयातदाकर्मणिचेतिनिषेधात्पाणिनिनासूत्रकृतिः आ
चार्येणशब्दानुशासनमित्यसाधुः समासः पाणिनेः सूत्रकृतिराचार्यस्यशब्दानुशासनमितितुसाधु॥ ॥कस्यचि॥ ॥छ॥ ॥

राज्ञां मतः इति मति बुद्धि पूजार्थेभ्यश्चेति वर्त्तमाने क्तः। शेषविज्ञानादित्युपसंख्यानं प्रत्याचष्टे सदप्यत्र छात्रस्य कर्तृत्वं अविवक्षयाति रो
धीयते संबंधिमात्रमेव तु विवक्ष्यते ततश्च न माषाणामश्नीयादितिवत्सिद्धा षष्ठीत्यर्थः। तथा चेति। उपसंख्यानेनेत्यस्मिन्सूत्रे॥ भावे
॥ ॥अधिक॥ ॥तस्य च प्रयोगे षष्ठी विभक्तिर्भवति॥ यथा संभवं यत्र कर्तृत्वं संभवति तत्र कर्त्तरि इदमेषामासितमिति। सकर्मकेभ्यस्त्वधि
करणे क्ते विहिते द्वयोरपि कर्तृकर्मणोरनभिहितत्वाद्द्वयोरपि षष्ठी भवति इदमेषां भुक्तमोदनस्येति। उभयप्राप्तौ कर्मणीत्ययं तु नियमः कर्तृकर्म

॥क्तस्य च वर्त्तमाने॥ ॥न लोकाव्ययनिष्ठेति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते। क्तस्य वर्त्तमानकालविहितस्य प्रयो
गे षष्ठी विभक्तिर्भवति। राज्ञां बुद्धः। राज्ञां पूजितः। क्तस्येति किं। तृणैः पचमानः। वर्त्तमान इति किं। ग्रामं गतः। नपुंसके भा
वे उपसंख्यानं। छात्रस्य हसितं। मयूरस्य नृत्तं। कोकिलस्य व्याहृतं। शेषविज्ञानात्सिद्धं। तथा च कर्तृविवक्षायां तृतीया
पि भवति। छात्रेण हसितमिति॥ ॥अधिकरणवाचिनश्च। क्तोऽधिकरणे चेति वक्ष्यति। तस्य प्रयोगे षष्ठी विभक्तिर्भवति
॥अयमपि प्रतिषेधापवादो योगः। इदमेषामासितं। इदमेषां शयितं। इदमहेः सृप्तं। इदं चुनक्त्येयतिं। इदमेषां भुक्तं। इद
मेषां प्रशितं। द्विकर्मकाणां प्रयोगे कर्त्तरि कृति द्वयोरपि षष्ठी द्वितीयावत्। नेताश्वस्य ग्रामस्य चैत्रः। अन्ये प्रधाने कर्म
ण्याहुः। तदा नेताश्वस्य ग्रामं चैत्रः॥ २४ ॥

णोः कृतीत्यस्या एव प्राप्तेः। वाचिग्रहणं किं। अधिकरणे इत्युच्यमाने क्तोपलक्षणं विज्ञायेत ततश्चार्थेति रहत्रेऽपि औषादेः त्यलस्य क्तस्य प्रयोगे
षष्ठी स्यान्न वाचिग्रहणे तु सति यदाधिकरणं वक्ति तदैव षष्ठी भवति यदा धात्वर्थेतरे तदा कर्त्तरि तृतीया कर्मणि द्वितीया भवति इहैभिरासि
तं ग्रामं गत इति इह गत्यर्थे चातुः शब्दं भवति। इदमेषां गतमित्यधिकरणे इमे तेन गता इति कर्त्तरि इहैभिर्गतमिति नपुंसके भावे कर्तृवि
वक्षायां इदमेषां गतमिति तत्रैव शेषविवक्षायां॥ ॥ २४ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥नलोका॥ ॥जिघृक्षितरूपविना प्राप्रसंग्यात्तत्नामिसत्रगालाभावः उउकेति। अनोकारप्रश्लेषे दर्शयतितत्र लश्चउश्चेति पूर्वं द्वंद्वे उकास्यपूर्वनिपातः स्यातपरनिपाते पिल्लबुकेतिस्यात्तस्मात्परयोर्द्वंद्वं कृत्वा पश्चाल्लशब्देन द्वंद्वः कार्यः उकारेणावकृतो विशेषणात्तदंतविधिः सपदेशिवद्भावात्केवलस्यापिग्रहणं शतृशानचाविति तेन शानजर्थंयन्निति प्रत्याहारो नाश्रयणीय इति भावः किकिनोचेति न नुल ग्रहणोनलकारस्तदादेशाश्चग्रहीतुं युक्ताः करेकारयोव कारस्त्रो दनंपाचयन्निति किकिनोस्त्वयुक्तं ग्रहणं अलत्वाटला देशलाच्च नैषदोषः किकिनोर्लिड्वल्पनेन लिङ्त्वात्तादेशः क्रि

॥नलोकाव्ययनिष्ठाखलर्थतृनां॥ कर्तृकर्मणोः कृतीतिषष्ठीप्राप्ता प्रतिषिध्यते। ल उका अव्यय। निष्ठा। खलर्थ। तृन् । इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति। लइतिशतृशानचौ कानच्कसू किकिनौ च गृह्यंते। ओदनं पचन् ओदनं पचमानः। ओदनं पेचानः। ओदनं पेचिवान्। पपिः सोमं ददिर्गाः उ। कटं चिकीर्षुः ओदनं बुभुक्षुः कन्यामलंकरिष्णुः। इष्णुचोपि प्रयोगे निषेधः। उका आगामुकं वाराणसीं रक्षआहुः। उकप्रतिषेधेकमेर्भाषायामप्रतिषेधः। दास्याः कामुकः। अव्यय। कटं कृत्वा। ओदनं भुक्त्वा। अव्ययप्रतिषेधे तोसुन् कसुनोरप्रतिषेधः। पुरा सूर्यस्योदेतोराधेयः। पुराक्रूरस्य विसृपो विरप्शिन्। निष्ठा। ओदनं भुक्तवान्। देवदत्तेन कृतं। खलर्थ। ई

क्रियतेनलिट्संज्ञात्तत्रकारयोपेचानइत्यादौ लिरिति तादेशेऽच दृष्टः प्रतिषेधः किकिनोरपि भविष्यति उदाहरणेषु सर्वत्र कारकषष्ठ्याः प्रतिषेधः शेषषष्ठी तु भवत्येव ब्राह्मणस्य कुर्वन् ओदनस्य पचन् अयं पेरु रमिनरकस्य जिष्णोर्गुणेः तानि द्विषदीर्य तिराकरिष्णुरिति। आगामुकमिति लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् इत्युकञ्। भविष्यति गम्यादयः इति भविष्यदर्थे णिनिः। भवंति आयादिमोक्षार्थमित्यर्थः। दास्याः कामुक इति द्वितीया नित्य स्यर्थं विकल्पं षष्ठी तु शेषविज्ञाना देवासिद्धा युसस पश्येतिभावलक्षणाइत्यादिना तोसुन् विसृपइतिसृपितृदोः कसुन् इत्यनेन कसुन्। शानन्नतात्स्त्रीलिङ्गयोवचनशक्तिस्वभावाच्छ द्रष्टव्यः। शतृकाञ्छि शीलेपि ते षु लइतिनानुवर्तते इति व्याख्यायिष्यते नलग्रहणात् सिद्धिरितिमताह ॥ ॥

तृन्निति प्रत्याहारग्रहणमिति द्विषः शतुर्वा वचनमिति द्विषोऽमित्र इति योयं शतृप्रत्ययस्तत्प्रयोगे विकल्पेन प्रतिषेधो न कर्तव्य इत्यर्थः। प्रत्याख्यानं तु शेषविवक्षायां षष्ठ्यत्र द्वितीयेति सतां च समासप्रतिषेधात्समासे कृत्स्वरार्थं कारकषष्ठी विधेयेत्यपि नास्ति॥ ॥अकेनोः॥ ॥अकस्य भविष्य

तृन्निति प्रत्याहारग्रहणं। लटः शतृशानचावित्यारभ्य आतृनो नकारात्। तेन शानन्चानश्शतृतृनामपि प्रतिषेधो भवति। सोमं पवमानः। नडमाघ्नानः। अधीयन्पारायणं। कर्ता कटान्। वदिता जनापवादान्। द्विषः शतुर्वा वचनं। चोरं द्विषन्। चोरस्य द्विषन्॥ ॥अकेनोर्भविष्यदाधमर्ण्ययोः॥ ॥अकस्य भविष्यति काले विहितस्य इनश्च भविष्यति चाधमर्ण्ये च विहितस्य प्रयोगे षष्ठी विभक्तिर्न भवति। कटं कारको व्रजति। ओदनं भोजको व्रजति। इनः खल्वपि। ग्रामं गमी। ग्रामं गामी। आधमर्ण्ये शतं दायी। सहस्रं दायी। भविष्यदाधमर्ण्ययोरिति किं। यवानां लावकः। सक्तूनां पायकः। अवश्यंकारी कटस्य। इह कस्मान्न भवति। वर्षशतस्य पूरकः। पुत्रपौत्राणां दर्शक इति। भविष्यदधिकारे विहितस्याकस्येदं ग्रहणं॥ ॥२५॥ ॥छ॥ ॥

तिकाले इनस्तु आधमर्ण्ये चेति संख्यातानुदेशस्तु व्याख्यानान्न भवतीति भावः। ग्रामं गमी गामीति। भविष्यति गम्यादयः। ननु च नात्र षष्ठ्याः प्रसंगः कृ थं गत्यर्थकर्मणामपत्रोक्तं द्वितीयाग्रहणं किं न चतुर्थ्येव विकल्प्येत अपवादविषयेऽपि यथा स्यात् ग्रामस्य गन्तेति समस्त्रोतेनावन प्रतिषेधे लभ्यमाने किं द्वितीयाग्रहणमर्थाश्रयणेनेति मन्यते॥ २५॥ ॥

।।कृत्यानां।। ।।कर्त्तरीति किमिति। तयोरेव कृत्यक्तखलर्था इति वचनात् अकर्मकेभ्यो भावे सकर्मकेभ्यश्च कर्मणि कृत्यानां विधानात् कर्तुरेवैतेनाभिधा
नं भवतीति कर्तृकर्मणोर्द्वयोरधिकारेपि कर्त्तर्येव षष्ठी भविष्यतीति प्रश्नः। गेय इति भव्यगेयेत्यादिना कर्त्तरि यत्प्रत्ययः। साम्नामिति कर्मणि नित्यमेव
षष्ठी भवति। उभयप्राप्तौ कृत्स्य इति। उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृत्ये तत्र द्वयोरपि कर्तृकर्मणोः षष्ठी न भवतीत्यर्थः। कृष्टव्येति कर्षेर्द्विकर्मक
त्वात् प्रधाने कर्मणि कृत्यप्रयोगे न त्वप्रधान इति तस्मिन् कर्मणि कर्त्तरि च प्राप्ता षष्ठी न भवति एतच्च योगविभागाल्लभ्यते कथं। कृत्यानामित्येको योगः अ
त्रोभयप्राप्तौ नेति च वर्त्तते ततो योग उभयप्राप्तौ कृत्यानां प्रयोगे षष्ठी न भवतीत्यर्थः। ततः कर्त्तरि वा अत्र षष्ठी सैवानुवर्त्तते अप्रमत्तः सर्वं निहन्ता।। ।।

।।कृत्यानां कर्त्तरि वा।। ।।कर्तृकर्मणोः कृतीति नित्यं षष्ठी प्राप्ता कर्त्तरि विकल्प्यते। कृत्यानां प्रयोगे कर्त्तरि वा षष्ठी
विभक्तिर्भवति न कर्मणि। भवता कटः कर्त्तव्यः। भवतः कटः कर्त्तव्यः। कर्त्तरीति किं। गेयो माणवकः साम्नां। उभयप्राप्तौ कृ
त्ये षष्ठ्याः प्रतिषेधो वक्तव्यः। कृष्टव्या ग्रामं शाखा देवदत्तेन। नेतव्या ग्राममजा देवदत्तेन।। ।।तुल्यो देवदत्तेन तुल्यो
देवदत्तस्य। सं+ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां।। ।।तुल्यार्थैः शब्दैर्योगे तृतीया विभक्तिर्भवति अन्यतरस्यां पक्षे
षष्ठी च। तुलोपमाशब्दौ वर्जयित्वा। शेषे विषये तृतीयाविधानात् तृतीयामुक्ते षष्ठ्येव भवति। सदृशो देवदत्तेन। सदृशो देवदत्तस्य
। अतुलोपमाभ्यामिति किं। तुला देवदत्तस्य नास्ति। उपमा कृष्णस्य न विद्यते। वेति वर्त्तमाने अन्यतरस्यांग्रहणमुत्तरसूत्रे तस्य
चकारेणानुकर्षणार्थं। इतरथा हि तृतीयानुकृष्येत।। ।।छ।। ।।

तुल्यार्थैः।। ।।शेषविषये विधानादिति। शेष इत्यधिक्रियत इति भावः। बहुवचननिर्देशादेव स्वरूपग्रहणाभावे सिद्धे पर्यायग्रहणं यदन्तरनिरसे साधेतु
ल्यानाद्युक्तसदृशग्रहार्थं तेन द्योतकाद्वा द्रव्यो निवर्त्तितो भवन्ति गोरिव गवय इत्यादौ यथा गवय इति तुला देवदत्तस्येति तुलोपमाशब्दौ कर्मसाधनौ
तुल्यार्थौ तत्र प्रतिषेधात् तृतीया षष्ठी तु भवत्येव। उरस्सुरोपमं भूतिमिति तेन शंभुनेति शंभुना सुरोपमा यस्येत्युपमाशब्देनापि योगे करणे तृतीया भ
वति भावसाधनत्वात्तस्य यथा उपमीयते नेनेत्यादौ। इतरथा हि तृतीयानुकृष्येतेति तस्य अनन्तरसूत्रे श्रुतत्वात् अन्येतरस्यांग्रहणे तु सति तस्य

॥चतुर्थी॥ ॥आयुष्यादीनां सुखपर्यन्तानां द्वन्द्वं कृत्वार्थशब्देन बहुव्रीहिर्विधानार्थशब्देनायुष्यादिभिः प्रत्येकं संबंधः तत्र मद्रभद्रशब्दयोः पर्यायत्वा
त्तत्र मद्रग्रहणेन पठितव्यमिति केचिदाहुः। अयमेतदर्थस्तद्योगे पठितव्यो निमित्तं व्याख्यानात्सर्वत्रार्थग्रहणं वर्णयन्ति हि तत्र वृत्तिकारैर्थशब्दोप्यु

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः॥ ॥आशिषि गम्यमानायां आयुष्य। मद्र। भद्र। कुशल। सुख
।अर्थ। हित इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। चकारो विकल्पानुकर्षणार्थः। शेषे चतुर्थी विधानात्पक्षे षष्ठी
विभक्तिर्भवति। अत्रायुष्यादीनां पर्यायग्रहणं कर्तव्यं। आयुष्यं देवदत्ताय भूयात्। आयुष्यं देवदत्तस्य भूया
त्। चिरं जीवितं देवदत्ताय देवदत्तस्य वा भूयात्। मद्रं देवदत्ताय भूयात्। मद्रं देवदत्तस्य। भद्रं देवदत्ताय। भद्रं देव
दत्तस्य। कुशलं देवदत्ताय कुशलं देवदत्तस्य निरामयं देवदत्ताय निरामयं देवदत्तस्य सुखं देवदत्ताय। सु
खं देवदत्तस्य। शं देवदत्ताय। शं देवदत्तस्य। अर्थो देवदत्ताय। अर्थो देवदत्तस्य। प्रयोजनं देवदत्ताय। प्रयो
जनं देवदत्तस्य। हितं देवदत्ताय हितं देवदत्तस्य। पथ्यं देवदत्ताय पथ्यं देवदत्तस्य। आशिषीति किं। आयु
ष्यं देवदत्तस्य तपः॥ ॥इति जयादित्यकाशिकायां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः॥ २६॥ ॥

॥छ॥ ॥छ॥ ॥

दाक्रियते हितं देवदत्तस्येति हितयोगे चतुर्थी व्याख्येयस्यानाशिषि चरितार्थत्वादाशिषि हितयोगेप्यनेन विकल्पेन भाव्यं अन्यथा हित
ग्रहणमनर्थकमिति मन्यन्ते॥ ॥इति हरदत्तमिश्रविरचितायां पदमंजर्यां द्वितीयस्याध्यायस्य तृतीयः पादः॥ ॥२६॥ ॥छ॥ ॥

॥ द्विगुरेक॥ ॥ अत्र परिभाषिकमेकवचनं स्यात् अनुप्रयोगस्य एकवचनं न स्यात् पंचपूली यं शोभने तितस्मात् द्विगुत्वात् द्विगोरितिपंच
मीच नि दृशिः स्यात् अतो द्व्यर्थस्यैकवचनस्य दर्शनइष्यामिति मत्वाह एकस्य वचनमेकवचनमिति। उक्तमिति वचनं कस्य स्युरो बहुलमिति कर्त्तरि ल्यु
ट् एकस्यार्थस्य वचनमेकवचनमिति कर्मणि षष्ठ्याः समासः। तत्रैकस्यार्थस्य वाचकं भवतीति सामान्येनोपक्रमः पश्चात् किंतदित्यपेक्षायां
द्विगुरित्यस्य पुंल्लिंगस्य संबंध इत्येकवचनमितिन पुंसकोपपत्तिः एतदेव मनसि कृत्य एकस्यार्थस्येति एवं च द्विगुरेकार्थस्य वाचको भवति यदि द्विगर्थस्य

॥ द्विगुरेकवचनं॥ ॥ द्विगुः समासः एकवचनं भवति। एकस्य वचनमेकवचनं। एकस्यार्थस्य वाचको भवतीत्य
र्थः। तदनेन प्रकारेण द्विगर्थस्यैकवद्भावो विधीयते। द्विगर्थ एकवद्भवतीति। समाहार इति द्विगोश्चेदं ग्रहणं नान्यस्य
पंचपूलाः समाहृताः पंचपूली। दशपूली। अर्थस्यैकत्वादनुप्रयोगेप्येकवचनं भवति। पंचपूलीयं शोभने
ति॥ १ ॥ ॥ श्रीकृष्णायानमः॥ ॥ श्री॥ ॥ श्री॥ ॥ छ॥ ॥ छ॥ ॥

कोभवतितच्चवक्तुं नोनेकार्थस्य वचन शतेनाप्येकार्थत्वमापादयितुं शक्यमिति सामर्थ्यादिति देशो विज्ञायते तदाह तदनेन प्रकारेण
तितद्धितिवा कोप न्यासे किमुक्तं भवती त्याह द्विगर्थ एकवद्भवतीति समाहार इति द्विगोश्चेदं ग्रहणमिति तद्धितार्थयो द्विगुत्वस्यैकवद्भावो माभूदि
त्येवमर्थं पंचभिर्गोभिः क्रीताः पंचगवः पराइति। अथ क्रियमाणेपि समाहारग्रहणे इहकस्मान्न भवति पंचपूली च पंचपूली च पंचपूली च पंचपू
ल्य इति शिष्यमाणस्य द्विगुत्वात्तदर्थस्यैकवद्भावः प्राप्नोति न वा बहिरंगत्वात् बहिरंगो यं द्विगर्थः सत्येव द्विगावेकशेषात्सा गभावादेकशेषसन्नि
धावुपजायमानत्वात् तरंगे प्राथमकल्पिके द्विगर्थे चरितार्थ एकवद्भावो न भविष्यति॥ ॥ छ छ॥ ॥ छ॥ ॥

यद्येवं पंचगावः पराः इत्यत्राप्येवमेव भविष्यति सत्यं यदा पराः प्रत्येकं पंचभिर्गोभिः क्रीताः पराः तु बहवः पराः संहताः पंचभिर्गोभिः क्रीयंते तत
दाः यमेकशेषस्य विषयः यदि तर्हि समाहारः द्विगोर्यद्ग्रहणं नार्थेनैव कथं समाहारग्रहणं समाहारः समूहः तस्यैकत्वाद्‌ एकवचनमित्यादि वदेकवचनं भ
विष्यति एवं दिताहं समाह्रियत इति समाहारः इति कर्मसाधनः समाहारश्च ह्युक्तः ऽपेक्षितपरस्पराः पंच पूलाः समासार्थ इति बहुवचनप्रस
गो ऽतिदेश आरभ्यते तस्मात् प्रथिकारणं वचनोस्त्रैः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानमिति अधिकरणं द्रव्यं संख्यावाचीपं
चादिशब्दः यत् संख्याविशिष्टं द्रव्यमभिधीयते तेन तदभिधानयोग्यं वचनमुत्पद्यते पंचपूलीशब्दे तु पंच पूलाः समाह्रियमाणा उच्यंते अतः स
मासार्थस्य पंचादिभिः सामानाधिकरण्याद्द्विवचनबहुवचनप्रसंगे एकवचनं विधीयत इत्यर्थः संख्यासामानाधिकरण्यादित्यनेन कर्मसा
धनत्वं समाहारशब्दस्य दर्शयति भावसाधने तु वैयधिकरण्यं पंचानां पूलानां समाहार इति तदत्र पक्षे न कर्तव्यमेव तदा हि नत्वा समाहारे
कत्वादिति अयमर्थः तिरोहितावयवभेदः समूहरूपः समाहारो द्विगोरर्थः तस्यैकत्वात् नाविवदेकवचनसिद्धेर्नात्र सूत्रेण प्रयोजनं
अवश्यं च नत्र भावसाधनः समाहारः आश्रयणीयः अन्यथायं चानां खट्वानां समाहारः पंचखट्वीत्यत्र या टाबंतं इति स्त्रीत्वं यस्य खट्वा
शब्दस्यानुपसर्जनत्वाद्ध्रस्वो न स्यात् न ह्यनुपसर्जनत्वं वा प्रथमानिर्दिष्टत्वादनेकविभक्तित्वात् भावसाधने तु पंचानां खट्वानां स
माहारः समाहारेणेति समासार्थस्य नानाविभक्तियोगे ऽपि खट्वाशब्दस्य नित्यं षष्ठ्यंतत्वादेकविभक्तित्वे सुपसर्जनत्वाद्ध्रस्वत्वं सिध्य
तीत्येकवचनमित्येतत् तत्तत्रणर्थं कर्तव्यमिमेव पंचपूलीति अकारांतोत्तरपदो द्विगुः स्त्रियां भाष्यत इति स्त्रीलिंगता द्विगोरिति ङीप् ॥ ३१ ॥

॥श्रीः॥ ॥छ॥ ॥ॐ॥ ॥छ॥ ॥

॥ ॥ द्वंद्वश्च॥ ॥ इह यस्य द्वंद्वस्य कश्चिदवयवः प्राण्यंगवाची कश्चित्तूर्यांगवाची कश्चित्सेनांगवाची यथा पाणिमार्दंगिकाश्वारोहा इति सर्वमिति क्रीणा
विरुद्धोऽपि प्राण्यंगादीनां द्वंद्वो भवन् सर्व एवैकवद्भावं प्राप्नोतीति तत्राह अंगशब्दस्येत्यादि ननु सर्वपक्षेऽपि प्रत्येकमेव परिसमाप्तिरंगशब्दस्य न हि प्राणितूर्यसे
नानामेकमंगं संभवति एवं तर्हि गानामेवं रूपस्य द्वंद्ववचनात्तस्य सतो गशब्दस्य प्रत्येकं संबंधः ननु प्रत्येकं परिसमाप्तस्य पश्चाद् द्वंद्ववचने संबंधः त्री
णि वाक्यानि संपद्यन्त इति सत्यं तु तेषामेव ग्रहणं कर्तव्यमिति भावः तत्र प्रथमेन वाक्येन प्राण्यंगानां प्राण्यंगैरेव यो द्वंद्वः स तत्रैकवद्भावो विधीय
ते द्वितीयेन तूर्यांगानां तूर्यांगैरेव तृतीयेन सेनांगानां सेनांगैरेवेति न संकरणप्रसंगः। तथा तूर्यांगानामिति द्वंद्व एकवद्भवतीत्यपेक्षते अत्रांगशब्द

॥ द्वंद्वश्च प्राणितूर्यसेनांगानां॥ एकवचनमिति वर्तते। अंगशब्दः प्रत्येकं परिसमाप्यते त्रीणि वाक्यानि संपद्यन्ते। प्राण्यंगा
नां द्वंद्वः एकवद्भवति। तथा तूर्यांगानां सेनांगानां च। प्राण्यंगानां तावत् पाणिपादं। शिरोग्रीवं। तूर्यांगानां। मार्दंगिकपा
णविकं। वीणावादकपरिवादकं। सेनांगानां। रथिकाश्वारोहं। रथिकपादातं। हस्त्यश्वादिषु परत्वात् पशुद्वंद्वविभा
षयैव भवितव्यं। इतरेतरयोगे समाहारे च द्वंद्वो विहितः। तत्र समाहारस्यैकत्वात् सिद्धमेवैकवचनं॥ ॥ ॥

प्रकारकवचनः पूर्वत्रोत्तरत्र चावयववचनः सेनांगानां चेति पूर्ववद्व्योः शा- पाणिपादमिति। अत्र जातिरप्राणिनामित्येव सिद्धमिति करनिरासार्थं वचनं मा
र्दंगिकपाणविकमिति शिल्पमिति णिप्रत्ययेनैकवद्भावे सति नपुंसकत्वेन भाव्यं नित्यं कुशाः कवचः रथवाजिषत्तिसहिताः करिणो रथवाजियन्तिकरिणेपत्ता
भिः समाकुलमिति वा समर्थनीयं द्वंद्वश्चेत्सा + ठक् वीणावादके तिनिसं क्री उजी विकयोरिति समासः विपंचीपरिवादिनी तन्त्री विकः परिवादकः पणवमृ
दंगमित्यादि तु न्यायात्प्राणिनामित्येवाहि रथिकाश्वारोहमिति कथं रथवाजिपत्तिकरिणीसमाकुलमिति + रम्भ विभाषा समर्थं तस्य प्रकरणेन गा
भरणीयं नाशंकनेतरेतरयोगस्यापि सिद्धमेवैकवचनमिति तत्तस्यानारंभणीयं प्रकरणमिति भावः परिहरति॥ ॥ छ॥ ॥ छ॥ ॥

॥ द्वंद्वं लिंतिकः पुनरस्मो विषयविभागः स्मोह प्राण्यंगादीनामिति कथं पुनः प्राण्यंगादीनां द्वंद्व एकवचनो भवति तस्य वचनस्य प्राण्यंगादीनां समाहार एवे
सर्थो भवति वचनमपि क्लिभेदात् एवं ह्यत्र वचनेऽप्युपपते य एकवचनो द्वंद्वः स एषो भवतीति न पुनः प्राण्यंगादीनां यो द्वंद्व इत्यनूद्य तस्यैकवचनतां विधीयते ए
कवचनश्च द्वंद्वः समाहारद्वंद्वः स प्राण्यंगादीनामपि चार्थे द्वंद्व इत्येव वासि द्व इति समएवैषामिति नियमः संपद्यते दधिपयआदिषु पिये यो द्वंद्व प्रज्ञायत्वादीना
मनेन प्रकरणेन नियमस्याप्राप्तिस्तेषां तावच्चार्थे द्वंद्व इत्यनेन प्राप्तो द्वंद्वः प्रतिषिध्यते य एकवचनो द्वंद्वः स एषां न भवतीति वचनमप्राप्तं अप्रयोगेऽपि एषामवि
षिपयसी इत्यादीनां जातिरप्राणिनामिति नियमस्य प्राप्तिस्तेषामनेन तस्य विधिर्विभवति प्रतिषेधो वेति यद्यपि नियमस्य प्रतिषेधोऽपुनः क्रत्यादिषु सप्र
जापत्यादिभिः सह चयदिकैवचनो द्वंद्व इसेतावन्मात्रस्यापेक्षया समाहारद्वंद्व एव प्रतिषिध्यते न नियमः इत्यादि विभाषा प्रयोजनं तु तत्रैव वरसामः अथे

॥ इदं तु प्रकरणं विषयविभागार्थं। प्राण्यंगादीनां समाहार एव द्वंद्वः। दधिपयआदीनामितरे
तरयोगएव। वृक्षमृगादीनामुभयत्रेति॥ ॥२॥ ॥ श्रीरामचंद्रः॥ ॥छ॥

यं कस्मान्न विज्ञायते इतरेतरयोगएव सोऽप्राप्त एकवद्भावो विधीयत इति उच्यते यदीतरेतरयोगविहितद्वंद्वस्यैकवद्भावो विधीयेत द्वंद्वश्च इत्ययं तेसादीनाम स
माहारनिबंधनं कार्यं न स्यात् दधिपयआदिषु तु पयस्य द्वंद्वस्यैकवचनप्राप्तिस्तस्य प्रतिषिध्येतेति समाहारद्वंद्वस्यैकवचनतायां प्रतिषिद्धायामपि द्वित्वबहुत्वा
भावाद्द्विवचनबहुवचने न स्यातां मतो नियम एवांगीकर्तव्यः अत्र व्याख्यानमेव शरणं अथ नियमोऽपि मवल्ले वमेव कस्मान्न भवति प्राण्यंगादीनां समाहा
र एवेति न पुनः प्राण्यंगादीनामेव समाहार इति उच्यते एवं हि विज्ञायमाने दधिपयआदिषु येषामनेन प्रकरणेन नियमो न प्राप्तोऽतिनेषु प्रतिषेधो
नर्थकः स्यात् तिष्यपुनर्वस्वोरिति बहुवचनग्रहणमनर्थकं स्यात् तद्धि समाहारद्वंद्वप्रत्येति तिष्यपुनर्वसवित्यत्रैकवचनस्य प्रसंगो द्विवचनं मान्स
दिसेव मर्थ्यं यदि चत्व बहुको नियमः स्यात् तिष्यपुनर्वस्वोरत्र प्रकरणे संकीर्तितयोः समाहारद्वंद्वाभावादनर्थकं न स्यात् अतो व्यतिकारणोक्तमेव निय
मस्व रूपमिति निरवद्यं ॥२॥ ॥

का·पद· ७६

॥अनुवादे॥ ॥चरणशब्दः कठकालापादिषु शाखाभेदेषु मुख्यः तदध्यायिषु पुरुषेषु गौणः उभयेषां चैषां गोत्रं च चरणैः सहेति जातिसंज्ञा तत्र शाखाभेदवा
चिनो जातिरप्राणिनामिति सैकवद्भावस्य सिद्धत्वात्प्रयोगो पुरुषवचनो नेह गृह्यते इत्याह चरणशब्दः शाखानिमित्तक इति· शाखाध्ययननिमित्तक इत्यर्थः । गौणइ
तिकश्चिदपि यते । कश्चिद्धि प्रमाणान्तरावगतस्येति । शब्दान्तरप्रमाणं प्रमाणान्तरं प्रसिद्धादिसंकीर्तनमात्रमिति मात्रशब्दो वाक्यान्तरसाधनन्वर्थप्रतिपादना
यप्रयोगः सचेदर्थः प्रमाणान्तरेणावगतः किमिति शब्दः प्रयुज्यते । कार्यान्तरविधानार्थं परा हि कठकालापे ष्वदितेषु आवाभ्यां तत्र गन्तव्यमिति संवादः
कृतो भवति मचविस्मृ सोदाहृतेन दातंप्रतीदमुच्यते मन्त्रदस्यात्कठकालापं किमास्यत इति कठेनप्रोक्तमधीयते कठाः वैशंपायनान्तेवासित्वाणिनिः क

॥अनुवादे चरणानां॥ ॥चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्त्तते । चरणानां द्वंद्व एकवद्भवति अनुवादे गम्यमाने प्र
माणान्तरावगतस्यार्थस्य शब्देन संकीर्त्तनमात्रमनुवादः । उदगात्कठकलापं । प्रत्यष्ठात्कठकौथुमं कठकलापादीनामुदय
प्रतिष्ठे प्रमाणान्तरावगते यदा पुनः शब्देनान्वयेनैतदेव मुदाहरणं । अनुवाद इति किं । उदगुः कठकालापाः । स्थेणोरद्यत
न्यां चेति वक्तव्यं । ख्येणोरिति किं । अमंदिषुः कठकालापाः । अद्यतन्यामिति किं । उदयन्ति कठकालापाः ॥ ॥अध्वर्युक्रतुरन
पुंसकं ॥ ॥अध्वर्युवेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुः ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्री४॥ ॥छ॥

ठ्वरकात्कलापिकलापिशब्दात्कलापिनोऽण् नान्तस्य टिलोपे सब्रह्मचारीत्यादिना टिलोपः उभयत्राप्येत्रणो लुक् एतेन कठकौथुमौ व्याख्यातौ ॥ यदानुप्रत्य
म एवोपदेशः इति प्रमाणान्तरेणानवगतस्य शब्देनाधंप्रणायनमित्यर्थः । उदगुरिति । आत इति स्थेञ्जुस्तदुस्य यदागंता दिति परह्रस्वत्वं । अद्यतनीति लुङः
पूर्वाचार्यसंज्ञा अनंदिषुरिति टुनदि समृद्धौ । सिजभ्यस्तेति जुस् ॥ ॥अध्वर्यु॥ ॥अध्वर्युशब्दः ऋत्विग्विशेषे प्रसिद्धः नच तेन क्रतोर्विशेषणमुपपद्य
ते नहि सोऽस्ति क्रतुर्यत्राध्वर्योरन्वयः नापि सोऽस्ति यत्राध्वर्योरेवान्वय इति मुख्यार्थासंभवाद्दोषवारिकयहणमित्याह अध्वर्युवेद इति यजुर्वेद इत्यर्थः ।
तत्र ह्याध्वर्यवं विधीयते कर्मस्वरूपस्येति क्रत्वमिताया फलस्य चोपदेशो विधानं ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ राम० ७६

।अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानामिति कथं तर्हि सूत्रे सामानाधिकरण्यमित्याह अध्वर्युक्रतुरिति तादृशावयवत्वाद्द्वन्द्व एव तथोक्त इत्यर्थः ।
परिषन्नरनपुंसकमित्यनेन मुख्यया वृत्त्या द्वन्द्व एवोक्त इति तदा सनपुंसकमित्यस्यापवादो विज्ञायेतानया बाधेनोपपन्नो मसंबाधो माप्यः अर्कश्चाश्वमेधश्च
अर्काश्वमेधं । साह्नश्चातिरात्रश्च साह्नातिरात्रं । इषुवज्रादि इति सामवेदे ये यागविधाने । राजसूयवाजपेयशब्दावर्द्धर्चादिषु पठितौ तस्तौ नपुंसकलिङ्गौ तदा प्रत्युदा-
हरणं ॥ ॥ अध्ययन ॥ ॥ आम्नायपूर्वेनेनेत्याम्नायते शब्दमात्रमिहाध्याशब्देनोच्यते न तद्विशब्द एव असंदेहार्थं विप्रकृष्टाख्यानामध्ययनतःसकृत

अनुवादे चरणानां ॥ ॥ चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्त्तते । चरणानां द्वन्द्व एकवद्भवति अनुवादे गम्यमा-
ने । प्रमाणान्तरावगतस्यार्थस्य शब्देन संकीर्त्तनमात्रमनुवादः । उदगात्कठकालापं । प्रत्यष्ठात्कठकौथुमं करक ॥
अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानां द्वन्द्व एकवद्भवति । अध्वर्युक्रतुरनपुंसकं द्वन्द्व इति गौणो निर्देशः । अर्का-
श्वमेधं । साह्नातिरात्रं । अध्वर्युक्रतुरिति किं । इषुवज्रौ । उद्भिद्बलभिदौ । अनपुंसकमिति किं । राजसूयवाजपेये । इ-
हकस्मान्न भवति । दर्शपौर्णमासौ । क्रतुशब्दः सोमयज्ञेषु रूढः ॥ ॥ अध्ययनतोऽविप्रकृष्टाख्यानां ॥ ॥ अध्य-
यनेन निमित्तेन येषामविप्रकृष्टाप्रत्यासन्नाऽऽख्या तेषां द्वन्द्व एकवद्भवति । पदककमकं । क्रमकवार्त्तिकं
। संपाठः पदानां क्रमस्य च प्रत्यासन्नः । अध्ययनत इति किं । पितापुत्रौ । अविप्रकृष्टाख्यानामिति किं । याज्ञिकवैया-

णादविप्रकृष्ट इति पदच्छेदः । आख्यानां च नस्वरूपेणाविप्रकर्षः किं तु प्रवृत्तिनिमित्तद्वारेणेत्येतद्वेहाध्ययनं यदाह अध्ययनत इति अधीनिरध्ययनं
अध्ययनेनाध्ययनतः आद्यादित्वात्तसिः प्रवृत्तिनिमित्तभूतस्याध्ययनस्याविप्रकृष्टत्वात्तद्द्वारेण विप्रकृष्टा आख्या येषां तेऽध्ययनतोऽविप्रकृष्टाख्याः एत-
देवाह अध्ययनेन निमित्तेनेत्यादि । पदकक्रमकमिति । पदान्यधीते पदकः क्रमादिभ्यो वुन् एवं क्रमकः वृत्तिः संहिता तामधीते वार्त्तिकः उक्थादि-
त्वाट्ठक् । अत्र प्रवृत्तिनिमित्तस्याध्ययनस्याविप्रकर्षं दर्शयति संपाठ इति संपठनं संपाठः अध्ययनमित्यर्थः प्रत्यासन्न इति । पदान्यधीत्य क्रमोऽध्येतव्य इति
कृत्वा एवं क्रमकवार्त्तिकमित्यत्रापि नानधीत्य संहितां क्रमोऽध्येतुं शक्य इति प्रत्यासत्तिर्विज्ञेया ॥ ३ ॥ ॥

का.प८० जातिरा। ।जातिवाच्यवयवत्वाज्जातिर्द्वन्द्व इति गोगोनिर्देशः आराशस्त्रीति। आराधनादेः धानाशष्कुली तिष स्नांरस्नानांकुलंषष्कुलीगोरादिपा
७७ ठादूपसिद्धिः।नंदकपांचजन्यावितिसंज्ञाप्राप्तावुत्तरोरवङ्गोस्यनंदकः शंखः पांचजन्यः प्रकाशितेति जातिपरत्वेवेतिजातिप्राधान्य इत्यर्थः ननियत द्र
व्यविवक्षायामितिपरःकचिद्देशादेरनियतानां द्रव्यविशेषाणांविवक्षातदाजातिशब्दत्वेप्येकवद्भावोनभवतीत्यर्थः परएामलकानीतिफलजा
तिवाचिनावेतौ॥ ॥विशिष्ट॥ ॥विशिष्टलिंगानामित्यस्यविवरणंभिन्नलिंगानामिति॥ विपूर्वः शिषिर्भिदिनासमानार्थः तथाचभेदकं विशेषणं

॥जातिरप्राणिनां॥ ॥जातिवाचिनांशब्दानांद्वन्द्वएकवद्भवति प्राणिनोवर्ज्जयित्वा। आराशस्त्रि। धानाश
ष्कुलि। जातिरितिकिं। नंदकपांचजन्यौ। अप्राणिनामितिकिं। ब्राह्मणक्षत्रियविट्शूद्राः। नत्रिवयुक्तन्यायेनद्र
व्यजातीयानामयमेकवद्भावोनगुणक्रियाजातीनां। रूपरसगंधस्पर्शाः गमनाकुंचनप्रसारणानि। जातिपर
त्वेचतातिशब्दानामयमेकवद्भावोननियतद्रव्यविवक्षायां। इहकुंडेवदरामलकानितिष्ठंति॥ ॥विशिष्टलिंगो
नदीदेशोऽग्रामाः॥ ॥विशिष्टलिंगानांभिन्नलिंगानांनदीवाचिनांशब्दानांदेशवाचिनांचग्रामवर्ज्जितानां
द्वन्द्वएकवद्भवति। नद्यवयवयोर्द्वन्द्वोनदीत्युच्यते। देशावयवश्चदेशः। नदीदेशइत्यसमासनिर्देशएवायं। उध्य ७७
श्चा॥ इरावतीच॥ ॥छ॥ ॥ एम०
मेघंविशेष्यमित्युच्यतेऽनेन। विशिष्टेनेत्यत्रापिभेदद्वारेणोवाधिकामयोर्विशेष्यातश्चयस्यहिनत्रभेदकः सनजाधिकोभवतिनदीवाचिना ७७
मित्यादिकथंतर्हि सत्रेविशिष्टलिंगादिशब्दानांद्वन्द्वेनसामानाधिकरण्यमित्याहनयवयवइत्यादिना। अश्वग्रामाचयवोग्ग्रामइत्यपिद्रष्टव्यं।
अग्रामाइतिवैकवचनस्यानेवद्भवचनं। असमासनिर्देशस्वायमितिसमासेहिव्यातिकीर्णविषयो द्वन्द्वएकवत्स्यात् गंगाकुरुक्षेत्रेइतिस
मासोहिभवन्नितरेतरयोगेवैद्विवचनप्रसंगः समाहारेचेन्नपुंसकत्वप्रसंगइतिभावः॥ ॥ ॥

उद्येष्वेवेतीति उद्ध उत्सर्गो भिघोष्यो न देदेशः खल्वपीति उल्लङ्घ्यत इति शेषः जांबवशालूकिन्याविति जांबवं नगरं शालूकिनी ग्रामः तत्रोभयतश्च ग्रा
माणामिति प्रतिषेध एव भवति ग्रामो भयावयवत्तु ढंढो नो दासन्तः जनपदो हि देश इति। जनाय यत्र संचरंति स देश इत्यर्थः अवश्यं जनपदो देश इति सगी।
कर्तव्यमित्याह तथा चेति ग्रामेनाधेयं अभयाग्रामकुक्कुरा कृत्वा दोषग्रामयग्रहणेन नगरमपि व्युदस्यते तत धरिहापि नगरावयवस्यापि द्वंद्वस्यात्र प्रतिषेधः स्या
त् इत्याशङ्क्यासिद्धं यदयं प्राचां ग्रामनगराणामिति ग्रामस्य ग्रहणं करोति तन्न ज्ञापयति इह शास्त्रे ग्रामग्रहणेन नगरं न गृह्यत इति। नैतत् सुष्ठु अतेवस्यातो हि तत्र

उदीच्य एवेति। गंगाशोणं। देशाः खल्वपि। कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं। कुरुजांगलं। विशिष्टलिंग इति
किं। गंगायमुने। मद्रकेकयाः। नदीदेश इति किं। कुक्कुटमयूर्यौ। अग्रामा इति किं। जांबवश्च शालूकिनी च। जांब
वशालूकिन्यौ। नदीग्रहणमदेशत्वात् जनपदो हि देशः तथा च पार्वतानां ग्रहणं न भवति। कैलासश्च गंध
मादनं च कैलासगंधमादने। अग्रामा इति अत्र नगराणां प्रतिषेधो वक्तव्यः। इह मा भूत्। मथुरा च पाटलिपुत्रं
च मथुरापाटलिपुत्रं। उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः। शौर्यं च नगरं। केतवतं च ग्रामः। शौर्यकेतवते॥

॥ ॥४॥ ॥

ग्रामत्वादेव सिद्धे नगरग्रहणं प्रवृत्तिभेदज्ञापनार्थं ग्रामग्रहणमंगविशेषणं। पूर्वेषुकामशमीत्नगरग्रहणं तत्तरपदाविशेषणं पूर्वपाटलिपुत्रक इति
वाहीकग्रामेभ्यश्च उदीच्यग्रामाच्चेत्यादौ ग्रामग्रहणेन नगरस्य ग्रहणं न स्यात् तस्मादिह ग्राम इत्यत्र नागरप्रतिषेध इति ग्रामाश्रयस्य प्रतिषेधस्य प्रतिषे
ध इत्यर्थः उभयतश्चेति ग्रामनगरात्मके उभयस्मिन्सति ग्रामाश्रयः प्रतिषेध एव वक्तव्यो न पुनर्नगराश्रयः प्रतिषेधप्रतिषेध इत्यर्थः ४ ॥

॥ ॥छ॥ ॥

का॰ प॰ ८०

७८

॥क्षुद्रजं॥ ॥क्षुद्रश्च शोयमाल्सेवकपणे क्षुद्रो पं पुरुष इति अल्पं हीनेशीलहीने च क्षुद्राख्यो वेति अल्पपरिमाणोपचये क्षुद्रास्तं तुलाशति इह तु जंतुश
द्दसमभिव्याहारात् इति मस्य ग्रहणमित्याह अपचितपरिमाणः क्षुद्र इति· अल्पशरीर इत्यर्थः अपचयस्यापेक्षिकत्वादनवस्थामाभूदितिस्मृतिमुपन्य
स्यति क्षुद्रजंतुरनस्थिः स्यादिति। यस्यास्थीनि विद्यंते सोनस्थिः स्मृतं तरमाह अथवेति। सोत्रयः क्षुद्रः अहर्षि पिस्फापितं चोत्यादिनाकप्रत्ययः
यः क्षुधमानोपि नम्रियते यथा जलूकास क्षुद्रजंतुः यस्तु म्रियते स पापनिमित्तत्वान्न प्रोदाहृः। क्षुद्र एवय इति सुतम्निवृशा देवापंप्रभृति इत्यर्थः स्मृतं
तरमाह शतंवेति प्रसृतिरंजलेरर्द्धं येषां शतं प्रसृतो भवति शतेनार्द्धांजलिः पर्यंत इत्यर्थः स्मृत्यंतरमाह शतंवेति प्रसृतिरंजलेरर्द्धं येषां शतं प्रसृतो भव

॥क्षुद्रजंतवः॥ ॥अपचितपरिमाणः क्षुद्रः। क्षुद्रजंतुनां विनाद्वंद्वः एकवद्भवति। दंशमशकं। यूकालिक्षं।
क्षुद्रजंतवः इति किं। ब्राह्मणक्षत्रियौ क्षुद्रजंतुरनस्थिः स्यादथवा क्षुद्र एव यः। शतं वा प्रसृतो येषां केचिदानकु
लादपि॥ ॥आनकुलाद्यपीतीयमेव स्मृतिः प्रमाणमितरा सांतद्विरोधात्॥ ॥येषां च विरोधः शाश्वति
कः॥ ॥विरोधो वैरं शाश्वतिको नित्यः। येषां शाश्वतिको विरोधस्तद्वाचिनां शब्दानां द्वंद्व एकवद्भवति। मा
र्जारमूषकं। श्वशृगालं। अहिनकुलं। शाश्वतिक इति किं। गोपालिशालंकायनाः कलहायंते। चकारः
पुनरस्यैव समुच्चयार्थः। तेनयच्छुशकुनिद्वंद्वे विरोधिनामनेन नित्यमेकवद्भावो भवति। अश्वमहिषाका

राम॰ ७८

तिशतेनार्द्धांजलिः पूर्यत इत्यर्थः। स्मृत्यंतरमाह केचिदानकुलादपीति नकुलपर्यंताः क्षुद्रजंतव इत्यर्थः। उत्तरासांतद्विरोधादिति अनस्थ्यादिभिः
स्मृतिभिर्ये प्रयोगा उपदर्शितान ते सर्वे ताभिः संगृह्यंत इत्ययमत्र विरोधः॥ ॥येषां च॥ ॥विरोधो वैरमिति न सहानवस्थानादिः छायातपावि
त्यादावपि प्रसंगात्। पूर्वसूत्राद्वा नुवृत्तेन जंतुग्रहणेन विरोधस्य विशेषणात् जंतूनां हि विरोधो वैरमेव भवत्भवति शाश्वतिको नित्य इति शाश्वदिति
त्रैकाल्यमाह तत्र भव इति कालाट्ठञितोतादपि निपातनादिकादेशः अयथानां भमात्रे टिलोपाभावश्च गोपालस्यापत्यानि गोपालयः अत्र कादाचि
त्को विरोधः चकारः पुनरित्यादि यच्छुशकुनिद्वंद्वावकाशो महाजोरभ्रं महाजोरभ्राः हंसचक्रवाकं हंसचक्रवाकाः विरोधिनामेकवद्भावस्यावकाशः अश्व

गशूद्राणां ॥ शूद्रशब्दोत्र त्रैवर्णिकव्यतिरिक्तजातिमात्रवचनो न वृषलपर्यायः निरवसितप्रतिषेधात् निरवसितइति निरवपूर्वात् सिनोतेः कर्मणिक्तः
तत्र प्रकृत्यर्थमाह निरवसानं बहिः करणमिति अनेकार्थत्वाद्धातूनामुपसर्गवशाद्वेतिभावः पात्राद् बहिः करणमिह विवक्षितमित्याह येरिति संस्का
रेणापीति भस्मना शुध्यते कांस्यमित्यादिना स्मृतिकारैरुक्तेन न शुध्यतीति न तत्र भोक्तुं न लभन्त इति ततो बहिष्कृता भवन्ति ॥ ॥गवाश्व॥ ॥द्वन्द्वरूपा
णि स्न्त्वपा प्रभृतीनीति नपुंसकोपपत्तिः गवाश्वप्रभृतीनि कृतैकवद्भावानामेव पठ्यन्ते तेषामनेन साधुत्वमात्रं विधीयते न त्वेकवद्भाव इत्याह गवाश्व

॥शूद्राणामनिरवसितानां॥ ।निरवसानं बहिः करणं कुतो बहिः करणं पात्रात् येभुक्ते पात्रं संस्कारेणापि
न शुध्यतीति निरवसिताः न निरवसिताः अनिरवसिताः अनिरवसितशूद्रवाचिनां शब्दानां द्वन्द्व एकवद्भवति । त
क्षायस्कारं । रजकतन्तुवायं । अनिरवसितानामिति किं । चण्डालमृतपाः ॥ ॥गवाश्वप्रभृतीनि च ॥ ॥गवाश्व
प्रभृतीनि कृतैकवद्भावानि द्वन्द्वरूपाणि साधूनि भवन्ति । गवाश्वं । गवाविकं । गवैडकं । अजाविकं । अजैडकं ।
कुब्जवामनं । कुब्जकैरातकं । पुत्रपौत्रं । श्वचण्डालं । स्त्रीकुमारं । दासीमाणवकं । शाटीप्रच्छदं । उष्ट्रखरं । उ
ष्ट्रशशं । मूत्रशकृत् । मूत्रपुरीषं । यकृन्मेदः । मांसशोणितं । दर्भशरं । दर्भपूतीकं । अर्जुनशिरीषं । तृणोलपं ।
दासीदासं । कुटीकुटं । भागवतीभागवतं । गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं रूपान्तरे तु नायं विधिर्भवति ।
गोश्वं गोश्वौ । पशुद्वन्द्वविभाषैव भवति ॥ ५ ॥

प्रभृतीनीति गवाश्वादीनां चतुर्णां पशुद्वन्द्वविभाषायां प्राप्तायां वचनं । एवमुष्ट्रखरं उष्ट्रशशमिति दर्भशरादीनां तृणोलपपर्यन्तानां तृण
द्वन्द्वविभाषायां प्राप्तायां । दासीदासादीनां पुमान् स्त्रिया इत्येकशेषाभावो निपातनात् शाटीप्रच्छदमित्यादीनामप्राणिजातिवचनानामपि बहु
प्रकृत्यर्थः पाठः । अन्येषां कुब्जवामनादीनामप्राप्ते वचनं ॥ यथोच्चारितं द्वन्द्ववृत्तमिति निगणेयत्र दृशाः कृतावग्रहादेशाः पठितास्तादृशानामेव

५

का॰प॰२॰ ७९

विभाषा॥ ॥अत्र वृक्षादिभिः प्रत्येकं द्वन्द्वो विशेष्यते नचैको वृक्षशब्दो द्वन्द्वः। नच द्वयोः सहप्रयोगः एकशेषात् नच पर्यायाणामपि सहप्रयोगः विरूपाणा
मपि समानार्थानामेकशेषवचनात्। नापि विशेषेणां सहप्रयोगः वृक्षश्च धवश्चेति वृक्षशब्दे नैवाशेषात् न च पर्यायाणामपि सहप्रयोगः विरूपाणामपि समा
नार्थानामेकशेषवचनात्। नापि विशेषेणां सहप्रयोगः वृक्षश्च धवश्चेति वृक्षशब्देनैवाशेषविशेषाक्षेपाद्धवादिशब्दप्रयोगस्य निष्फलत्वात्। कथं त
र्हि गोबलीवर्दं तिलाढकं ब्राह्मणब्राह्मणीविशेषयोः सहप्रयोगः बलीवर्दशब्दसंनिधौ गोशब्दस्य स्त्रीगवीष्वेव वृत्तेर्द्वयोरपि विशेषवचनत्वादिति चेत् इहापि तर्हि ध
वपदसंनिधौ वृक्षशब्दस्य तदन्यविषयतया द्वन्द्वप्रसंगः। किंच काकेपि कथं सहप्रयोगः ब्राह्मणाश्रमणावसिष्ठोप्यागत इति। प्राधान्यख्यापनार्थमुक्ता

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्॥ ॥वृक्षमृगतृणधान्यव्यञ्जनपशु
शकुनि अश्ववडव पूर्वापर अधरोत्तर इत्येतेषां द्वन्द्वो विभाषैकवद्भवति। प्लक्षन्यग्रोधं। प्लक्षन्यग्रोधाः। रुरुपृषतं। रुरुपृ
षताः। कुशकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। तित्तिरिकपिञ्जलं। ति
त्तिरिकपिञ्जलाः। अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरे ६ ॥ ॥छ॥ ॥छ॥ ॥

र्थस्यापि प्रयोग इति चेत् द्वन्द्वेपि तर्हि प्राप्नोति तस्मादनभिधानमेवाश्रयणीयं नहि वृक्षधवमिति लोकेभिधानमस्ति अतो वृक्षविशेषवाचिनां ग्रहणं एवं मृगा
दिष्वपि द्रष्टव्यं इत्येतेषां द्वन्द्व इति एतेषामिमेकापि षष्ठी विषयभेदाद्भिद्यते वृक्षादीनां शकुनिपर्यन्तानामवयवषष्ठी अश्ववडवादीनामिति निर्धारणषष्ठी ये राम॰ ७९
त्वाप्राणिनस्तेषां जातिरप्राणिनामिति नित्यं समाहारद्वन्द्वे प्राप्ते उभयत्र विधीयते यो विभाषा प्राप्त एकवचनो द्वन्द्वः स एषां भवतीति वचनमत्राश्रयणी
न तेषामेव वृक्षादीनामन्येः सह द्वन्द्वे यथाप्राप्तं नित्यो विकल्पितो वा एकवद्भावो भवति व्रीहिकुशप्लक्षमिति जातिरप्राणिनामिति नित्यः प्लक्षशब्दस्य शीद्रस्य
द्रुमवाचित्वाज्जातिरप्राणिनामित्यस्य प्राप्ते तोवार्थे द्वन्द्व इत्युभयत्र प्राप्तो भवति॥ पशुग्रहणं हस्त्यश्वादिषु परत्वात् सेनांगलक्षणस्य नित्यविधेर्बाध

नांमृगशकुनिग्रहणं किमर्थं यावतैषामनेन प्रकरणेन नित्य एकवद्भावः प्राप्नोत्य द्वंद्वेनायं विकल्पो भवतु नायेत अन्यत्र प्राप्त्यभावादेषामुभयत्रै
वद्वंद्व इति नियमो नैतं भवति। अथैषामेवोभयत्र द्वंद्व इति नियमः स्यात् कृतं तर्ह्येषां स्यात् तन्नं चिरितिचेत् यद्येवं वार्थे द्वंद्व इति सामान्यलक्षण
मनवकाशं स्यात् विशिष्टविधानमेव तदानीमाश्रयणीयं स्यात्। प्राण्यंगादीनां समाहारे विषय... इतरेतरयोगे ह्यश्वादीनामुभयत्रै
ति। अथैषामेवोभयत्रेत्यनेनामेषामुभयत्रापि द्वंद्वो वार्यते अन्यतरत्र तु भवत्येव एवमपि कान्यत्रेति न ज्ञायते सर्वो द्वंद्वो विभाषयैकवद्भवतीति
चानुपपन्नं स्यात्। उच्यते यत्तु तुल्यजातीयानामेवायं विकल्पस्तत्रैव नियमः प्रवर्तते मृगविशेषवाचिनां मृगविशेषवाचिभिरेवोभयत्र द्वंद्वः अ
मेभस्तु सहान्यतरत्रेति न चैवमपि न ज्ञायते क्वान्यतरत्रेति तस्मादेतदेवं यद्युभयत्रैषां द्वंद्व इति श्रुतं स्यात् इह तु विभाषैकवचनो द्वंद्व इति श्रूयते तत्र तथा
यो विभाषा प्राप्त एकवचनो द्वंद्वः स मृगविशेषवाचिनां मृगविशेषवाचिभिरेव नान्यैरिति वचनव्यक्त्योऽक्रमेव ज्ञायते अन्यैः सहेतरेतरयोगा द्वं
द्व इति। अथास्मिन्वचनमक्तौ विभाषाग्रहणं किमर्थं यावता विभाषैवैकवचनो द्वंद्वः प्राप्तः तत्रैतावद्वक्तव्यं स्तु य एकवचनो द्वंद्वः स एषामे
भिरेवेति उच्यते असति विभाषाग्रहणे वचनेऽस्मिन्नंतरमपि इहं भाव्येत एषामेभिः सहैकवचन एव द्वंद्व इति यथा प्राण्यंगादिषु सति तु ताभि
न्वस्य नियमस्यासंभवादिति मतो नियमः। संपद्यते एवं पूर्वापरमधरोत्तरमित्यत्रापि नियमस्य रूपं विज्ञेयं। यस्तु द्वंद्व इत्येव सिद्धे अश्ववडव
ग्रहणं प्रतिपदविधानार्थं तत्र प्रतिपदविधानादश्ववडवमित्येकवद्भावपक्षे एवं वडवाश्च वडवाविमेत द्वाविति सामन पुंसकमित्येतदेव भव
तित च्छद्वंद्वेनस्य एकवद्भावभावात् परात्वल्लिंगं विधीयमानं नपुंसकत्वमेकवद्भाववदेव प्राप्नोति यद्विहितं भवति एवं वडवाश्च वडवाविमे ततु एकव
द्भावाभावपक्षे प्रवर्तते अश्ववडवौ अश्ववडवान् इति एतदेवाभिप्रेत्य वृत्तिकारेण वक्ष्यति अश्ववडवयोर्विभाषैकवद्भाव उक्त इत्या
हि॥ ॥६॥ ॥

का॰ प॰ ८०

८०

बहुप्रकृतिरितिवहूनोवहुत्वसंख्यायुक्तावन्तियेपदार्थाः प्रकृतिः कारणंयस्यद्वंद्वार्थस्यसबहुप्रकृतिः। तदर्थाभिधायित्वाद्द्वंद्वोपिबहुप्रकृतिः।
नेदंस्वतंत्रलक्षणांतरंयेनितयेचेद्वनस्पत्यादीनामपिएतत्सूत्रविहितंविकल्पंबाधित्वाबहुप्रकृतित्वेनित्यएकवद्भावः स्यात् विकल्पेफ
लादीनामपिजातिरप्राणिनामित्यादिलक्षणांतरेणप्राप्तंनित्यमेकवद्भावंबाधित्वाबहुप्रकृतित्वेविकल्पः स्यात् अतोलक्षणांतरस्य
शेषोयंतत्रापियथाविभाषावृक्षेत्यत्रफलादीनांतस्यैवशेषत्वंस्यात्तत्रोवनस्पत्यादिषुबहुप्रकृतित्वेएतद्विकल्पाभावेपिजातिरप्रा
णिनामितिनित्योविधिः स्यात् फलादिषुतुनदोषः एतद्विकल्पप्राप्त्यभावाल्लक्षणांतरप्राप्तेरेवनियमनात्तस्मात्सर्वस्यैवप्रकारणा

।बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां एषांबहुप्रकृतिरेवद्वंद्व एकवद्भवति।
नद्विप्रकृतिः बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधौ रुरुपृषतौ हंसचक्रवाकौ मूकालिक्षौ व्रीहि
यवौ कुशकाशौ ॥ ॥छ॥ ॥

स्यायंशेषस्तदेतदाह एषांबहुप्रकृतिरेवेतिरेवेति एषांफलादीनांद्वंद्वोनेनलक्षणांतरेणवाएकवद्भवन् बहुप्रकृतिरेवैकवद्भवतीत्यर्थः।
बदरामलके इति अत्रजातिरप्राणिनामितिनभवति रथिकाश्वारोहाविति अत्रसेनांगलक्षणः प्लक्षन्यग्रोधाविति अत्रायंविकल्पोजाति राम॰
रप्राणिनामितिनित्यश्चनभवति अवनस्पतीनांतुवृक्षविशेषाणामबहुप्रकृतित्वेप्ययंविकल्पोभवत्येवआम्रपलाशआम्रपला ८०
शौ। अन्येतुवनस्पतिग्रहणंवृक्षमात्रोपलक्षणंमन्यंते रुरुपृषतौ हंसचक्रवाकाविति अत्रायमपिविकल्पस्याभावः मूकालिक्षेइति
क्षुद्रजंतवइत्यस्याभावः व्रीहियवौ कुशकाशाविप्यत्रतत्सयोः॥ ॥छ॥ ॥

विप्रति॥ ॥परस्परविरुद्धमिति सहानवस्थानादिलक्षणो विरोधः विप्रतिषिद्धानामित्यादि सत्त्वे तु तद्वाच्यवयवत्वाद्विरूपमेव तथोक्तमिति भावः॥
अद्रव्यवाचिनामिति एतेनाधिकरणशब्दो द्रव्ये वर्त्तते न त्वाधारवृत्तिरिति दर्शयति न हि द्वन्द्वावयवानामाधारे वृत्तिः संभवति निमित्तार्थत्वादाधारस्येति
भावः॥ अयमपि नियमार्थः प्रारंभः नियमस्वरूपं च यदेकवचनान्तो द्वन्द्वो विभाषया प्राप्तः स यदि विप्रतिषिद्धवाचिनां भवत्यद्रव्यवाचिनामेव द्रव्यवा

॥विप्रतिषिद्धं चानधिकरणवाचि॥ ॥परस्परविरुद्धं विप्रतिषिद्धं। विप्रतिषिद्धार्थानां शब्दानामनधिकरण
वाचिनामद्रव्यवाचिनां द्वंद्व एकवद्भवति। विभाषानुकर्षणार्थश्चकारः। शीतोष्णं। शीतोष्णे। सुखदुःखं। सुखदुः
खे। जीवितमरणं। जीवितमरणे। विप्रतिषिद्धमिति किं। कामक्रोधौ। अनधिकरणवाचीति किं। शीतोष्णे उद
के॥ ॥न दधिपयआदीनि॥ यथायथमेकवद्भावे प्राप्ते प्रतिषेध आरभ्यते। दधिपयआदीनि शब्दरूपा
णि नैकवद्भवंति। दधिपयसी॥ सर्पिर्मधुनी॥ मधुसर्पिषी। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कंदविशाखौ। परि
व्राट्कौशिकौ। प्रवर्ग्योपसदौ। शुक्लकृष्णौ। इध्माबर्हिषी॥ निपातनाद्दीर्घः। दीक्षातपसी। श्रद्धातपसी॥ मेधा
तपसी। अध्ययनतपसी। उलूखलमुसले। आद्यवसाने। श्रद्धामेधे। ऋक्सामे। वाङ्मनसे॥ ७॥ ॥

चिनां त्वितरेतरयोग इति॥ ॥न दधि॥ ॥यथायथमिति व्यंजनत्वाद्विकल्पस्य प्राप्तिस्तत्रादितस्त्रिषु पूर्वसूत्रविकल्पस्य प्रसक्तस्य प्राप्तिरिति वि
ह॥ यद्येवं प्रतिषिद्धेऽस्मिंश्चिकल्पे जातिलक्षणः नित्यः स्यादेकवद्भावः परिहारोऽत्र वक्ष्यते त्रिष्वपि प्रायदुक्तं तन्नेति यथायथं दर्शयभिधास्यते तत्तथात्राप्येक
वद्भावमात्रमेव निषिध्यते॥ किंच ब्रह्मप्रजापत्यादिषु त्रयं पठितेषु समाहारद्वंद्वनिषेधमुखेनेतरेतरयोगद्वंद्वो व्यवस्थाप्यते तेन तत्साहचर्यादितरे
ष्वपि चतुर्षु तदेव युक्तं॥ ॥७॥ ॥

॥अधिकरण॥ ॥वृत्तिर्वर्त्तनं समासः सोऽस्यास्तीति समासावयवभूतं वर्त्तिपदं तस्यार्थोऽधिकरणमित्युच्यते कथं पुनस्तदधिकरणमित्याह स हीति
नियमस्य चात्र प्रतिषेधः प्राण्यङ्गादीनां समाहार एवेति नियमो वर्त्तिपदार्थस्यैतावत्त्वे गम्यमाने न भवतीति न पुनः सर्वस्यैव तत्समाहारद्वन्द्व
स्य प्रतिषेधः। यद्येवं प्रतिषिद्धे नियमे दश दन्तोष्ठा इत्यधिकरणैतावत्त्वेऽपि चार्थे द्वन्द्व इत्यनेन समाहारेऽर्थे द्वन्द्वः स्यादेव ये चात्र प्रकरणे संकी
र्त्तितास्तेषु नियमस्याप्रसङ्गात् तस्मिन्प्रतिषेधे चार्थे द्वन्द्व इत्यनेन समाहारे द्वन्द्वः स्यादेव दशाश्वा ब्राह्मणाः क्षत्रिया इति अतः प्रकृतानामन्येषां च
सर्वेषामेकवचनो द्वन्द्वो न भवति अधिकरणैतावत्त्वे इति समाहारद्वन्द्व एव प्रतिषेध्यः। उच्यते अधिकरणं वर्त्तिपदार्थ इत्युक्तं न च समाहारद्वन्द्वे

॥अधिकरणैतावत्त्वे च॥ ॥नेति वर्त्तते। अधिकरणं वर्त्तिपदार्थः। स हि समासस्यार्थस्याधारः। तस्यैताव
त्त्वे परिमाणे गम्यमाने द्वन्द्वो नैकवद्भवति यथायथं प्रेकवद्भावः प्राप्तः प्रतिषिध्यते। दश दन्तोष्ठाः। दश मार्दङ्गि
कपाणविकाः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

वर्त्तिपदार्थस्यैतावत्त्वं शक्यं प्रतिपादयितुं दश दिशा द्वन्द्वप्रयोगेऽपि हि तस्यैव द्वन्द्वार्थस्य समाहारस्य संख्याविशेषोऽवगम्यते न तु वर्त्तिपदार्थस्य
यथा द्विगौ दश पञ्चपूल्य इति। अतो वर्त्तिपदार्थस्य संख्याविशेषं प्रतिपिपादयिषता इतरेतरयोगद्वन्द्वो विधेय इति दशाश्वा ब्राह्मणाः
क्षत्रिया इत्यादौ तावद् दोषः यद्येवमनेनैव न्यायेन दश दन्तोष्ठा इत्यादावपि समाहारद्वन्द्वो न भविष्यतीति नार्थः प्रतिषेधेन। नैवं असत्यस्मि
न्प्रतिषेधे प्राण्यङ्गादीनां समाहार एवेति नियमादितरेतरयोगद्वन्द्वो न स्यात्। न च समाहारद्वन्द्वे दशादिप्रयोगेऽपि वर्त्तिपदार्थस्य संख्यावि
शेषः प्रतिपादयितुं शक्य इति अधिकरणैतावत्त्वे प्रतिपिपादयिषिते द्वन्द्व एव न स्यादित्ययं प्रतिषेधः। दश दन्तोष्ठा इति। अत्र दशश
ब्दस्य प्रत्येकं संबन्धाद् वर्त्तिपदार्थस्यैतावत्त्वं गम्यते। समुदायसंबन्धेऽपि दन्तोष्ठात्मकवर्त्तिपदार्थगतैव संख्या॥ ॥छ॥ ॥छ॥ ॥

॥विभाषा॥ ॥अधिकरणैतावत्त्व इत्यधिकारात्समीपयन्नपदस्तस्मिन्निति गम्यते इह तौ तदर्थमात्रं दर्शितं अधिकरणैतावत्त्वस्य समीप इति अत्र च भाव
प्रधानः समीपशब्दः अधिकरणैतावत्त्वस्य सामीप्येन परिच्छिन्नभावि समर्थः। अत्र विभाषा एव नियमस्य प्रतिषेधः नहि विभाषा समाहारद्वन्द्वः प्रतिषेध्यः।
अव्ययीभावो विहित इति। अव्ययं विभक्तीत्यादिना। यद्यप्यत्र संख्येति नाक्षिसंख्ययापि तु अव्ययेन बहुव्रीहिरिति। संख्ययाव्ययासन्नेत्यादिना। त
त्रैकवद्भावपक्षे अव्ययीभावो नुप्रयुज्यत इति। एकार्थस्यैकार्थ इति भावः। ऐकार्थ्यं च तस्य सामीप्यप्रधानत्वात्। यद्यप्यव्ययीभावो व्यपत्यान्वि: संख्येस्तथा

॥विभाषा समीपे॥ ॥अधिकरणैतावत्त्वस्य समीपे विभाषा द्वन्द्व एकवद्भवति। उपदशं दन्तोष्ठं। उपदशा दन्तोष्ठाः
॥उपदशं मार्दङ्गिकपाणविकं॥ उपदशा मार्दङ्गिकपाणविकाः। अव्ययस्य संख्यया अव्ययीभावोऽपि विहि
तो बहुव्रीहिरपि। तत्रैकवद्भावपक्षे अव्ययीभावो नुप्रयुज्यते। इतरत्र बहुव्रीहिः॥ ८ ॥ ॥

पि भेदाभावन्नपमेकार्थ्यमस्त्येव सामानाधिकरण्यं च सामीप्यन्तद्वतो रभेदाश्रयेण प्रतिपाद्यं। अधिकरणैतावत्त्वमपि समाहारसमाहा
रिणोर्भेदो विवक्षयैवोपपाद्यं। इतरत्र बहुव्रीहिरिति। बह्वर्थस्य बह्वर्थ इति भावः। बह्वर्थत्वं च तस्य समीपिप्रधानत्वात्। ननु द्वन्द्वार्थस्यैकव
द्भावादनुप्रयोगस्याप्येकवचनतासिद्धा किमेतया क्लिष्टकल्पनया। उच्यते अव्ययीभावस्यैवानुप्रयोगे तस्याव्ययत्वाद् द्वित्वाभावाद् द्विवा
भावाद्बहुवचनं न स्यात् सत्यपि वा तस्मिन्नभावे कृते उपदशा इति न स्यात्। बहुव्रीहेरेव वानुप्रयोगे उपदशस्य पाणिपादस्येति निषिद्धी
स्यात्। उपदशं पाणिपादस्येति चेष्यते। तो यथोक्तमेव साधीयः॥ ८ ॥

गसनपुंसं॥ ॥परवल्लिंगतायवादो योगः सग्रहणांअवहितस्यद्विगोरपियथास्यात् अन्यथा अवहितस्य द्वंद्वस्यैवस्यात् नैतदस्ति। एकवचनमपितेताव
मात्रमेवापेक्षिष्यामहे नेकवचनविशेषं द्वंद्वं। एवं तर्हि योत्रप्रकरणेः संकीर्त्तितः समाहारद्वंद्वस्तस्यापि यथास्यात्। अन्यथा प्रकृतस्यैव द्वंद्वस्य द्वि
गोश्चस्यात्. ननु प्रकरणमपि नापेक्षिष्यते यद्येवमेकसंरंभस्त्वा दाकेकार्थस्यस्यात्। अतो वरणयेस्य प्रकरणं तस्मिंश्चापेक्ष्यमाणे प्राणंगादि
संबंधादि त्रयेणद्वंद्वः प्रकृतइतितस्यैवस्यात्. सइस्मेतस्मिंस्तस्मतिअयेक्ष्यमाणेपि प्रकरणोप्राणयंगादिसंबंधपरित्यागेनयोत्रप्रकरणे संकी
र्त्तितो द्वंद्वो द्विगुश्च सनपुंसकमितिसर्वस्य समाहारद्वंद्वस्य नपुंसकत्वं लभ्यते एकादेवाति प्रसंगो नभवति. तथाचपुनोरत्नाकाविसारावुच्यते

॥सनपुंसकं। परस्यायमेकवद्भावो विहितः सनपुंसकलिंगो भवति। द्विगुर्द्वंद्वश्च। पंचगवं। दशगवं। द्वंद्वः खल्वपि।
पाणिपादं। शिरोग्रीवं। परलिंगतापवादो योगः। अकारांतोत्तरपदो द्विगुः स्त्रियांभाष्यते। पंचपूली। दशरथी। आव
तः स्त्रियामिष्टः। पंचखट्वं। पंचखट्वी। अनो नलोपश्च वा च द्विगुः स्त्रियां। पंचतक्षं। पंचतक्षी। पात्रादिभ्यः प्रतिषेधो व
क्तव्यः। पंचपात्रं। चतुर्युगं। त्रिभुवनं। ॥ अव्ययीभावश्च॥ ॥अव्ययीभावश्च समासो नपुंसकलिंगो भवति।
अधिस्त्रि। उपकुमारि। उन्मत्तगंगं। लोहितगंगं। पूर्वपदार्थप्रधानस्य लिंगं तेव प्राप्ताः। अन्यपदार्थप्रधानस्या
भिधेयवल्लिंगः मतइदमुच्यते। अनुक्तसमुच्चयार्थश्चकारः। पुण्यसुदिनाभ्यामह्नः क्लीवतेष्यते॥ ॥

पुवोरितिसमाहारद्वंद्वेसनपुंसकप्रसंगः अतोपवाचकश्च नसमाहारद्वंद्वः प्राणंगादिसंबंधी अमोवासर्वस्यासनपुंसकत्वं विधीयतइति
सिद्धं अकारांतोत्तरपदइति. अत्रातइत्यधिकारे द्विगोरितिङी विधानं लिंगं. पंचखट्वीति. स्त्रीत्वपक्षेउपसर्जनह्रस्वत्वे अनो नालोपश्चेति. उ
त्तरपदत्वेचायराद्विविधानेति प्रत्ययलक्षणप्रतिषेधात्परत्वाभावान्नलोपवचनं. पात्रादिभ्यइतितादर्थ्यएवाचतुर्थी। पात्राद्यंतानांहि
गतांसिद्ध्यर्थः। पात्रादिराकृतिगणः॥ ॥अव्ययी॥ पूर्वपदार्थप्रधानस्येति। अधिस्त्रीमालेपूर्वपदार्थस्य लिंगं तेव प्राप्तोति। अ

राम॰ ८२

पुण्याहमिति। कर्म्मधारयेराजाहः सखिभ्यष्टच्। एत्राह्नाहाः पुंसीत्यस्यापवादः। सुदिनमिति। सुदिनशब्दः प्रशस्तवचनः। सुदिना सुसमा सुका
र्य्यमेतदिनिपथा। त्रिपथमिति षष्ठीसमासः। द्विगोः पात्रादिलात्सिद्धं। ऋक्पूः पथ्यामिति पथ्यं। प्रादिसमासः। क्रियाविशेषणानां चेति। क्रियाह्वोरणा
स्त्रीलिंगत्वेप्राप्तेवचनं॥ ॥तत्पुरुषो। अप्रमंदेहार्थे नञ् कर्म्मधारयस्य तत्पुरुषस्य समासात् नञ् कर्मधारय इति पदच्छेदः। अत्र कर्मधारय शब्दो
भावप्रधानः। नञ्च कर्मधारयत्वं च नञ्कर्मधारयौ तौ न विद्येते यस्मिन्स्तत्पुरुषे सो नञ्कर्म्मधारयः इति बहुव्रीहिः। तत्पुरुषेत्वस्मिन्नञ्मात्रस्य
तत्पुरुषस्याभावात् लघुकृत तत्पुरुषो नञ्शब्देन लक्षणीयः स्यात्। लिंगवचनयोश्चामतरस्य असयोवाच्यः स्यात्। अतो बहुव्रीहिरेवन्याय्यः

पुण्याहं पथः संख्याव्ययादेः क्लीबतेष्यते। त्रिपथं चतुःपथं। विपथं सुपथं। द्विपथं सुपथं। क्रियाविशेष
णानां च क्लीबतेष्यते। मृदुपचति। शोभनं पचति॥ ॥तत्पुरुषो नञ्कर्मधारयः॥ ॥अधिकारोयमुजर
सूत्रेषूपतिष्ठते। नञ्समासं कर्मधारयं च वर्जयित्वा अन्यस्तत्पुरुषो नपुंसकलिंगो भवतीत्येतदधिकृतं वेदि
तव्यं। पदितऊर्द्ध्वमनुक्रमिष्यामः वक्ष्यति विभाषा सेना सुरेति। ब्राह्मणसेनं। ब्राह्मणसेना। तत्पुरुष इति किं
दृढसेनो राजा। अनञिति किं। असेना। अकर्म्मधारय इति किं। परमसेनाः ९
इत्तो वस्तुमात्रं दर्शितं नञ्समासं कर्म्मधारयं च वर्जयित्वेति। विभाषा सेनेति। अनंतरेषु सूत्रेष्वस्य नातीवोपयोगः। संज्ञायां कथेत्यत्रताव
दनादिः संज्ञागृह्यते न चात्तत्पुरुषो नञ्समासः कर्मधारयो वाऽशीनरेषु संज्ञास्ति। उपज्ञोपक्रममित्यत्रापि षष्ठीतत्पुरुषाद्धिनात्तदादित्वा
संप्रत्ययः। छायाबाहुल्य इत्यत्रापि पूर्वपदार्थधर्म्मो वाहुल्यं षष्ठीतत्पुरुषमंतरेणान्यासंभवात् सभाराजेत्यत्र तु राजामनुष्यपूर्वेति वचनेन नञ्
समासस्य कर्म्मधारयस्य च समातस्याप्रसंगः। द्वंद्वस्यतु प्राप्नोति ईश्वरस्य सभा वा ईश्वरसभा इति अभस्तत्रापि तत्पुरुषस्य प्रसंगोऽस्यो पयोगो
सेव अशालाचेत्यत्र समूहवचनः सभाशब्दः समूहस्य च समूहस्य च समूहस्य पक्षास्फुटतरे तिषष्ठीतत्पुरुषस्यैवभाविष्यति नान्यस्य ब्राह्मणाश्च
सभा च ब्राह्मणसभे असभा परमसभेति। अतो विभाषा सेनेत्यत्रैवास्य साक्षादुपयोग इतिभावः॥ ९ ॥ ॥

का·वृ९

८३

॥संज्ञायां कं॥ तत्पुरुषस्य कंथान्तस्य विशेषणान्नत्वं तत्र विधिशिलाहकंथां तत्पुरुषस्तु इति। सौशमिकंथसितिम्। सुशमस्यापत्यानि सौशमयः। उपज्ञो॥
उपज्ञायत इत्युपज्ञेति। कर्मणि णात शश्चो प्रसर्गाउपज्ञ प्रत्ययः। उपक्रम्यत इत्युपक्रम इति। कर्मण्येव घञ् नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः। उपज्ञा चो
पक्रमश्चेति समाहारद्वन्द्वः। तदन्त तत्पुरुष इति। सूत्रे तु उपज्ञोपक्रमं तत्पुरुषत्वं च विशेषणं सामानाधिकरण्येन विशेषणं तयोरुपज्ञोपक्रमयोरी आदि
करणं गृह्यते इति। आदिः प्राथम्यं पाणिनोपज्ञमिति कर्तरि षष्ठ्याः समासः। पूर्वाणि आकरणानि घृतनादिकालपरिभाषायुक्तानि तद्वर्जितं तु व्याक
रणं पाणिनिप्रभृतिप्रत्यक्षमित्याप्तितदादित्वस्याख्यानं। आयुपज्ञमिति। अर्जुनकृष्णिकलंगोलं। तेन वर्तते ज्ञानं लक्षणे विज्ञानात्पूर्वः। तस्यापत्यं माद्रि
॥संज्ञायां कंथोशीनरेषु॥ संज्ञायो विषये कंथा तत्पुरुषो नपुंसकलिङ्गो भवति सा चेत्कंथा उशीनरेषु भवति। सौशमिकंथं।
आह्वरकंथं। संज्ञायामिति किं। वीरणकंथा। उशीनरेष्विति किं। दाक्षिकंथा। परवल्लिङ्गतायवादप्रकरणं॥ ॥उपज्ञोपक्रमं तदा
द्याचिख्यासायां॥ ॥उपज्ञायत इत्युपज्ञा। उपक्रम्यत इत्युपक्रमः। उपज्ञा च उपक्रमश्च। उपज्ञोपक्रमं। तदन्तस्तत्पुरुषो नपुंसक
लिङ्गो भवति। तदाद्याचिख्यासायां। तयोरुपज्ञोपक्रमयोरादेराचिख्यासायां गम्यमानायां। आख्यातुमिच्छा आचिख्यासा यथा
पज्ञेयस्योपक्रमस्याचार्थस्यादित्वख्यातुमिष्यते तत एकवद्भवति। पाणिनोपज्ञमकालकं व्याकरणं। पाणिनिना प्रथमं ज्ञातेन प्रथम
तः प्रणीतमकालकं व्याकरणं। व्याड्युपज्ञं दुष्करणं। आढ्योपक्रमं प्रासादः। नंदोपक्रमाणि मानानि। दर्शनीयोपक्रमं सु
कुमारोपज्ञोपक्रममिति किं। वाल्मीकिश्लोकाः। तदाद्याचिख्यासायामिति किं। देवदत्तोपज्ञो रथः। यज्ञदत्तोपक्रमो रथः॥ ॥
छाया बाहुल्ये॥ ॥विभाषा सेनासुराच्छायेति विभाषां वक्ष्यति नित्यार्थमिदं वचनं। छायान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति बाहुल्ये
गम्यमानो यः पूर्वपदार्थधर्मो
राचार्यः स्वागतादिपाठात्पाप्यामि सेषविधिर्न भवति दुर्विनीत इति सिकेतश ह्रः। यथात्र ह्रत्करणं नंदराज्ञा मानानि प्रस्थादीनि वाल्मीकिश्लोका इ
ति षष्ठी समासः। अस्मत्रन दादित्वस्याचिख्यासा वाल्मीकिः प्रथमं श्लोकप्रबंधं दृष्टवानिति प्रसिद्धः। देवदत्तोपज्ञ इति। देवदत्तेनोपज्ञायते यज्ञदत्तेनोप
क्रम्यत इति क्रियासंबंधमात्रं विवक्षितं॥ ॥छाया॥ ॥पूर्वपदार्थधर्मो बाहुल्यमिति। कथं बाहुल्य इति निमित्तसप्तमी। बाहुल्ये सति या छाया
तद्वाचीयः छायाशब्दस्तदन्तस्तत्पुरुष इति सूत्रेऽस्यान्वयः। तत्र कस्य बाहुल्यमित्यपेक्षायामावारकद्रव्यनिमित्तत्वाच्छायायाः तद्बाहुल्य इति ग
म्यते। तेनयानिबद्ध निसेभ्ययोर्यलंभयोग्यमुपजीव्यं वा छायामारभंते ते घर्यविधिः॥

बाहुल्यं शलभादीनां हि वहुत्वं गम्यते। शलभच्छायं इ-
क्षुच्छायं बाहुल्य इति किं। कुड्यच्छायाः॥ ॥छ॥ मूल

राम० ८३

सभा। इह सभाशब्दः शालावचनः। इह कस्मान्न भवतीति। स्वं रूपमिति वचनादिहैव भवितुं युक्तमिति प्रश्नः। पर्यायवचनस्यैवेति। न स्वरूपस्य ना
पि विशेषाणां चन्द्रगुप्तादीनामित्यर्थः। एतदेवाशोकेन दृष्टापयति तदुक्तमिति। कथं पुनरेतल्लभ्यते। द्वावत्र नञौ अराजपूर्वा अमनुष्यपूर्वा चेति। त
त्र नञिव युक्तन्यायेन राजशब्दसदृशाः पर्यायाः एव गृह्यन्ते। अमनुष्यशब्दो रूढिरूपेणोति। कथं तर्हि मनुष्यकर्तृके चेत्यत्रापि त्रग्रहणमिति सुराही ए
ते। आत्मानात्मत्र मनुष्यादन्यमात्रस्य ग्रहणं न रूढिरित्यर्थः। अशाला च॥ सभाशब्दोऽयं शालावचनः संघवचनश्च तत्र शालाप्रतिषेधादितरस्य ग्रह

सभा राजामनुष्यपूर्वा॥ ॥सभान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति। सा चेत्सभा राजपूर्वा अमनुष्यपूर्वा च भवति। इनस
भम्। ईश्वरसभम्। इह कस्मान्न भवति। राजसभा। पर्यायवचनस्यैव राजाद्यर्थमिति। अमनुष्यपूर्वा। रक्षःसभम्। पिशाचसभम्। र
ह कस्मान्न भवति। काष्ठसभा। अमनुष्यशब्दो रूढिरूपेण रक्षःपिशाचादिष्वेव वर्तते। एजामनुष्यपूर्वेति किं। देवदत्त
सभा॥ ॥अशाला च॥ अशाला च या सभा तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति। संघातवचनो ऽत्र सभाशब्दो गृह्य
ते। स्त्रीसभम्। दासीसभम्। दासीसंघात इत्यर्थः। अशालेति किं। अनाथसभा। अनाथकुटीत्यर्थः॥ ॥विभाषा सेनासुरा
च्छायाशालानिशानाम्॥ ॥सेनासुराच्छायाशालानिशा इत्येवमन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति विभाषा। ब्राह्मणसेनम्। ब्रा
ह्मणसेना। यवसुरम्। यवसुरा। कुड्यच्छायम्। कुड्यच्छाया। गोशालम्। गोशाला। श्वनिशम्। श्वनिशा १०

णामित्याह संघातवचन इत्यादि। तत्र पूर्वसूत्रेण राजामनुष्यपूर्वत्वे शालावचनस्यापि भविष्यति अशालावचनस्य त्वनेन राजामनुष्यपूर्व
त्वाभावेऽपीति॥ ॥विभाषा से। तत्पुरुष इति प्रकृते षष्ठी बहुवचनान्तं विपरिणाम्यते नपुंसकमिति च भावप्रधानं संपद्यते। सेनाद्यन्तानां तत्पुरुषा
णां नपुंसकत्वमित्यर्थः। हिन्त्रो तु वक्ष्यमाणं दर्शितं। यद्वा प्रथमा स्थाने षष्ठी। कुड्यच्छायमिति। बाहुल्याभावेनेति कल्प्यः। बाहुल्ये नित्यार्थं
छाया बाहुल्ये इत्युक्तं। श्वनिशमिति। यस्यां निशायां श्वान उपचसन्ति सा श्वनिशमित्युच्यते। सा पुनः कृष्णचतुर्दशी तस्यां हि श्वान उपवसन्तीति प्रसि

= ८ ॐ

का॰प॰ ८५ ॥परवत॥ ॥किमर्थमिदं इह द्वन्द्वे त्रीणि दर्शनानि। अवयवार्था एवापेक्षितपरस्परा द्वन्द्वार्था न तु तद्व्यतिरिक्तः समुदायो नामैकः। अवयवार्थव्यतिरिक्त एव समुदायो द्वन्द्वार्थः सचावयववल्लिंगो न लिंगवानिति द्वितीयं। स एव स्वयं लिंगश्च स इति तृतीयं। तत्र पूर्वके दर्शनद्वये विभिन्नलिंगावयवद्वन्द्वे युगपदुभयलिंगतानुपपत्तेः पर्यायेण लिंगद्वयप्रसंगे परस्यैव लिंगं भवतीति नियमार्थं भवति। तृतीये तु समासार्थस्य लिंगस्य परवल्लिंगताभवतीति विध्यर्थो। तत्पुरुषोपि त्रिविधः पूर्वपदार्थप्रधानोर्धपिप्पल्यादिः उत्तरपदार्थप्रधानो राजकुमार्यादिः तत्रोत्तरपदार्थप्रधाने प्राधान्यादेव परवल्लिंगस्य सिद्धत्वात् पूर्वपदार्थप्रधाने विध्यर्थं भवति तत्र वृत्तिकारेण विधियक्ष आश्रितः तदाह परस्य यल्लिंगं तद्भवतीति। एवं हि सूत्र

॥परवल्लिंगं द्वन्द्वतत्पुरुषयोः॥ ॥समाहारद्वन्द्वे नपुंसकलिंगस्य विहितत्वात् इतरेतरयोगद्वन्द्वस्येदमु

दाहरणं। परस्य पदस्य यल्लिंगं तद्भवति द्वन्द्वस्य तत्पुरुषस्य च। उत्तरपदलिंगं द्वन्द्वतत्पुरुषयोर्विधीयते। कुक्कुटमयूर्यावि

मे। मयूरीकुक्कुटाविमौ। तत्पुरुषस्य। अर्द्धं पिप्पल्याः अर्द्धपिप्पली। अर्द्धकोशातकी। अर्द्धनखरंजनी

॥ ॥११॥ ॥

स्येकत्वाद्वचनव्यक्तिर्भवति। तद्यथा तत्पुरुषे विधिरूपाद्द्वन्द्वे नियमरूपेति वचनव्यक्तिभेदः स्यादिति भावः। द्वन्द्वस्य तत्पुरुषस्य चेति। एतेन द्वन्द्वतत्पुरुषयोरिति षष्ठीयमिति दर्शयति। सप्तम्यां त्वयमर्थो भवति द्वन्द्वे तत्पुरुषे च यत्परं तद्वल्लिंगं भवतीति। तत्र कार्पिणो नुपपादानान्तरशब्दस्य वसंबंधि शब्दत्वात् तदात्मप्रसंगस्य पूर्वपदस्य लिंगविधिर्भवति यद्वा द्वन्द्वे तत्पुरुषे च विषये परस्येव लिंगं भवतीत्यक्षरार्थः। तत्रापि पूर्वपदस्यैव लिंगविधिः। अत्र पक्षे मयूरीकुक्कुटाविति त्रौत्तरपदार्थलिंगे पूर्वपदार्थस्यादिति द्वे स्त्रीप्रत्ययस्य निवृत्तिः प्राप्नोति। कुक्कुटमयूर्यौ राजकुमारी अर्द्धपिप्पलीत्यादेः पूर्वपदे स्त्रीप्रत्ययप्रसंगः। किं पुनरस्मिन्पक्षे किंचिदिष्टं सिध्यति। आहो स्विद्दोषान्तरमेव। सिध्यतीत्याह। रहस्यं कार्य अर्धं द्रोण इति यत्र पूर्वपदं नपुंसकं उत्तरपदं च पुल्लिंगं तत्र परस्य लिंगे पूर्वस्यातिदिष्टे समासस्यापि तदेव भवति न च पूर्ववदिह किंचिदनिष्टमापद्यत॥ ॥ ॥ राम॰ ८५

द्वंद्वेपि पूर्ववत्केदृशे न द्वयेगुणकर्मणी द्रव्यगुणाविषयादौ पत्रपुंनपुंसकाभ्यांमिन्नलिंगे पूर्वोत्तरपदेयत्र वा ः वसंतिस्त्रीप्रत्ययांतं गपूर्वपदंन
भवतिगतिस्यानेयोषितु तुषोतिनिखिलाकेइतितत्रोत्तरपदार्थलिंगेपूर्वपदार्थस्यातिदिष्टे द्वंद्वस्यपूर्णपदेनद्वयोरपिलिंगोपप्रवृत्तेरपिसर्वमिष्टंसि
ध्यति। पूर्वपदेवनकिंचिदनिष्टमापद्यते। व्यतिरिक्तो द्वंद्वार्थः स्वयं लिंगशून्यत्वात्तत्रतुपक्षेद्वंद्वार्थस्यालिंगवंतद्रव्यस्यैवेतिदोषातमेव।। द्वंद्वस्य
नतुमुषस्यचेति। द्वंद्वार्थस्यतत्पुरुषार्थस्यचेत्यर्थः।तेनानुप्रयोगेपितदेव लिंगं भवति। यदितर्हिषष्ठ्याश्रयणेनसमासार्थस्य परवल्लिंगमति
दिश्यतेपूर्ववदश्ववडवावितित्रापिपूर्वपदार्थलिंगंसमासार्थेतिदिश्येततत्श्चोत्तरपदार्थस्यस्त्रीत्वेऽहितमेवेतिरायः श्रवणप्रसंगः। समसमीपस्थे
तुपूर्ववदश्ववडवावितित्रापिपूर्वपदार्थलिंगमुत्तरपदार्थस्यातिदिश्यतइतिवडवाशब्दस्यपुंस्त्वातिदेशात्स्त्रीत्वाभावेटापोनिवृत्तिः सिध्यंति।
निपातनात्सिद्धं। किं निपातनेनतावत्पूर्ववदश्ववडवाविति निपातनमाश्रपितुमुचितं। वच नोतरे नातिदेशप्रसंगात् अश्ववडवान् अश्ववड
वेरिति। एवंतर्हिश्ववडवपूर्वापराधरोत्तराणामिसत्रटापोनुश्वारणात्रिपातनात्स्ववडवयो द्वंद्वेटाम्निवर्तिष्यते। अपरआहचार्थेद्वंद्वइत्यत्रा
नेकमित्यधिकारात्तेषामेवत्रिपदार्थानांप्रथमादिभिःस्तेनोपसर्जनत्वात्स्त्रियोरुपसर्जनस्येतिह्रस्वत्वंभविष्यति। इहापितर्हिप्राप्नो
तिकुक्कुटमयूर्याविति अत्रलकात्यसिद्धिः परवल्लिंगमितिशब्दशब्दार्थो कोर्थः लिंगशब्देनलिंगाभिधायीप्रत्ययोर्थश्चतंत्रेणोक्तउभयेणगो
व्यतेतदपमर्थोपवतिद्वंद्वार्थस्यतत्पुरुषार्थस्यपरस्येवलिंगेभवतितदभिधायीप्रत्ययश्चपरस्येभवतितावन्मितिः। तत्रचयत्रद्रव्यगुणेगुणक
र्मणी अर्द्धेद्वारणइत्यादौलिंगाभिधायीप्रत्ययोनसंभवतितत्रार्थएवातिदिश्यते उभयसंभवेतूभयंयथाकुक्कुटमयूर्याविति। ततश्चोपदेशि
कस्यद्वस्वत्वेप्यातिदेशिकस्यश्रवणंभविष्यति। नस्यवानुपसर्जनत्वात्रदंतस्यचाप्राप्नोतिपदिकत्वात्सुनर्ह्रस्वत्वाभावः। इहतर्हिटत्रागा
र्ग्यायणौ। वंताकारीषगंध्येइतिह्रस्वत्वेकृतेसमासात्पुनः ष्फष्यङोप्राप्नुतः। स्तोमस्यादेनद्धितइतिपूर्वोत्पन्नयोर्निहितिर्भविष्यति। यत्रतु
र्हिपुंवद्भावोनास्तिश्रमहान्तयथादत्ताचयुवतिश्च दत्तायुवतीइतितत्रद्वयोः स्त्रीप्रत्यययोः श्रवणप्रसंगः तस्माद्रुपसर्जनह्रस्वत्वंद्वंद्वे
नभवति। अन्वर्थात्सुपसर्जनसंज्ञा। प्रधानस्यविधीयते। द्वंद्वेचावयवार्थानामेवकार्यान्वयपारप्राधान्याभावः। परवल्लिंगमितिवार्थएवाति

दिश्यते ऽश्ववडवाविति च निपातनादिष्यते तदेव संप्रति

का॰ प॰ ८०
८५

द्विगुप्राप्तापन्नेत्यादि। सततं हि प्रतिषेधो वक्तव्यः नवक्तव्यः तद्गुणसंग्रहणं न करिष्यते परवल्लिंगं द्वन्द्वतत्पुरुषयोरिति कथं पूर्वकायः अर्धपिप्पलीति एकदे
शिसमासो नारप्स्यते कर्मधारय एवात्र भविष्यति। पूर्वश्चासौ कायश्च अर्धं चासौ पिप्पली चेति। पूर्वादयः शब्दा एकदेशे वर्तन्ते कायादयस्तु स
मुदाये कथमेषां सामानाधिकरण्यं। अवयवेन समुदायोपचारात्। तदेवं कर्मधारये कृते प्राधान्यादेवोत्तरपदार्थस्य लिंगं भविष्यतीनार्थस्तत्पु
रुषग्रहणेन नाप्येकदेशिसमासेन षष्ठीसमासप्रसंग इति चेन्नेष्टत्वादनभिधानाच्च। तत्रैतत्स्यात्। यद्यपि पूर्वकायरसादीनि रूपाणि कर्मधार
येणापि सिध्यन्ति तथापि मुख्यार्थवृत्तिषु कायादिशब्देषु यथा पूर्वकाये स्येत्येवमादिवाक्यं भवति तथा कायपूर्वमित्यादिषष्ठीसमासोपि स्यात् अतस्त
न्निवृत्त्यर्थमेकदेशिसमास आरब्ध इति तच्च नैवं इष्टत्वादनभिधानाच्च। तत्र तावत् द्वितीयतृतीयेत्यत्रान्यतरस्यांग्रहणात् तत्र करणस्य षष्ठीसमास इ

द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः। द्विगुः पंचसु कपालेषु संस्कृतः पंचकपालः। प्राप्तो जीविकां प्राप्त
जीविकः। आपन्नो जीविकां आपन्नजीविकः। अलंपूर्वः। अलं जीविकायै अलंजीविकः। गतिसमासः। निःक्रान्तः कौशा
म्ब्याः निष्कौशाम्बिः॥ ॥पूर्ववदश्ववडवौ॥ ॥अश्ववडवयोर्विभाषयैकवद्भाव उक्तः तत्रैकवद्भावादन्यत्र परवल्लिंगतायां
प्राप्तायामिदमारभ्यते। अश्ववडवयोः पूर्ववल्लिंगं भवति। अश्वश्च वडवा चाश्ववडवौ। अर्थातिदेशश्चायं न निपातनं तत्र द्वि
वचनमतंत्रं वचनान्तरेपि पूर्ववल्लिंगता भवति। अश्ववडवान् अश्ववडवैरिति॥ ॥

ः मिश्रा द्वितीयमिति। अर्धं नपुंसकमित्यत्रापि भाष्यकार आह इष्यते त्र षष्ठीसमासोपि तद्यथा॰ ऋषार्धं मया भक्षितमिति। अस्ति च पैंगलेसूत्रे प्रयोगः स रा॰म॰४
रात्रं दूवार्यार्धमिति पूर्वापरेत्यत्र त्वनभिधानात् षष्ठीसमासो न भविष्यति॥ ॥पूर्ववद्॥ ॥अश्ववडवयोरिति। विभाषावृक्षेत्यत्र पशुद्वन्द्वस्यैव ८५
सिद्धेश्ववडवग्रहणं प्रतिपदविध्यर्थं तत्र प्रतिपदविधानादश्ववडवमित्येकवद्भावपक्षे इमं विधिं बाधित्वा सनपुंसकमित्येतदेव भवति तद्धि द्वन्द्वे
कवद्भावं पदान्तरूपं विधीयमानेन नपुंसकत्वमप्येकवद्भाववदेव प्रतिपदविहितं भवति यस्तु पूर्ववदित्यतिदेशः स एकवद्भावाभावपक्षे चरितार्थः तदा
हृत तत्रैकवद्भावादन्यत्रेति। न निपातनमिति। निपातने हि पूर्ववदिति॰ वचनमनर्थकं अश्ववडवावित्येव ब्रूयात्। तेन किं सिद्धं भवति साहृत तत्रेति। अ॰

॥हेमंतशि॥ ॥हेमंतशिशिराविति। अत्र नपुंसकत्वं प्राप्तं शिशिरशब्दस्य नपुंसकत्वात्। केचित्तु हेमंतः शिशिरो स्त्रियामित्युभयलिंगाम
न्यंते तेषामत्र हेमंतशिशिरावित्यनर्थकं। अहोरात्रे इति। अत्र रात्राह्नाहाः पुंसीति पुंस्त्वं प्राप्तं। लिंगमन्यवदुक्तं इति। अस्यायं बहुलमिति सनेन॥ ॥
रात्राह्न॥ ॥इत्येते पुंसि भाष्यंत इति। केचिदाहुः रात्राहीनामेवानेन पुंस्त्वं विधीयते न तदंतस्य तु परवल्लिंगमित्येव सिद्धमिति। एवं तु समाहारे सनपुं

॥हेमंतशिशिरावहोरात्रे च छंदसि॥ ॥पूर्ववदिति वर्त्तते। हेमंतशिशिरौ अहोरात्रे इत्येतयोः छंदसि विषये पूर्ववल्लिं
गं भवति। हेमंतशिशिराहर्नं प्रीणामि अहोरात्रे इदं भूमः। परवल्लिंगतापवादो योगः। अर्थातिदेशश्चायं न निपात
नं तेन द्विवचनमतंत्रं। बहुवचनांतरेपि पूर्ववल्लिंगता भवति। पूर्वपक्षाश्चितयः अपरपक्षापुरीषं अहोरात्रीणीष्टकाः।
छंदसीति किं। दुःखे हेमंतशिशिरे। अहोरात्राविमौ पुण्यौ छंदसि लिंगमन्यवदुक्तं: तस्यैवायं प्रपंचः॥ ॥रात्रा
ह्नाहाः पुंसि॥ ॥कृतसमासानां निर्देशः रात्रः अह्नः अह इत्येते पुंसि भाष्यंते। परवल्लिंगतायः स्त्रीनपुंसकयोः
प्राप्तयोरिदं वचनं। द्विरात्रः। त्रिरात्रः चतूरात्रः। पूर्वाह्णः। अपराह्णः। मध्याह्नः। द्व्यहः। त्र्यहः। अनुवाकादयः
पुंसीति वक्तव्यं। अनुवाकः। शंयुवाकः। सूक्तवाकः॥१२॥

सूक्तमित्येतदेव स्यात्। परवल्लिंगापवादत्वात्तस्य। तस्माद्रात्राद्यंतस्य समासस्यैवेदं लिंगविधानं युक्तं। एवं हि समाहारेपि परत्वादिदमेदि
दमेव प्रवर्त्तते पुंसि भाष्यंत इत्यत्र चैतदंतानामर्थो द्रष्टव्यः। त्रिरात्र इति समाहारे द्विगुः अहः सर्वैकदेशेत्यच् समासांतः। पूर्वाह्ण इति अह्नः पू
र्वो भागः एकदेशिसमासः। राजाहःसखिभ्यष्टच्। अह्नोह्न एतेभ्य इत्यह्नादेशः। अह्नोऽदंतादिति णत्वं। अह इति नसंख्यादेः समाहार इत्य
ह्नादेशाभावः अहृष्टखोरेवेति टिलोपः। अनुवाकादयः पुंसीति। वाकविशेषस्यैताः संज्ञाः कर्मणि घञंता इति नपुंसकत्वे प्राप्ते वचनं १२

का.१८०
८६

॥अपथं॥ पथ्यः संमासमयादेरीत्सत्र्याप्रसक्तावलम्भावितादयमारंभः॥ अपथमिति॥ पथो भावविषेति यदा समासांतप्रतिषेधो न भवति तदर्वस्यैव ह्रूरि
त्यकारः समासांतनिर्देशात्तदभावपक्षे पुंस्त्वमेवमभवत्ययं यथा श्रुतिः॥ तत्पुरुष इति वर्त्तत इति॥ एतदर्थमेवमन नपुंसकमित्यस्यानंतरं न कृतं॥ ॥
अर्धर्चाः॥ ॥साहचार्याच्छत्रिमायेन कार्षापणादीनामप्यर्धर्चशब्देन ग्रहणमित्याह अर्धर्चादय इति॥ बहुवचनमत्र प्रमाणं॥ शब्दरूपाश्रयाचे
यं द्विलिंगतेति॥ अस्मिन्छब्दरूपो लिंगद्वयं भवति सेतावदत्र विवक्षितं न पुनासम शब्दस्य यावानर्थस्तत्र सर्वत्र लिंगद्वयं भवतीत्येवमयीत्यर्थः॥ किमेवं

॥अपथं नपुंसकं॥ ॥अपथशब्दो नपुंसकलिंगो भवति॥ अपथमिदं॥ अपथानि गाहते मूढः॥ इह कस्मान्न भवति॥
अपथो हरदेशो ऽपथा नगरी॥ तत्पुरुष इति वर्त्तते॥ ॥अर्धर्चाः पुंसि च॥ अर्धर्चादयः शब्दाः पुंसके च भाष्यंते श
ब्दरूपाश्रया चेयं द्विलिंगता॥ क्वचिदर्थभेदेनापि भवति इष्टतो यथा पद्मशंखशब्दौ निधिवचनौ पुल्लिंगौ॥ जलजे उभ
यलिंगौ॥ भूतादिशब्दाः पिशाचे उभयलिंगाः॥ क्रियाशब्दस्याभिधेयवल्लिंगं॥ सैंधवशब्दो लवणे उभयलिंगः॥ योगिकस्या
भिधेयवल्लिंगं॥ सारशब्द उत्कर्षे पुल्लिंगो न्यायादनपेते नपुंसकं नैतत्सारमिति॥ ॥श्रीः॥ ॥श्रीः॥ ॥

राम०
८६

सतीति भिद्यं भवतीत्याह क्वचिदिति॥ अर्थभेदेन भवत्यपि भवल्लिंगद्वयं तत्रैव शब्दे संग्रहतव्यमिति भावः॥ अत्रोदाहरणमाह यथेति॥ शंखः पद्म
श्च विज्ञेयौ धनदस्य महानिधी॥ क्रियाशब्दस्येति॥ तद्यथा॥ मृतंको उभ्रमा शालाभूतो घट इति॥ योगिकस्याभिधेयवल्लिंगमिति॥ यद्यपि लवणादन्ते
रपि सैंधवशब्दस्य योगोपि निमित्तं तथापि रूढिशक्तिरपि तत्र निमित्तं अतो योगिकस्येति केवलयोगनिमित्तस्येत्यर्थः॥ अभिधेयवल्लिंगमित्त
स्यार्थः॥ अभिधेयवल्लिंगमिति॥ यथा॥ सिंधो भवं सैंधवं जलं सैंधवी शफरीरिति॥ उत्कर्षे पुल्लिंग इति॥ चंदनसारः खदिरसार इति॥ ॥ ॥

धर्म्मइत्यपूर्वेपुंलिंगइति।यागादिक्रियाजन्यः स्वर्गादिफलानुगुणः कर्तृपुत्पन्नः संस्कारविशेषोऽपूर्वे।भाद्दात्त्वपूर्वसाधनेयागादावेवधर्म्म
धर्म्मइत्यपूर्वेपुंलिंगः तत्साधनेनपुंसकंतानिधर्म्माणिप्रथमान्यासन।अर्द्धर्च।गोमय।कषाय।कार्षापण।कुतप।कपा
ट।शंख।गूथ।यूथ।ध्वजकबंध।पद्म।गृह।सक्तु।कंसादिवसांयूषअंधकार।दंड।कमंडलु।मंड।भूत।द्वीप।यूत।चक्र।ध
र्म।कर्म।कर्मन्त।मोदक।शतमान।यान।नख।चरण।पुच्छ।दाडिम।हिम।रजत।सक्तु।पिधान।सार।पात्र।घृत।सैंधव।औ
षध।आढक।चषक।द्रोण।खलीन।पात्रीव।षष्टिक।वारबाण।प्रोथ।कपित्थ।शुष्क।शील।शुल्व।सीधु।कवच।रेणु।
कपाट।सीकर।मुसल।सुवर्ण।यूपचमस।वर्ण।क्षीर।कर्ष।आकाश।अष्टापद।मंगल।निधन।निर्यास।जंभ।वृत्त।पु
स्त।क्ष्वेडित।शृंग।शृंखल।मधु।मूल।मूलक।शराव।शाल।वप्र।विमान।मुख।प्रग्रीव।शूल।वज्र।कर्पट।शिखर।क
ल्क।नाट।मस्तक।वलय।कुसुम।तृण।पंक।कुंडल।किरीट।अर्बुद।अंकुश।तिमिर।आश्रम।भूषण।इष्वास।मुकुल।वसं
त।तडाग।पिटक।विटंक।माष।कोश।फलक।दिन।दैवत।पिनाक।समर।स्थाणु।अनीक।उपवास।शाक।कर्पास।चषाल।
खंड।दर।वल।मल।मृणाल।हस्त।सूत्र।ताण्डव।गांडीव।मंडप।पटह।सौध।पार्श्व।शरीर।फल।छल।पुर।राष्ट्र।विम्ब।अं
बर।कुट्टिम।कुंडल।ककुद।तोमर।तोरण।मंचक।पुंख।मध्य।वाल।वल्मीक।वर्ष।वस्त्र।देह।उद्यान।उद्योग।स्नेह।स्व
र।संगम।निष्क।क्षेम।शूक।छत्र।पवित्र।यौवन।पालक।मूषिक।मंडल।वल्कल।कुंज।विहार।लोहित।विषाण।भवन।
अरण्य।पुलिन।दृढ।आसन।ऐरावत।सूर्य।तीर्थ।लोमश।तमाल।लोह।दंडक।शपथ।प्रतिसर।दारु।धनुस्।मान।आतंक।वि
शङ्कं पुंलिंगमन्यते।चोदनालक्षणोऽर्थोधर्म्मः द्रव्यक्रियागुणादीनांधर्म्मत्वंस्थापयिष्यतेइति।शावरेप्युक्तंयोयागमनुतिष्ठतितंधार्म्मिकइत्सा
चक्षतइति॥ १३ ॥ ॥

तंक।मव।महस्र।उदित।प्रवाल।इक्कर।अपराह्ण।नी
ड।शकल।अर्द्धर्चादिः॥ १३॥ ॥ ॥

का·प·द·
८७

॥इदमोन्वा॥ ॥अन्वादेशोऽनुकथनमिति। शब्दार्थकथनमेतत्। तथाह्यादेशस्तत्राभिप्रेतस्तादृशं पश्चाद्दृश्यते। आभ्यां छात्राभ्यामिति। आदेशप्
षः। अथो आभ्यामिति। एषोन्वादेशः। अथोशब्देन चात्रान्वादेशोऽभिव्यज्यते। ननु तृतीयादावयमादेशस्तत्र च राणामोभिरैनादेशो वक्ष्यते।
अन्याः सर्वा हलादयस्तत्र हलि लोपेनैवाभ्यामित्यादि रूपं सिद्धं नार्थ आदेशवचनेनेत्यत्राह आदेशवचनमिति। अन्वादेशार्थविवक्षायाम
कचि कृते हलि लोप इत्यत्रानाकि इति ककारस्याधिकाराद्धलि लोपो न स्यात् तस्य विधानेऽस्मिन्नाभ्यामित्यादि रूपं न सिद्ध्यतीति तस्मात्साकक
र्थमादेशवचनं साककार्थं चास्मिन् शित्करणं सर्वादेशार्थं। नवान्त्यस्य विकारस्य च नानर्थक्यान्नायदित्ययमन्त्यस्य विकारः स्यात्तद्वचनमिदम
नर्थकं स्यात्तत्र त्यदाद्यत्वेनैव सिद्धेः। अर्थवद्वादेशप्रतिषेधार्थो। अन्त्यस्य पित्विकारस्य च नमर्थवद्देव। येन आदेशः आभ्यामित्यादौ दीर्घादयस्ते

॥इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। आदेशः कथनं। अन्वादेशोऽनुकथनं। इदमोऽन्वादेशविषयस्य अशादेशो
भवत्यनुदात्तस्तृतीयादौ विभक्तौ परतः। आभ्यां छात्राभ्यां रात्रिरधीता। अथो आभ्यामहरप्यधीतं। अस्मै छात्राय कं
बलं देहि अथो अस्मै शाटकमपि देहि। अस्य छात्रस्य शोभनं शीलं। अथो अस्य प्रभूतं स्वं। अशादेशवचनं साककार्थं
इमकाभ्यां छात्राभ्यां रात्रिरधीता। अथो आभ्यामहरप्यधीतं। नेह यस्यादुच्चारणमात्रमन्वादेशः। किं तर्हि एकस्यैवाभि
धेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः। तेनेह न भवति। देवदत्तं भोजय इमं च यज्ञदत्तमिति॥

माभूदन्त्यस्य कारस्यान्यकारवचनं स्यात् यथा मोराजिसमः क्वाविति मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं। ननु च कृतेऽप्यककि चित्रनेनादेशो सत्यामि
त्यादिरूपस्य साधारणत्वादनान्वादेशार्थतातिः प्रकरणादिना यथैवमनुसन्निरेवाक्रवोक्तं। प्रकरणादिनैवान्वादेशार्थः प्रतिपत्स्यते अतोऽनुदात्तत्वमे
व विधेयं नादेशः। उच्यते असत्यादेशे प्रकरणादिकमन्तरेण अकचैव कश्चिद् ज्ञातारं किं प्रतिपादयेत् मैवं प्रति पीपरदित्यादेशवचनं। उत्तरार्थं च।
अनुदात्तवचनं किमर्थं। यावता इदंपदादिति विभक्तेरुदात्तत्वे शेषनिघातेनैव सिद्धं। अनुदात्तवचनं विभक्तौ तस्यानुदात्तार्थं। एकशेषनिघातेन हि प्र
कृतेरेवानुदात्तत्वं सिध्यति। कथं पुनरिदमस्तृतीयादावशादेशो भवति स चानुदात्त इत्यनेन विभक्तौ तस्यानुदात्तत्वं विधातुं शक्यं। नानेन विभक्तेस्त
नुदात्तत्वं विधीयते किं तर्हि अनेन प्रकृतेरनुदात्तत्वे कृते अनुदात्तत्वे कृते ऊडिदं पदाद्यप्पुम्रैद्युभ्य इति विभक्तेरसत्यामिति विभक्तेरुदात्तत्वे अनुदात्तौ सुप्पितौ इति
अनुदात्तत्वात् आभ्यामित्यादिपदं कृत्स्नमेवानुदात्तं भवति। यद्यन्वादेशोऽनुकथनं कथं इहापि प्रासीनिदेवदत्तं भोजय इमं च यज्ञदत्तमिति अस्तीत्यत्रान्वादेशः

ग·म·
८७

॥ ॥ तदः॥ ॥ पुनर्वचनमनुदात्तार्थमिति। पांचमिको ऽशादेश उदात्तः स्यात् अनुदात्तश्चेष्यते इत्यनुदात्तार्थं पुनर्वचनं त्रतसोरिति वचनं निमित्तभावा
र्थं। अन्यथा त्रतसौ चानुदात्तावित्यन्वाचयो विज्ञायेत। यत्र त्रतसोः पश्चात्स्थितत्वं तत्र तावनुदात्ताविति। किमर्थं पुनस्त्रतसोरनुदात्तत्वमिष्यते यावता अत्र अतद्‌स्यादौ
त्रतसोः कृतयोः प्रकृतेर्लित्स्वरे कृते शेषनिघातेन प्रत्ययानुदात्तत्वे सत्यनुदात्तः कश्चिन्नायं येषं लभ्येत कृतं स्यात् तत्तु न लभ्यं इह हि त्रतसोः कृतयोर्लि

एतदस्त्रतसोश्च त्रतसौ चानुदात्तौ। अन्वादेशे अनुदात्त इति वर्त्तते एतदः अन्वादेशविषयस्य अश् आदेशो भवति अ-
नुदात्तस्त्रतसोः परतः तौ चापि त्रतसावनुदात्तौ भवतः। एतस्मिन् ग्रामे सुखं वसामः अथो अत्र युक्ता अधीम
हे। एतस्माच्छात्राच्छन्दोऽधीष्व अथो अतो व्याकरणमप्यधीष्व। सर्वानुदात्तं पदं भवति। एतदोऽशित्य
शादेशो लक्ष्ये पुनर्वचनमनुदात्तार्थं॥ १५ ॥

त्स्वरः प्राप्नोति अनेन चानुदात्तोऽशादेशः तत्र येन नाप्राप्तिन्यायेनापवादत्वाल्लित्स्वरत्वाच्चानुदात्तेऽशादेशे कृते तद्विधानसामर्थ्यादपवाद
स्य लित्स्वरस्याप्रवृत्तावुत्सर्गः प्रत्ययस्वर एव त्रतसोः स्यात् एथामोः स्यात् यथा गोः पदमिति अत्र यासुलडलोपेन सह विधानाल्लित्स्वरे प्रवृत्तो
प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदं भवति। तस्मात्त्रतसौ चानुदात्तावितिवक्तव्यं॥ ॥१५॥ ॥छ॥

॥द्वितीयाटौ॥ ॥अनंतरत्वादेतद एवैनादेशः प्राप्नोति इदमोपीष्यते तत् इदमो ग्रहणं कर्त्तव्यं न कर्त्तव्यम् इदमोन्वादेश इत्यत इदम इत्यनुवर्तिष्य
ते एतदस्त्रतसोरित्यत्रापि संबंधात्तस्यापि त्रतसोरादेशप्रसंगात्तत्राह इदमो मंद्कस्मुतिमायेनानुवृत्तिरिति। इदम एव त्र वक्तव्ये इदमो हप्रसंगेन बा
धितत्वात्त्रलोः संभवात्त्रतसोरित्यत्रासंबंध इति। यद्यपि परमनुवृत्तिसामर्थ्यात्तस्याप्यागे शेनभाव्यं न चासत्तित्रलिनद्वयानमुपपद्यत इति त्रलः सत्ता
परिकल्प्यते तदपि न उत्तरार्थमप्यनुवृत्तिसंभवादिति। एनदिति नपुंसकैकवचने कार्यमिति। एतादेशे कृते ः टोमित्यं भावे सत्येनमिति प्राप्ते

॥द्वितीयाटौस्स्वेनः॥ ॥अन्वादेशेऽनुदात्त इति वर्त्तते। द्वितीयायां टायामोसि इत्येतेषु परत इदमेतदोरन्वादेशविष
ययोरेनशब्द आदेशो भवति अनुदात्तः। इदमो मंद्कस्मुतम्मायेनानुवृत्तिः। इमं छात्रं छंदोऽध्यापय। अथो एनं व्या
करणमध्यापय। अनेन छात्रेण रात्रिरधीता। अथो एनेनाहरप्यधीतं। अनयोः छात्रयोः शोभनं शीलं। अथो
एनयोः प्रभूतं स्वं। एतदः खल्वपि। एतं छात्रं छंदोऽध्यापय। अथो एनं व्याकरणमध्यापय। एतेन छात्रेण
रात्रिरधीता। अथो एनेनाहरप्यधीतं। एतयोः छात्रयोः शोभनं शीलं। अथो एनयोः प्रभूतं स्वं। एनदिति नपुंस
कैकवचने वक्तव्यं। प्रक्षालयैनत्। परिवर्त्तयैनत्। इह कस्मान्न भवति अयं दंडो हरानेन। एतमातं ङितं विद्यादिति।
यत्र किंचित् विधाय वाक्यांतरेण पुनरन्यदुपदिश्यते सोऽन्वादेशः। इह तु तत्कालनिर्देशमात्रं कृतं॥ ॥

त्यत एनदादेशो वक्तव्यः। यद्येवं अयमेव सर्वत्रास्तु किमर्थमेनादेशेन। कथं एनं एनौ एनान् एनेन एनयोरिति त्यदाद्यत्वे कृते भविष्यति। नपुं
सकैकवचने तु नित्यत्वात्स्वमोर्नपुंसकादिति लुकि कृते एनदिति स्यादिति सिद्धं। इहापि तर्ह्याश्रित इति द्वितीयासमासे प्रत्ययस्यैनादेशोऽस्त्यानेनादे
श उभाभ्यामपि न भाव्यं कथं अंतरंगानपि विधीन् बहिरंगो लुग्बाधते तस्मादेतद् श्रित इति भवति॥ ॥७ ७॥ ॥ ॥

।एकमेव विधानमिति। अपंदं इत्यनेन दं स्य समस्तस्यामात्रमुपलक्ष्यते न तु किंचिद्विधीयते। एवमीषदर्थ इत्यादिना आकारस्य स्वरूपमात्रं नि
र्दिश्यते न तु किंचिद्विधीयते॥ ॥आर्द्धधा॥ ॥वध्यादित्याशिषि लिङ्‌ लिङाशिषीत्यार्धधातुकसंज्ञा। हन्यादिति विध्यादिलिङ्‌। विषयस
प्तमी चेयमिति। सामान्यनिर्देशोयं तत्र आपित्वा त्रिसलाद्यनन्तेन सह देशकालकृते योग्यपर्यंसं भवति तस्माद्विषयसप्तमी। परे तु बोधि
निर्दिष्टे न परसप्तमी एवाङ्गमित्यादिना स्यात्तत्तथा हि हलन्तलादस्यादीनाम् हलो यदिति परित्यक्ते तत्र परत आदेशौ भविष्यतः तत्र द्वयोर्हि

॥एकमेव विधानं॥ ॥आर्द्धधातुके॥ आर्द्धधातुके इत्यधिकारोयं आ अध्याय स्त्रियार्थं त्रितशतिया
वत्। यदित ऊर्द्ध्वमनुक्रमिष्याम आर्द्धधातुके वेदितव्यं। वक्ष्यति हनो वध लिङि। वध्यात्। आर्द्धधातुक
इति किं। हन्यात्। विषयसप्तमी चेयं। न परसप्तमी। तेनार्द्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद्य
थाप्राप्तं प्रत्यया भवन्ति। भव्यं। प्रवेयं। आख्येयं॥ ॥ १५ ॥ ॥छ॥ ॥

द्वोक्तायां तृतीयस्य च युक्ति भाव्यं प्रवेयं आख्येयमिति प्रसज्येत। इह च तुवो वद्धिः वुबो ऽजंतत्वाघ्यत्तिकृते बध्यादेशोऽचवत्त्वमिति प्रा
प्नोति विषयसप्तम्यां तु नैष दोष इत्याह तेनेति। यथाप्राप्तमिति। यो यतः प्राप्नोति स ततो भवतीत्यर्थः। असिद्धवदत्राभादित्यस्याभावप्रभा
वस्यार्थमत्र चांगाधिकारेव द्विरार्धधातुकाधिकारः क्रियते। परे त्वेतत्स्यादेशास्तत्रैव विधीयेरन् न जहातु धितो ऽ स्थागीष्वभूवविमतुरिति
घस्माघदेशानामसिद्धत्वादुपधालोपाल्लोपे तवुपपणान स्युर्यदि त्ववेल्लोपादयोप्यत्रैव विधीयेरन् गतोगतवानित्यनुनासिकलोपस्यासिद्ध
त्वाभावादतो लोपः स्यादित्येषा दिक् १५ ॥

का॰ पद॰
८९

॥अदोजग्ध॥ ॥ल्यपि तिएयकपदं लुप्तसप्तमीकं । उहपदद्वयापेक्षंसमासमध्येश्रमाणोल्पवहिरंगः ल्यप्प्रत्ययमात्रापेक्षस्स्तु जग्ध्यादेशोंतरंगः। तत्र
त्वावस्थायामेवतस्योक्ते प्रजग्ध्येतिसिद्धं नाथोल्यपग्रहणेन ॥ एवंतर्हिल्यब्विषयेप्यंतरंगत्वात्त्किनीत्येवसिद्धेजग्धोल्यपिति पठ्यतेतत ज्ञा
पयत्यंतरंगाणामपिविधीनां हि प्रभृतीनां ल्यपाभवतिवाधनमिति। विधाय विहाय प्रदाय प्रख्याय प्रस्तभ्य प्रच्छाय प्रकम्प्य आपृच्छ्य प्रदीव्य प्रपठ्य
सेसेतेषुविधिषुदधातेर्हिः जहातेश्चक्ति दो दत घोः जनसनखनां सनझलोः यतिस्यतिमास्थामिति कि तिअनुनासिकस्य क्विझलोः ङ्किति छोः शूडनु

॥अदोतग्धिर्ल्यप्ति किति ॥ अदोजग्धिरादेशोभवतिल्यपिपरतः तकारादौ च किति प्रत्यये । प्रजग्ध्य विजग्ध्य जग्धः जग्धवान्। इकार उच्चारणार्थोनानुबंधः तेननुम्नभवति। एवंघस्लादीनामपि। इह कस्मान्नभवति। अन्नं।
अन्नाण्ण इति निपातनात्। जग्धौ सिद्धेंतरंगत्वात्ति किती तिल्यबुच्यते । ज्ञापयत्यंतरंगाणोल्यपाभवति वाधनं।
तीति किं। अद्यते । किती ति किं। अत्तव्यं॥ ॥लुङ्सनोर्घस्लृ॥ ॥लुङि सनि च परतोऽदो घस्लृ आदेशोभव
ति। लृदेत्करणमङर्थं लुङि अघसत्। अघसन्। सनि। जिघत्सति। जिघत्सतः। जिघत्संति। यल्लुभावेऽप्युप
संख्यानं प्राप्नोतीति प्रघसः॥ ॥घञपोश्च॥ ॥घञि अपि च परतोऽदो घस्लृ आदेशोभवति। घासः। प्रघसः।

नास्तिके च आर्धधातुकस्येड्वलादेरित्येते विधयः त्वावस्थायामेव प्राप्ता बहिरंगेन ल्यपा वाध्यंते। एष एवार्थः श्लोकांतरेणाभाष्येकथितः। जग्धि रा॰
विधिल्यपि यत्तदकस्मात्। अकारणात् निः प्रयोजनमित्यर्थः। सिद्धमदस्ति किती ति विधानात्। अदः जग्धिविधानमित्यर्थः। ज्ञापकार्थं ल्यपि जग्धिवि ८९
धानमित्याह हि प्रभृतीन् समदा बहिरंगोल्यबंतरंगानीति कृतं तदुपविद्धि। ल्यबंतरंगानीति ल्यबादेशो हरति ल्यपनयति वाधत इत्यर्थः। उइति निपातोवधार
णोऽन्यतरे वास्य प्रयोजनमित्यर्थः। लुङ्सा। ननु हसयस्य दः क्ताजितिवचनात् घसिः प्रकृत्यंतरमस्ति। सत्यं अदेराल्लीत अतसियतीत्य निष्टं
पंमाभूदिति हि योगारंभः प्राप्नोतीति प्रघस इति पवाधश्च। अप्पापि सूत्रवदेव प्रयोजनं॥

॥ बहुलं ॥ ॥ घस्ताम् इति । लुङि मंत्रेय मेत्यादिना च्लेर्लुक् बहुलं छंदसि समाधोगोपीतम् इमा कुमा सग्धिरिति घसिलसोरित्यु पधा लोपः झ
लो झलि समानाग्धि इति समानस्य छंदसीति सभावः । अन्यतरस्यां ग्रहणम् एव कस्मान्न क्रियत इति । कः पुनरेवं सति गुणः स्यात् तदे वेति । प्र
कृतं तरस्यां सङ्गावादस्य प्रयोजनं मृग्यं ॥ ॥ लिघन्यतः ॥ प्रकृतं तरस्यां सर्वविषयत्वज्ञापनार्थम् इदं तेनान्यत्र लिङि वने वाञ्छितत्वात्तस्य प्र
॥ बहुलं छंदसि ॥ ॥ छंदसि विषये बहुलम् अदो घस्लृ आदेशो भवति । घस्तां नूनं । सग्धिश्च मेन च भवति । आत्ता
मयम अत्तां मेदं उद्धृतं ॥ अन्यतरस्यां ग्रहणम् एव कस्मान्न क्रियते तदेवो त्तरार्थमपि भविष्यति । कार्यंतरार्थं बहुलग्रह
णं । घस्ताम् इति सत्रोपधा लोपेन भवति ॥ ॥ लिघन्यतरस्यां ॥ ॥ लिटि परतो ऽदो ऽन्यतरस्यां घस्लादेशो भवति । ज
घास । जक्षतुः । जक्षुः । आद । आदतुः । आदुः ॥ ॥ वेञो वयिः ॥ लिघन्यतरस्याम् इति वर्तते । वेञो वयिरादेशो भवति
अन्यतरस्यां लिटि परतः । इकार उच्चारणार्थः । उवाय । ऊयतुः । ऊयुः । पक्षे । ववौ । ववतुः । ववुः । लिटि वयो य इति यकारस्य
संप्रसारणं प्रतिषिध्यते । वश्चास्यान्यतरस्यां किति इति वकारो विधीयते । ववौ ववतुः । ववुः । वेञ इति संप्रसारणं न भ
वति ॥ ॥ हनो वध लिङि ॥ ॥ हंतेर्धातोर्वध इत्ययमादेशो भवति लिङि परतः । आर्धधातुके वध्यात् । वध्यास्तां ।
वध्यासुः । अकारांतश्चायम् आदेशः । तत्राकारस्य लोपो भवति । तस्य स्थानिवद्भावाद् वधीदिति हलंतलक्षणा वृद्धिर
तो हलादेर्लघो इति न भवति ॥ ॥ लुङि च ॥ लुङि च परतो हनो वध इत्ययमादेशो भवति । अवधीत् । अवधिष्टां । अ
योगेन भवति । तत्र लदिकारणं लुङि प्रयोगस्य लिंगं । यस्मिञ्च संतेषिस्तु दात्त पाठो वलादावार्धधातुके स इट् स्वर इः कारजितिवचनं क
रपि अकारोपरमे परिक्षयात्तात्स्यैप रेप्रयोगः ॥ ॥ हनो वध ॥ ॥ अकारांतश्चायम् आदेशः । कुत एतत् । झोली पमावायस्य पत्रवंजनं
त आदेशस्त्वे कारमुच्चारयति यथा जग्धादौ तस्मादिकारो कारणादकारांतोयम् आदेशः । हलंतलक्षणा वृद्धिर्न भवतीति । उत्तरसत्रेण

का॰ पद॰
९०

॥आत्मने॥ ॥आहसतेति। आङोयमहनः स्वात्मनेपदे। अनतः हनः सिजिति सिचः कित्वादनुदात्तोपदेशेत्यनुनासिकलोपः॥ ॥इणो गा॥ ॥
अगुरिति। गातिस्थेति सिचो लुक्। आतइति जुस् उस्यपदान्तात्। शाब्दिक इति वक्तुमिमितिघ। यस्यैवार्थस्य प्रकारणस्य शेषः स्यादिति कोर्थो लुङि

॥आत्मनेपदेष्वन्यतरस्याम्॥ ॥पूर्वेणानित्ये प्राप्ते विकल्प उच्यते। आत्मनेपदेषु परतो हनो लुङ्यन्यतरस्यां वध इत्य
यमादेशो भवति। आवधिष्ट आवधिषातां आवधिषत। न च भवति। आहत। आहसातां आहसत॥ ॥इणो गा लु
ङि॥ इणो गा इत्ययमादेशो भवति लुङि परतः। अगात्। अगातां। अगुः। लुङीति वर्तमाने पुनर्लुङ्ग्रहणमा
त्मनेपदेष्वन्यतरस्यामित्येवं वर्तमाने इहत्वविशेषेण नित्यं च भवति। आगा विभवता। शाब्दिक इति वक्तव्ये। अ
ध्यगात्। अध्यगातां। अध्यगुः॥ ॥णौ गमिरबोधने॥ ॥णौ परत इणोऽबोधनार्थस्य गमिरादेशो भवति। इका
र उच्चारणार्थः। गमयति गमयतः गमयन्ति। अबोधन इति किं। प्रत्याययति। शाब्दिक इत्येव अधिगमयति॥ ॥
सनि च॥ ॥सनि परतः इणोऽबोधनार्थस्य गमिरादेशो भवति। जिगमिषति जिगमिषतः जिगमिषन्ति। अ
बोधन इत्येव। अर्थान्प्रतीषिषति। शाब्दिक इत्येव। अधिजिगमिषति। योगविभाग उत्तरार्थः। इङश्चेति सन्येव यथा
स्यात्॥ ॥इङश्च॥ ॥इङश्च सनि परतो गमिरादेशो भवति। अधिजिगांसते। अधिजिगांसेते। अधिजिगांसन्ते।

एम॰
९०

तिसत्त्रम्मासः कर्त्रभिस्त्वयवस्थंत यतस्त्स्वलुङ्गथगिरा शाब्दिक इत्याह तेमन्यामहे सर्वस्य शास्त्रस्य शेषोयमिति तेनेणोयमा एतिस्कशा सित्यायविभ
वति अधियंति अधीत्येति॥ ॥छ॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥ ॥४॥ ॥४॥ ॥

गाङ्कुटादिभ्यः। ङ्वित्करणं किमर्थम्। गाङ्कुटादिभ्यो ञ्णिन्ङित्। इत्यत्र ङकारोच्चारणार्थं। गाङ्लिटि। ह्लिलकारकोयं निर्देशः लिटि लकारादाविति। तेन ग्रा वा देशोभ्योलावस्थायामेवादेशो भवति। किं सिद्धं भवति। अधिजगे द्विर्वचने चीति
स्थानिवद्भावेन भवति। ङित्करणमनर्थकं स्थानिवद्भावादेव सिद्धमात्मनेपदमिति शंका। गाङ्ग्रहणं अनुबंधकरणमिति। गाङिति ग्रहणं यथा स्यादिति।
ननु चैतदपि स्थानिवद्भावादेव सिद्धं नेत्याह। नह्रीति। गाकुटादिभ्य इति तत्र माने केरेगे शब्दे इणो गा लुङीत्येतयोरपि ग्रहणं प्राप्नोतीति तत्स्यागासी
न्नटः आगमात्तीयामोदेव एनेनेमत्रापि घुमास्था इत्यत्रेणो ग्रहणं प्रसज्येत। अपर आह। यत्र सानुबंधकोप दृष्युच्चार्यते तत्रावृत्तायामेवेत्तं गाया
मादेशः प्रवर्त्तते सत्त्वमपि वा तस्यामनुबंधकार्यमादेशेन भवतीत्यस्यार्थस्य ज्ञापनार्थं मा ङ्ग्यनुबंधकरणमिति। किं प्रयोजनं। अधीङः इण्वाज्ञा।

गाङ्लिटि। गाङादेशो भवति इङो लिटि परतः। अधिजगे। अधिजगाते। अधिजगिरे। गाङ्ङनुबंधग्रहणं वि
शेषणार्थं गाङ्कुटादिभ्य इत्यत्र ग्रहणं यथा स्यात्। न हि स्थानिवद्भावेन गाङिति रूपं लभ्यते॥ ॥विभा
षा लुङ्लृङोः। लुङि लृङि च परतः इङो विभाषा गाङादेशो भवति। आदेशपक्षे गाङ्कुटादिभ्य इति ङित्वं।
घुमास्थागापाजहातिसां हलीति ईत्वं। अध्यगीष्ट। अध्यगीषातां। अध्यगीषत। न च भवति। अध्यैष्ट।
अध्यैषातां। अध्यैषत। लृङि खल्वपि अध्यगीष्यत। अध्यगीष्येतां। अध्यगीष्यंत। न च भवति। अध्यैष्य

ङि तङ्ङात्मनेपदं न भवति। ञिरादेशकरणसामर्थ्यात्त्वरित ञित इत्येतदेव भविष्यति। इह तर्हि लटः शतृशानचौ। लङिति सानुबंधकात्सष्टी।
पचमानः। इति इत्संज्ञं न भवतीति। प्रकृतानामात्मनेपदानामत्र विधानादिह न भवति। इह तर्हि पुवोरनाका विपत्रभुज्युः। शंयुरित्यत्र माभूदि
ति अनुनासिकोकारानुबंधो पुवूसत्रे निर्दिष्टो ततश्च नंदनः कारकः। नंदना कारिका। स्थानिवद्भावाद्गुगिल्लक्षणो ङीमुमो प्राप्नुतः। अस्मादुपायका
न्नभवतः। अनुनासिकपठोत्सत्र ग्रहणं न त्वनुनासिकोकारानुबंधयोरिति नात्रोगित्कार्यप्रसंगः॥ इह हि सेर्ह्यपिच्चा। सियोहिरिति वक्तव्यं। अ
पिच्चेति न वक्तव्यं। इह च तु ह्योस्तातङिति तिति सियो स्ताद्भाशिषा तिसानुबंधकामष्टीमुच्चार्यादेशो विधेयः ङित्करणं न कर्त्तव्यं। इह च तस्य स्थमिपा
मिति पकारो नोच्चार्यः। तेनापि च न वमित्यादो गुणसिद्धिः। अणिञोरनार्षयोः कोल्पविरारोपत्र स्थान्यनुबंधकार्यमिष्यते तत्रानानुबंधकः स्यात्सुपा

॥ ८१ ॥

का०प०

९२

॥णौ च सं॥ अध्यापिपयिषतीति। क्रीङ्जीनां णाविति आत्वं। अध्यजीगपदिति लुङि चङि णौ चङ्युपधाया ह्रस्वः। सन्वल्लघुनि। दीर्घो लघोः॥ ॥
अस्तेर्भूः॥ भवतेरेव भवितेत्यादौ सिद्धे अस्तेरसितस्यादिनिवृत्त्यर्थयणारंभः। अनुप्रयोगो निवृत्तिः। अनुप्रयोगे विषये भुवाऽभावेनास्तेरनिवृत्तिं मनी
षिणः स्मरन्ति। कर्त्तुः सूत्रकारस्य वचनात्। मनीषिणः कर्त्तुरिति वा॥ ॥ब्रुवो वचिः॥ ॥ब्रुव आर्धधातुके प्रयोगनिवृत्त्यर्थं वचनं। वक्तेत्यादि

॥णौ च संश्चङोः॥ ॥इङो गाङ् विभाषेति वर्त्तते। ण्याविति। इङः पेक्षापरसप्तमी संश्चङोरिति च ण्यपेक्षा। णौ सन्य
रे चङ्परे च परत इङो विभाषया गाङादेशो भवति। अधिजिगापयिषति। न च भवति। अध्यापिपयिषति। चङि खल्वपि। अ
ध्यजीगपत्। अध्यापिपत्॥ ॥अस्तेर्भूः॥ ॥अस्तेर्धातोर्भूरित्ययमादेशो भवति। आर्द्धधातुके। भविता।
भवितुं। भवितव्यं। इह कस्मान्न भवति। ईहामास। कृञ्चानुप्रयुज्यते लिटीति प्रत्याहारेणास्तेर्ग्रहणसामर्थ्यात्।
तथा चोच्यते। अनुप्रयोगे तु भुवास्त्यबाधनं स्मरन्ति कर्त्तुर्वचनं मनीषिण इति॥ ॥ब्रुवो वचिः॥ ॥ब्रुवो वचिरा
देशो भवति आर्धधातुके। इकार उच्चारणार्थः। वक्ता। वक्तुं। वक्तव्यं। स्थानिवद्भावेन कर्त्रभिप्राये क्रियाफलविवक्षा
यामात्मनेपदं भवति। ऊचे। वक्ष्यते॥ ॥चक्षिङः ख्याञ्॥ ॥चक्षिङः ख्याञादेशो भवत्यार्धधातुके। आ
ख्याता। आख्यातुं। आख्यातव्यं। स्थानिवद्भावेन नित्यमात्मनेपदं न भवति ञकारानुबन्धकरणसामर्थ्यात्॥ र०म० ९१

कं तु वचेरेव सिद्धं॥ ॥चक्षिङः॥ कर्त्रभिप्राये क्रियाफले आख्यास्यते आचख्यावित्यात्मनेपदं यथा स्यात्। न्जादौ चक्षिते साद्यिमाभूदिति च योगा
रंभः। आख्यातेत्यादि ख्याकेथ नहि समसेव सिद्धं। अत्र यथा स्यामसे आकारान्तर्विभागः खकारयकारान्तमेति स्यादाख्यातेति ककारशेकारान्ता
पि त्विष्यते आक्शातेति तद्दन्त्यादि॥ ॥छ॥ ॥

काशादिरण्ययमिति· कक्कारे ककारउच्चारणार्थः। अपर आह खशादिरेवायमादेश इति। अत्राप्यकार उच्चारणार्थः। तत्र च लेलिहते कृशानेतत्यादि भवति। क्श
माख्याते तिखु कारयकारयोः श्रवणं। असिद्धं कांदेशात्वविधानानंतरं खशाजशास्यपोदेति शस्य यत्वे विभाषावकन्मात तत्र च त्वे यत्वे सिद्धमिमाख्याते त्यादि
यत्वपक्षे तू यंअस्यड्डाकशाते तिरूपं। अवश्यं च शस्येच शास्य यत्वमिताख्य यशीयांस्तु सुप्रचष्टे सुप्रख्यः। आतश्चोपसर्गइतिकः। ततोयत्वस्यासिद्धत्वा
त्सुप्रख्य स्य भावइतियोपधातुत्वपोत्तमादितिवुजं न भवतिअयोपधत्वात्। तस्मिन्नसति प्यज् भवतिसौप्रख्यमिति। तथासुप्रख्यायेनिनिर्हते रेयेभ
वः सौप्रख्यीपः धन्वयोपधादितिवुजं न भवति हन्द्वाछ्रएव भवति। आख्यातः यत्वस्यासिद्धत्वाद्यस्त्वत्वाभावात्संयोगादेरितिनत्वं न भवति। नख्याख्या

कशादिरण्ययमादेश इष्यते। आक्ता। ता। आक्तातुं आकातव्यं वर्जनेप्रतिषेधोवक्तव्यः। दुर्ज्जनीयाइत्य
र्थः। हिंसाज्ञानयोश्च प्रतिषेधोवक्तव्यः। तवक्षाः राक्षसाः हिंसार्थोऽत्रधातुः। ज्ञानेखल्वपि। विचक्षणः। व
हुलंसंज्ञाछंदसोरितिवक्तव्यं। अन्नवधकगात्रविवक्षणाजिराद्यर्थं॥ छ॥ वा लिटि॥ पूर्वेणनित्येप्राप्तेवि
कल्पउच्यते। लिटिपरतः चक्षिङः ख्याञादेशोवाभवति। आचख्यौ। आचख्यतुः। आचख्युः। नचभवति।
आचक्षे आचचक्षाते आचचक्षिरे॥ १८ ॥

हस्युच्छिमदामितपत्रख्याग्रहणं न कर्तव्यं भवति। पुंसः ख्यानं पुंख्यानमित्यत्र यत्वस्यासिद्धत्वात्पुमः खय्यम्परइतिरुविधिर्नभवति। पर्याख्या
नायत्वस्यासिद्धत्वाछ्रकारेण। नराख्यायाण्त्वप्रसंग इतिणात्वाभावः। नटः ख्यातेत्यत्र यत्वस्यासिद्धत्वात्खरः शर्परत्वाछ्रपरेविसर्जनीयइत्येषविधि
भवति। न च सिद्धेशास्यपवचनेप्रियख्याप्रकथन इत्यस्योत्पत्तिकएवयकार इति तत्र वुञादिप्रसंगः एवं तर्हि सोपि खशादिः शास्यपवचनमविसाधार
णं दृष्टमं। नृचक्षा रक्ष इति छांदसः प्रयोगः। भाषायां तु नृचक्षो रक्ष इति। विचक्षण इति। विचक्षण इति। अनुदात्तेतश्च हलादेरितियुचा व्यक इति। अ
तोलोपस्य स्थानिवत्वान्न लघूपधगुणाभावः। गात्रमितिष्ट्रन्निपातनात्। अजिरमिति। अजिरशिशिरेतिनिपातनमनादृत्योक्तं॥ १८ ॥ ॥छ॥ ॥

का·प८०

९२

॥अजेर्व्यो॥ ॥प्रवयणीयः प्रवायक इत्यादौ गुणवृद्धिविषये स्तुदीर्घयोरविशेषमन्वानः पृच्छति दीर्घोच्चारणं किमिति दीर्घस्याख्यानमित्यर्थः॥
घञपोः प्रतिषेधे क्यपउपसंख्यानमिति। काप्रियः प्रतिषेधस्तम पृथंवर्धी भवतीति काप इत्युक्तं पस्त्वाहः अयीमिव काशिसिरूः प्रतिषेधः कथं अविति
प्रत्याहारः अयोऽकाराद्याप्यामपः काराणत इति तस्य संवीतिरिति किं नापि प्रतिषेधः प्राप्नोति तस्मात् संज्ञायां ग्रहणात् समज्येत्यत्र वीभावाभावः। म
त्यादेशेन संज्ञा मायते। वलादावार्धधातुके वेष्यत इति। नार्थोऽनयेष्ट्या नापि घञपोः प्रतिषेधेन नापि क्यप उपसंख्यानेन नापि वायाविति सूत्रेण

॥अजेर्व्यघञपोः॥ ॥अजेर्धातोर्वीत्ययमादेशो भवत्यार्धधातुके परतः। वयपोषञ्जीपित्वा॥प्रवायकः॥प्र
वयणीयं॥अघञपोरिति किं। समाजः।उदाजः। अपितु।समजः।उदजः।समुदोरजः पशुष्विति प्।दीर्घोच्चारणं
किं।प्रवीतः।घञपोः प्रतिषेधे क्यपउपसंख्यानं।समज्या।वलादावार्धधातुके विकल्प इष्यते।प्रवेता।प्राजि
ता।प्रवेतुं॥ ॥वायौ॥ एवं णौ नेष्यते विकल्प उच्यते। यु इति ल्युटो ग्रहणं ये परभूते अजेर्वा वीइत्यय
मादेशो भवति।प्रवयणो दण्डः। प्राजनो दण्डः। प्रवयणमानय।प्राजनमानय॥ ॥ण्यक्षत्रियार्षञितो यूनि
लुगणिञोः॥ ॥ण्यन्तयोगोत्रप्रत्ययाः॥ण्यन्तात्।क्षत्रियगोत्रात्॥ ॥

एम०

९२

एतावद्दृष्टं वा लिटि अजेर्वीत्यव्यवस्थितविभाषेयं तेन घञपोः क्यपि नैव भवति वलादौ पौच विकल्पः अन्यत्र नित्यं। ॥ण्यक्षत्रि॥ ॥
ण्यादयो गोत्रप्रत्यया इति। गोत्राद्यून्यस्त्रियामिति गोत्रप्रत्ययान्तादेव युवप्रत्ययविधानात्। क्षत्रियगोत्रस्य क्षत्रियात्मनेदोपचारा क्षत्रियशब्देनाभि
धानं। ऋषेरपत्यमार्षं। इतश्चानिञ इति ढकि प्राप्ते शिवादिपाठादण्। दगपीष्यते आर्षेयं ह्यणीत इति। तस्माच्छुभ्रादिष्वपि पठनीयः। एवं गोत्र
रूपाभ्यां क्षत्रियार्षाभ्यां प्रत्ययस्योपलक्षणान् ण्यादयो गोत्रप्रत्यया इत्युक्तं। क्षत्रियादिति। क्षत्रियगोत्रप्रत्ययान्तादित्यर्थः॥ ॥छ॥ ॥

आर्षादिति। अस्याभिधायिनो गोत्रप्रत्ययान्तादित्यर्थः। प्रथमनिर्दिष्टात् समर्थान्तादणोऽसंभवात्तु रमनिर्दिष्टो यिञेव प्रथमुदाहृतः। क्षत्रियगोत्रस्यात्र
ग्रहणमिति। अपि सशब्देन साहचर्यात्। महिजनपदशब्दात् क्षत्रियादञितस्ञं तत्र लक्षत्रियशब्दः। उरसशब्दः सकारोपधो जनपदवाची। तस्मा
च्छनैगणादीयतीयोऽणिति। फेश्चुचेति वर्ज्छोऽतुन भवतः। पर्शुंकस्य सुयामाचेति यौधेयादिगणनान्। करवादिभ्यो गोत्र इति शैषिकोऽणिति। वामरथस्य
कण्वादिवत्स्वरवर्जमिति कुर्वादिषु पाठ इति भावः। अत्र ब्राह्मणगोत्रमात्रादिति। अत्र भाष्ये त्रीणि वा कासुपपन्नस्तानि अनिञोर्लुकि तद्राजाद्युवप्र

आर्षात्॥ ञितश्च॥ परयोरणिञोर्यूनि लुग्भवति। अणन्ताद्यथा। कुर्वादिभ्यो ण्यस्तस्माद्यूनि इञ् तस्य लुक्। कौरव्यः
पिता। कौरव्यः पुत्रः। ननु कौरव्यशब्दस्तिकादिषु पठ्यते। ततः फिञा भवितव्यं। कौरव्यायणिरिति। क्षत्रियगोत्रस्यात्र ग्र-
हणं उरसशब्दसाहचर्यात् कुर्वादिभ्यो ण्यप्रत्ययेनेन विहितस्य। इदं तु ब्राह्मणगोत्रं। कुर्वादिभ्यो ण्य इति ण्यः। क्षत्रि-
याद् ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यण्। तस्माद्यूनि इञ् तस्य लुक्। श्वाफल्कः पिता। श्वाफल्कः पुत्रः। क्षत्रियात्। आर्षे ऋ-
ष्यण्। तस्माद्यूनि इञ् तस्य लुक्। वासिष्ठः पिता। वासिष्ठः पुत्रः। आर्षात्॥ ञितः। अनृष्यानन्तर्ये बिदादिभ्योऽञ्। तस्माद्यूनि
इञ् तस्य लुक्। बैदः पिता। बैदः पुत्रः। अणः खल्वपि तिकादिभ्यः फिञ्। तस्माद्यूनि प्राग्दीव्यतोऽण्। तस्य लुक्। तै-
कायनिः पिता। तैकायनिः पुत्रः। एतेभ्य इति किं। शिवादिभ्योऽण्। तस्मात् यूनि अत इञ्। तस्य न लुग्भवति। कौहडः पिता
। कौहडिः पुत्रः। यूनीति किं। वामरथ्यस्य छात्राः वामरथाः। कुर्वादिभ्यो ण्यस्तस्मात् कण्वादिभ्यो गोत्र इति शैषिकोऽ-
णः तस्य लुग्न भवति। अणिञोरिति किं। दाक्षेरपत्यं युवा दाक्षायणः

यस्योपसंख्यानमिति प्रथमं अस्योदाहरणं। बौधिः पिता बौधिः पुत्रः। औदुंबरिः पिता। औदुंबरेभ्यो साल्वावयवलक्षण इञ् यञिञोश्चेति फक् तस्य
लुक्। अनणिञर्थमेतद्वचनं। साल्वावयवेभ्य औदुंबरास्तिलखिला इत्यादिस्म भवोदाहरणं न परीगणनमिति बुधशब्दादपीञ् भवति। क्षत्रियगोत्रमा-
त्राद्युवप्रत्ययस्योपसंख्यानमिति द्वितीयं। मात्रशब्दो कात्स्न्यार्थः। तद्राजादिति नियमो नास्ति क्षत्रियगोत्रमात्रादिति। तेन जाबालशब्दादत इञोऽतद्रा

जादपियस्य फको लुग्भवति जाबालिः पिता जाबालिः पुत्रः। इति कारिको-
यम्ससंन्ततीयं। अत्रापि मात्रशब्दः कार्त्स्न्यार्थः। क्षत्रियादित्यपि नियमो नास्ति।

अत्राह्मणगोत्रमात्रादिति तेन वेत्यणो त्राद पि भवति। मांडीजंघकरा विरको वैस्यो। ताभ्यामत इञ तदंतात्फको लुक्। आपकत्वाच्चेदमुपसंख्यानं कृत्तिकार
णा ॥ १९ पैलादि॥ ॥पीडयतेः पचाद्यचि कपिलादित्वात् लत्वे पीला। अन्ये पैलादय इञंता इति। तत्र बाह्वादिषु उदंचु इति पठ्यते। उकार उच्चार
णार्थः। किं निपातनं धत्वं निपात्यते। औदंचिः। अवर ल कार लोप उदई इति ते तं च न भवति। लुप्तनकारस्यैव तत्र ग्रहणात्। भूलिंगशब्दः साल्वावयवः। सा

अत्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं। बौधिः पिता। बौधिः पुत्रः। जाबालिः पिता। जाबालिः पुत्रः। औ
दुंबरिः पिता। औदुंबरिः पुत्रः। मांडीजंघिः पिता। मांडीजंघिः पुत्रः साल्वावयवलक्षणाञ्। तस्मात्फक्। तस्य लुक्।
पैलादिदर्शनात्सिद्धं॥ १९॥ पैलादिभ्यश्च॥ ॥पैलइत्येवमादिभ्यश्च युवप्रत्ययस्य लुग्भवति। पीलाया वेत्यण्। त
स्मात्फ्रोध्यवइति फिञ् तस्य लुक्। पैलः पिता। पैलः पुत्रः। अन्ये पैलादयः इञंतास्तेभ्य इञः प्राचामिति लुकि सिद्धे
अप्राग्गर्थः पाठः। पैल। शालंकि। सात्यकि। सात्यकामि। औदमज्जि। औदव्रजि। औं दमेधि। औदबुद्धि। दैवस्था
नि। पैंगलायनि। राणायनि। रौहक्षिति। भौलिंगि। औद्गाहमानि। औज्जिहानि। तद्राजाद्वाणः। आकृतिगणोयं

त्याकिरुद्दमपि केचित्पठंति। सोपि वाक्कादीजंतः। सत्यकशब्दस्य धकेत्सरणा भावात्। शेवा अत इञंताः। शालंकीति। अस्मादेव निपातनाछलंको
रिञ् शलंकादेशश्च। तद्राजाद्वाणइति। तद्राजसंज्ञकादणः परस्य युवप्रत्ययस्य लुग्भवति। द्व्यञ्मगधेत्यण्। तांसंगाश इत्यणो द्वयव इति फिञो लुक्। आं
गपिता। आंगः पुत्रः। न देवं गणावाक्यमेतदेकं पूर्वपठितानि त्रीणि तिचला रियथो लाममधिकविस्मयाणि॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥

।। इञः प्राचां ।। ।। प्राचामवृद्धात् इत्यादौ प्राग्ग्रहणं विकल्पार्थं इह तु न तथेत्याह गोत्रविशेषणमिति । युवप्रत्ययस्य लुग्विधानाद्यूनो ह्यस्त्रियां गोत्रमिति भा
वः । पन्नं प्राप्तं अगारं येन स पन्नागारः । मंथरा मंदीभूता एषणा यस्य स मंथरैषणः ।। ।। न तौल्व ।। ।। तुल्व उपमाने । औणादिको वलच् । तुल्वलः । धा

।। इञः प्राचां ।। ।। गोत्रे य इञ् तदंताद्युवप्रत्ययस्य लुग्भवति । गोत्रविशेषणं । न विकल्पार्थं । पांनागारेरपत्यं युवा यञि
ञोश्चेति फक् तस्य लुक् पांनागारिः पिता । पांनागारिः पुत्रः । मांथरैषणिः पिता । मांथरैषणिः पुत्रः । प्राचामिति किं
। दाक्षिः पिता । दाक्षायणः पुत्रः ।। ।। न तौल्वलिभ्यः ।। अनंतरेण प्राप्तो लुक् प्रतिषिध्यते । तौल्वल्यादिभ्यः परस्य
युवप्रत्ययस्य न लुग्भवति । तौल्वलिः पिता । तौल्वलायनः पुत्रः । तौल्वलि । तैल्वलि । धारणि । पारणि । दैलीपि
। दैवलि । दैवमित्ति । दैवयज्ञि । प्राबाहणि । मांधातकि । आनुहरति । श्वाफल्कि । आनुमति । आहिंसि । आसुरि
। आयुधि । नैमिषि । आसिबंधकि । चैंकि । पौष्करसादि । वैरकि । वैलकि । वैहति । वैकर्णि । कारेणुपालि । काम
लि ।। ।। २० ।। ।। श्रीरामचंद्राय नमः ।। ।। छ ।। ।। छ ।। ।।

रयति पारयतिभ्यां नंद्यादित्वाल्ल्युः । धारणः । देवा मित्रमस्येति देवमित्रः । देवेभ्यो यज्ञो यस्य देवयज्ञः । पुष पुष्टौ । कपू । पुष्पः । विलक्षणौ कर्णौ यस्य विक
र्णः । करेणुं पालयति करेणुपालः । असु क्षेपने । कुरच । असुरः । हृञ् हरणे । अनुपूर्वात्लटः शत्रादेशः अनुहरत् पुष्करे सीदतीति पुष्करसत् वा
कादीव । परिशिष्टाः पारायणोऽद्रष्टव्याः ।। २० ।। छ ।। ।।

।तद्राजा इह बहुषित्यनेन जसादि बहुवचनं वा गृह्येत अर्थो वा आद्ये पक्षे यमर्थमभिवृत्ति जसादिषु बहुवचनेषु परतः तद्राजस्याश्वी लिंगस्य लुगिति। द्वितीये बहुष्वर्थेषु वर्तमानस्येति। बहुवचन शब्दे हि जसादिषु विनियुक्ते तदेकदेशेन बहुशब्देनापि जसादिशब्दं लक्षयितुं। संज्ञानामेकदेशस्यापि प्रयोगदर्शनात् भीमो भीमसेनः सत्या सत्यभामेति। जसादीनां च यद्बहुत्वादि बहुषिति बहुवचनोपपत्तिः। न चैवमपि मुख्यत्वादर्थग्रहणमेव युक्तं। सत्यं तेनैव ग्रहणाद्यस्य सम्भवः। तद्धि प्रियवांगा इत्यादौ बहुवचने परमिति लुकः प्रसक्तस्य निवृत्तये कृतं। अर्थग्रहणे चात्र तद्राजस्य बहुत्वे तदभावादेव लुकोऽप्रसंगः। यद्येवमस्या देव लिंगाद्बहुवचनस्यैव निश्चयादर्थग्रहणस्यासंभवः। उच्यते। अस्त्रियामिति प्रतिषेधादस्य सम्भवः। तथा आप्यः स्त्रियः इत्यादौ तद्राजस्य बहुषु वर्तमा नस्य लुङ् माभूदिति कृतं। बहुवचनग्रहणे चात्र स्त्री प्रत्ययेन व्यवधानादेव लुकोऽप्रसंगः। न चाखण्डिता पत्यानि वृत्ताः स्त्रियः इत्युक्ते कोसला जातास्त्र डड्

।।तद्राजस्य बहुषु तेनैवास्त्रियां।तेन तद्राजाः आदयस्तद्राजसंज्ञाः इति वक्ष्यति तस्य तद्राजसंज्ञस्य प्रत्ययस्य बहुषु वर्त्त मानस्य अस्त्री लिंगस्य लुग्भवति। तेनैव चेत्तद्राजेन कृतं बहुत्वं भवति।। ।।अंगाः वंगाः सुह्माः पुंड्राः मगधाः। लोहध्वजाः। व्रीहिमताः।तद्राजस्येति किं। औपगवाः। बहुष्विति किं। आगः। तेनैव ग्रहणं किं प्रियो वांगो येषां त इमे प्रियवांगाः। अस्त्रियामिति किं। आंग्यः स्त्रियः।। २१ ।।

श्वा अप्रत्यांवष्ठ्याः इत्यत्रैकादेशस्यांतवद्भावात्स्व व्यवधानाल्लुक्प्रसंगः। एकादेशस्य पूर्वविधौ स्थानिवद्भावात्तत्रापि व्यवधानात्। तदेवं लिंगद्वयदर्शनात् उभयसंभवः। एवमुत्तरेष्वपि योगेषु द्रष्टव्यं। तत्राद्ये पक्षे इति कांतेः गामंतंगः। अतिगर्गः। अगोत्य आगतोः गर्ह्यः गार्ग्यो नूप्य इत्यादौ बहुवचनपरत्वाभावाल्लुङ् न स्यात्। न च वृत्तसर्थवाक्ये यच्छसादि बहुवचनं तत्रैव परतस्तत्लक्षणमेवाव स्थायां लुग्लभ्यते अंतरंगत्वादिति वाच्यं अंतरंगान पि विधीन्बहिरंगो लुग्बाधत इति वचनात्। न च लुमतांगस्येति निषेधात्। ननु च न लुमतांगस्य कार्ये किं तर्हि एकदेशस्य प्रत्ययमात्रस्यांगान्यस्य इत्यादौ च समर्थात्तद्धितोत्पत्तेः सिर्थवाक्ये बहुवचनमंगोत्पत्त्यादि तत्रैव लुक् भविष्यति। इदं तर्हि अत्रेरपत्यानि बहूनि इत्यत्राप्यत्रिजः इति ढक् तस्य किति इत्संतो दान्तत्वात् तस्य जसि परतोऽत्रिभृग्विति लुकि कृते उदात्तनिवृत्तिस्वरः प्राप्नोति तस्माद्द्वितीयं पक्षमाश्रित्य सा इह बहुषु वर्तमानस्येति। न च त्वत्रापि पक्षे आगस्त्यो गार्ग्यो ममेत्यत्र अंगवंगसुह्माः गार्ग्यश्च वात्स्यश्च गार्गवत्स्याजा इत्यादौ द्वंद्वे लुङ् न स्यात् अत्र ह्येकैकस्मिन्नेवार्थे प्रत्यय उत्पन्नः। पूर्वत्र तु पक्षे जसि मत्यापि

नैषदोषः। पूर्वपदधिकरणात्तापांद्वंद्वः तत्रैकैकस्य वृत्तिपदस्य बहुत्वार्थे ताल्लुग्भविष्यति। नन्वेवमपि तिकितवा उत्पत्तिर्द्वाभ्यामेकैकस्मिन्नेवार्थे उत्पन्न इति तद्रा
जो यो बहुषु यञ् यो बहुषु अञ् यो बहुष्वितु च मानो लुङ् स्यात्। नन्वत्र बहुष्वित्येतेन न प्रत्ययमात्रं विशेष्यते किं तर्हि प्रत्ययग्रहणपरिभाषया तदन्त
ग्रहणे सति तदन्तं विशेष्यते तद्राजान्तं यद्बहुषु यञन्तं यद्बहुषु अञन्तं यद् बहुष्विति। यद्येवं कश्यपस्यापत्यं काश्यपः विदाद्यञ् तस्य प्रतिकृतय इति इवे प्र
तिकृताविति कन् तस्य जीविकार्थे चापण्ये इति देवपथादिषु अर्चासु पूजनार्थास्विति पाठाद्धा लुपि कृते काश्यपा इत्यञन्तस्य प्रतिकृतिबहुत्वे लुक् प्रा
प्नोति। नैष दोषः। यञञोश्चेत्यत्र यस्कादिभ्यो गोत्र इत्यतो गोत्र इत्यनुवर्तते तेन गोत्रबहुत्वे लुक् प्रतिकृतिबहुत्वे न भविष्यति। नन्वेवमप्यङ्गानामेकस्य
प्रतिकृतयो बह्व्य इति तद्राजान्तस्य बहुषु वर्तनेऽलुक्प्रसंगः। नह्यत्रेदमस्ति तद्राजान्तं परत्यस्य बहुत्वे वर्तत इति। एवं तर्हि तेनैव ग्रहणमस्मिन् शेषे कर्तव्य
मित्युक्तं तदत्रोपपद्येत सामेहोपस्मिन्नर्थे लुग्भावात् प्रत्यय उत्पन्नस्तेनैव चेत्कृतं बहुत्वमिति। इह चापत्ये प्रतिकृतिं त्यय उत्पन्नः प्रतिकृतिकृतं च बहुत्वं। यद्येवं आ
ङ्गस्यापत्यानि अङ्गयो बहव इति फिञ्। तस्यान्नाह्मणगोत्रमात्रादिति वा तद्राजा वा एण इति वा लुक्। आङ्गाः। विदस्यापत्यानि अत इञ्। एण्य क्षत्रियेति लुक्। विदाः
। अत्र गोत्रे प्रत्ययः उत्पन्नः पुत्रकृतं च बहुत्वमिति लुङ् स्यात्। नैष दोषः तेनैवेत्यपत्यजातीये नैवतदर्थः पुत्राचापत्यजातीयानां न प्रतिकृतिः। ए
वं च कृत्वा द्वंद्वे यञ्लोपिनामलोपिनां मे च भवति तदा न भवति आंगदेवदत्ताः गार्ग्यदेवदत्ताः। इह तु भार्गविश्च वात्स्यश्च आत्रायणाश्च भृगुवत्साग्राय
णा इति यञ्लोपिनोऽलोपिभिः कृतं बहुत्वं आत्रायणी नडादिफको लुगभावात् तथाप्यपत्यजातीयत्वमस्तीति लुग्भवत्येव। यद्येवं गार्ग्यश्च काश्यपश्च
गालवश्च गार्ग्यकाश्यपगालवानामित्यत्र गालवे अप्यण्णो लुगभावेऽप्यपत्यजातीयत्वाद्यञञोर्लुक्प्रसंगः। एवं तर्हि भृगुवत्साग्रायणेष्विति गार्ग्य
काश्यपगालवानामिति निर्देशाद्यञ्लोप्यलोपिभिरपत्यप्रत्ययैः कृते बहुत्वे विकल्पः। तदेवं तद्राजान्तस्य बहुत्वे वर्तमानस्येति स्थितं। तत्रैतत् तद्राजस्य
जकस्य प्रत्ययस्य बहुषु वर्तमानस्येति व्यधिकरणे षष्ठ्यौ बहुषु वर्तमानस्याश्लीलिंगस्य तद्राजान्तस्यावयवः प्रत्ययस्तेनार्थः। तेनैव च तद्राजेनेति। अत्रापि
तद्राजान्तेनेत्यर्थः। तद्राजेत्यपि लोपि प्रत्ययोपलक्षणं। आंगगार्गलोहध्वजाः सादावपि भवतीत्याह। इहांगस्यापत्यानि बहूनि संगाः तेषामपत्यं युवा पुत्रो वा
आंगाः आंगायनिरिति युवसंक्रान्तेः प्रागोत्रे लुगचीति प्रतिषेधाल्लुगभावः। पश्चात्तु बहुत्वाभावात्। अचीति त्रिविषयस्य समीतेन युवप्रत्यये यस्याल्लुमताल्लु
प्ते पिविषयभूत एव तस्मिन्नागते लुकः प्रतिषेधः। लुप्ते पि वा प्रत्ययलक्षणेन। नन्वचीति वचनादुत्तरश्रयो यन्नेत्याह अचीति प्रागदीव्यतः प्रत्ययस्य विशेषणां प्र
त्यय एव लुको निमित्तं। अंगस्य स्त्रियः इति। इह च आंगीवंगश्च सौम्यश्चेति द्वन्द्वे आंगा इति शब्देन स्त्रीत्वयुक्तानामभिधानात्तद्राजो लुङ् भवति आंगीवंगसु

॥ ॥ २८ ॥

॥यस्कादि॥ प्रत्ययविधेरन्यत्रेति। गोत्रे यत्र प्रत्ययो विधीयते गोत्रे कुंजादिभ्यश्च्फञ् इत्यतोन्यत्रेत्यर्थः। तत्र तावद्यस्काधिकारे गोत्रग्रहणादेव पारिभाषिक स्य ग्रहणं अन्यत्र लौकिकस्येत्यत्र ज्ञापकं वक्ष्यामः। पुष्करसच्छब्दस्येति। किमर्थं पुनरयमत्र पठ्यते यावता बह्वचः इञः प्राच्यभरतेष्विति तेन सिद्धं पुष्करसदः प्राच्यत्वा त्। तथा चेञः प्राच्यमिति प्राप्तस्य लुकः प्रतिषेधाय तौल्वल्यादिषु पठितः। एवं तर्हि गोपवनादिषु केचित्तौल्वल्यादयश्चेति पठन्ति। तौल्वल्यादिषु प्रकृति

का. ५६०
९५

यस्कादिभ्यो गोत्रे॥ ॥बह्वचुत्तेनैव्यास्त्रियामिति सर्वमनुवर्त्तते। यस्क इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्य अस्त्रीलिंगस्य लुग्भवति। तेनैव चेत् गोत्रप्रत्ययेन कृतं बहुत्वं भवति। प्रत्ययविधेश्चान्यत्र लौकिकस्य गोत्रस्य ग्रहणमिति स्त्र नंतरापत्येपि लुग्भवत्येव। यस्कालह्याः। बह्वृथि सेव। यास्क। तेनैवेत्येव प्रिययास्काः। अस्त्रियामित्येव। यास्क्यः स्त्रियः। गोत्र इति किं। यास्काश्छात्राः। यस्क। लह्य। द्रुह्य। अयःस्थूण। तृणकर्ण। एते पंच शिवादिषु पठ्यंते। ततः परेभ्य इञ्। सदामत्त। कंबलभार। अहियोग। कर्णाटक। पिंगलक। यावक। सक्थ। ततः परेभ्यश्चतुर्भ्यः गृष्ट्यादिभ्यश्चेति ढक्। बस्ति। कुद्रि। अजबस्ति। मित्रयु। ततः परेभ्यः द्वादशभ्य इञ्। रक्षोमुख। जंघारथ। मंथक। उत्कास। कटुक। पुष्करसत्। विषपुट। परिमेखल। क्रोष्टुमान। क्रोष्टुपाद। शीर्षमाय। पुष्करसच्छब्दात् बाह्वादिपाठात् इञ्। खरपशब्दो नडादिषु पठ्यते। ततः फक्। पदक। वर्मक। एतान्यामतः इञ्। भलंदनशब्दात् शिवादिभ्योऽण्। भडिल। भंडिल। भडित। भंडित। एतेभ्यश्चतुर्भ्यः अश्वादिभ्यः फञ्॥ ॥यञञोश्च॥ ॥बह्वचुतेनैव्यास्त्रियां गोत्र इति चानुवर्त्तते। यञः। अञश्च गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्य लुग्भवति। गर्गादिभ्यो यञ्। गर्गाः वत्साः। अञः खल्वपि। अनृष्यानंतर्ये बिदादिभ्योऽञ्। बिदाः। उर्वाः। बह्वचित्येव। गार्ग्यः। बैदः

भागा अपि गोपवनादिषु द्रष्टव्या इत्यर्थः। तेन न गोपवनादिभ्य इति निषेधे प्राप्तेऽत्रास्य पाठः अयमेव च पाठो ज्ञापयति गोपवनादिषु तौल्वल्यादयोपि पठिता इति॥ ॥यञञोश्च॥ ॥गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्येति। अत्रापि षष्ठ्यधिकरणे षष्ठ्यौ। बहुषु वर्त्तमानस्य समुदायस्य संबंधी यो गोत्रप्रत्ययो यञ् अञ् च तस्येत्यर्थः। तेन द्वंद्वेपि भवति गर्गवत्सवाजा बिदौर्वभरद्वाजा इति॥

रा.म०
९५

।गार्ग्यः स्त्रिय इति।यञश्चेति ङीप्।हलस्तद्धितस्येति यलोपः।शाङ्गरवाद्यञो ङीन्।एकद्वयोरिति।एकत्वद्वित्वयोरित्यर्थः।संख्याया अल्पीयस्त्वा
त्सेकशब्दस्य पूर्वनिपातः।द्व्येकयोरिति निर्देशाद्द्विशब्दस्य प्राप्तिर्भवति।गार्ग्ययोः कुलं गार्ग्यकुलमिति प्रकरणाद्द्विशब्दात्तावद्गतौ द्विवचनांतस्यापि

।गार्ग्यः स्त्रियः।वैद्यः स्त्रियः।गोत्र इत्येव।द्वैप्याः।द्वैप्याः।उत्सादिभ्योऽञ्।औत्साः छात्राः।यञादी
नामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानं।गार्ग्यस्य कुलं गार्ग्यकुलं गार्गकुलं वा।गार्ग्ययोः कुलं गार्ग्यकुलं गार्गकुलं
वा।एवं वैदस्य कुलं वैदकुलं बिदकुलं वा।वैदयोः कुलं वैदकुलं बिदकुलं वा।यञादीनामिति किं।आङ्गकुलं।ए
कद्वयोरिति किं।गार्गाणां कुलं गार्गकुलं।तत्पुरुष इति किं।गार्ग्यस्य समीपमुपगार्ग्यं।षष्ठ्या इति किं।परम
गार्ग्यः॥ ॥अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च।अत्र्यादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति।अत्रि
शब्दादितश्चानिञ इति ढक्।इतरेभ्य ऋष्यण्।अत्रयः।भृगवः।कुत्साः।वसिष्ठाः।गोतमाः।अङ्गिरसः।बहुषु
किं।आत्रेयो भार्गवः।तेनैवेत्येव।प्रियात्रेयाः।प्रियभार्गवाः।अस्त्रियामिति किं।आत्रेय्यः स्त्रियः॥ ॥बह्वच इ
ञः प्राच्यभरतेषु॥ ॥बह्वचः प्रातिपदिकाद्य इञ् विहितः प्राच्यगोत्रे भरतगोत्रे च वर्तते तस्य बहुषु लुग्भव
ति।पन्नागाराः।मन्थरैषणाः।भरतेषु युधिष्ठिराः।अर्जुनाः।बह्वच इति किं।बैकयः।पौष्पयः।प्रा
च्यभरतेष्विति किं।बालाकयः।हास्तिदासयः।भरताः प्राच्या एव तेषां पुनर्ग्रहणं ज्ञापकार्थं अन्यत्र प्राग्ग्रहणे भ

न विरुद्धः समासः॥ ॥बह्वच इञः॥ ॥भरतापत्येषु भरतशब्दोऽभेदोपचाराद्वर्तते।यथा रघूणामन्वयं वक्ष्य इति।युधिष्ठिरार्जुनशब्दाभ्यां
कुर्वादित्वाभावेऽपि बाह्वादिलक्षणा इञ्।बलाकादयः शोभिताद्याः।भरताः प्राच्या भरतेष्विति द्वन्द्वः सामान्यविशेषभावविनोरोर्वलीवर्दन्यायेनेति भावः।

॥ ॥२२॥ ॥

रतग्रहणं न भवतीति तेन रुञः प्राच्यामिति भरतानां युवप्र
त्ययस्य लुग्न भवति।आर्ज्जुनिः पिता आर्ज्जुनायनः पुत्रः २२

॥नगोप॥ ॥पी शिष्टानांहरितादीनांप्रमादपाठइति। ननुचेह ख्याने गोपवनादयः पठ्यन्ते किंतर्हि चतुर्थ्यस्य बिदादिषुतदुपजीवनेनैतत्प्रवर्त्तते। अ
थचतुर्थपाठः प्रमादजस्तु अतेविदाघजपितर्हिनप्राप्नोति। अथगोपवनादिभ्यः परत्रपाठः प्रमादजः पूर्वत्रपाठाभावस्तुच्येन एवमपिहरितादिभ्योऽञइ
त्येपविशिष्टगोपवनादीनामपिप्राप्नो। तस्माद्यथान्यासेव स्थितएकपाठेमध्येहत्करणंकर्तव्यमिहवाप्राक्हरितादिभ्यइतिवक्तव्यं। प्रयोक्तंगोपवनादिभ्यः प्र

॥नगोपवनादिभ्यः॥ ॥गोपवनादिभ्यः परस्यप्रत्ययस्यलुङ्नभवति। विदाद्यंतर्गणोऽयं तत्राञोगोत्रप्रत्ययस्ययञञोश्चेति
लुक्प्राप्तः प्रतिषिध्यते। गोपवनाः। शैग्रवाः। गोपवनाः। शिग्रु। बिंदु। भाजन। अश्व। अवतान। श्यामाक। श्वापर्णा। एतावंतए
वाष्टौ गोपवनादयः। परिशिष्टानांहरितादीनांप्रमादपाठः तेहिचतुर्थे विदादिषुपठ्यंते। तेभ्यश्च बह्वचुल्लुग्भवत्येव। हारिताः किं
दासाः इति॥ ॥तिककितवादिभ्योद्वंद्वे॥ ॥तिकादिभ्यः कितवादिभ्यश्चद्वंद्वे गोत्रप्रत्ययस्य बहुषुलुग्भवति। तैकायनयश्चकै
तवायनयश्चतिकाद्भ्यःफिञ्तस्यलुक्। तिककितवाः। वांखरयश्चभांडीरथयश्चअतइञ्तस्यलुक्। वंखरभंडीरथाः। औप
कायनाश्चलामकायनाश्च। नडादिभ्यः फक्। तस्यलुक्। उपकलमकाः। पाफकयश्चनारकयश्चअतइञ्तस्यलुक्। पफनरकाः।
वाकनखयश्चश्वागुदपरिणद्धयश्चअतइञ्। तस्यलुक्। बकनखश्वगुदपरिणद्धाः। उभशब्दादतइञ्। ककुभशब्दात्। लिमायणा।
तयोर्लुक्। औब्जयश्चकाकुभाश्च उब्जककुभाः। लांकयश्चशांतमुखयश्चअतइञ्तस्यलुक्। लंकशांतमुखाः। आसशब्दस्तिका
दिषुपठ्यते ततः फिञ्। लंकशब्दादिञ् तयोर्लुक्। औरसायनयश्चलांकयश्च। उरसलंकटाः। भ्राष्टकयश्चकापिष्ठलयश्च अत
इञ्। तस्यलुक्। भ्रष्टककपिष्ठलाः। कालीजिनयश्चकार्ष्मसुंदरयश्च। अतइञ्तस्यलुक्। कृष्णाजिनकृष्णसुंदराः। आग्निवेश्याश्च
हासेरकयश्च। अग्निवेशशब्दात् गर्गादिभ्योयञ्। हासेरकशब्दादतइञ् तयोर्लुक्। अग्निवेशदासेरकाः
तिषेधः प्राप्यप्रितादिभ्यइति। हत्तिकारस्तुचतुर्थेऽत्रवपुष्पथककृपाठमन्यते॥ ॥तिककितवादिद्वन्द्वग्रहणंपरार्थेकगणेपञ्चानेतिकाः सीनिपर्वपदानि। किजगदीस्तुत्त
पदानि। तत्रतिकादिभ्योद्वंद्वस्पुत्कमानेपूर्वपदेष्वेवलुगाशंकेतउत्तरपदेष्वपियथास्यादिति तिककितवादिभ्यइत्युक्तं। आदिशब्दप्रत्येकमभिसंबध्य

॥ [illegible] ॥

॥उपका॥ ॥द्वंद्वे वाऽद्वंद्वे चेति॥ ॥कथमद्वंद्व इत्युच्यमाने द्वंद्वे चाद्वंद्वे च भवतीत्यत आह। द्वंद्वग्रहणं द्वंद्वाधिकारनिवृत्त्यर्थमिति। नात्र शास्त्रीयोऽधि-
कारः स्वरितत्वनिबंधनो विवक्षितः। नहि पूर्वसूत्रे द्वंद्वग्रहणमाससंज्ञकस्वरितः। तस्माल्लौकिकोऽधिकारोऽत्रापेक्षालक्षणः। तदिह द्वंद्वशब्देन न द्विषयाऽन्वये

॥उपकादिभ्योऽन्यतरस्यामद्वंद्वे॥ उपक इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति। अन्यतरस्यां द्वंद्वे
अद्वंद्वे च। अद्वंद्वग्रहणं द्वंद्वाधिकारनिवृत्त्यर्थं। एतेषां च मध्ये त्रयो द्वंद्वाः तिककितवादिषु पठ्यंते। उपकलमकाः।
भ्रष्टककपिष्ठलाः। कृष्णाजिनकृष्णसुंदराः इति। तेषां पूर्वेणैव नित्यमेव लुग्भवति। अद्वंद्वे त्वनेन विकल्पः। उप
काः। औपकायनाः। लमकाः। लामकायनाः। भ्रष्टकाः। भ्राष्टकयः। कपिष्ठलाः। कापिष्ठलयः। कृष्णाजिनाः।
कार्ष्णाजिनयः। कृष्णसुंदराः। कार्ष्णसुंदरयः इति परिशिष्टानां अद्वंद्वे। द्वंद्वे च विकल्प इति। पंडारक। अंडारक।
गडुक। सुपर्यक। सुपिष्ट। मयूरकर्ण। खारीजंघ। शलावल। पतंजल। कठेरणि। कुषीतक। काशकृत्स्न। निदाघ।
कलशीकंठ। दामकंठ। दामकंठांकृष्णपिंगल। कर्णक। पर्णक। जटिलक। बधिरक। जंतुक। अनुलोम। अर्द्ध
पिंगलक। प्रतिलोम। प्रतान। अनभिहित २३

सामिषीयते तस्यानज्ञानिषेधः अद्वंद्वे इति। किमुक्तं भवति। द्वंद्व इति नापेक्षत इति। तदन्यपेक्षायां द्वंद्वे चाद्वंद्वे च भवति। अद्वंद्वे द्वंद्व इत्यस्मिन्
सति लौकिकोऽधिकारो द्वंद्वस्य इत्यंशेन। द्वंद्वे त्वेषामेव परस्य यं रत्यते। तेषां पूर्वेणैव नित्यं लुग्भवतीति। भाष्ये तु भ्राष्टकिकापिष्ठलय इत्युदाहरणा-
त्तिककितवादिषु पाठो नार्ष इति निश्चयः २३ ॥

का०प०
९७

॥ ॥ अगस्त्य॥ ॥ कुंडिनीशब्दस्य यञि मस्यां ठेतद्धित इति पुंवद्भावेन स्त्रद्धितशति लोपे कौंडिन्य इति प्राप्नोति प्रसादेव निपातनात् सुंवद्भावाभावः।
अस इति वत्तस्मिन्नीकारस्य पस्येति लोपः तस्य स्थानिवत्वाद्धा भीयत्वेनासिद्धत्वाद्वा टिलोपाभावः। अगस्त्य कौंडिन्य इत्येतयोर्गोत्रप्रत्यययोरि
त्यधिकरणे षष्ठी एतयोर्विवक्षयत्वा वाचित्यर्थः। तावेव स्वरूपेणा दर्शयति अणश्च यञश्चेति। मध्योदात्तो हि कुंडिनीशब्द इति कुंडमस्यास्तीति कु
न इति दनौ प्रत्ययस्वरः। डीवनुदात्तः। ननु मानुहत्त लुग्ग्रहणं प्रत्यययोर्न तयोरेवादेशो मस्तां अत आह तयोरिपादि। परिहि प्रत्यययोर्नतयोरेवादेशो स्यां

॥ अगस्त्यकौंडिन्ययोरगस्तिकुंडिनच्॥ अगस्त्यकौंडिन्ययोर्गोत्रप्रत्यययोरणो यञश्च बहुषु लुग्भवति। प
रिशिष्टस्य च स्य च प्रकृतिभागस्य यथासंख्येन अगस्ति कुंडिनच् इत्येतावादेशौ भवतः। अगस्तयः। कुंडिनाः। च
कारः स्वरार्थः। मध्योदात्तो हि कुंडिनीशब्दस्तदादेशोऽपि तथा स्यात्। अगस्त्यशब्दाद्दृष्यण् कुंडिनीशब्दाद्ग
र्गादित्वाद्यञ्। तयोर्गोत्रे लुग्वचीति लुकि प्रतिषिद्धे आगस्तीयाः छात्राः इति वृद्धलक्षणश्छो भवति। कौंडिन्ये
त्वणो भवितव्यं कण्वादिभ्यो गोत्र इति। तत्र विशेषो नास्ति। कौंडिनश्छात्राः॥ ॥छ॥ ॥छ॥ ॥

तां गोत्रेऽलुग्यचीति प्रतिषेधो न स्यात्। लुकोऽयमेव निषेधो नादेशस्य। ततश्चादेशे सत्य वृद्धत्वादणेव स्यात्। लुक्ति तु सति तस्य प्रतिषेधे
तत्सन्नियोगशिष्टस्यादेशस्याप्यभावाद्वृद्धलक्षणश्छो भवति। तत्र विशेषो नास्तीति। किमर्थं तर्हि दिगुक्तं अणश्च यञश्च बहुषु लुग्भवतीति। रा०म०
एवं मन्यते यदि कुंडिनजादेशः समुदायस्य स्यात्तत्र अगस्त्यादेशोऽपि तथा स्यात्। अतोऽवयवेऽपि लुगनुवर्त्तेः अनुहत्त स्यण्कौंडिन्ये नापि सिद्ध ९७
धो विरोधाभावादिति॥ ॥छ॥ ॥

॥सुपो धा॥ ॥अत्र सुप इति सप्तमीबहुवचनं न गृह्यते पंचम्याः स्तोकादिभ्य इत्यादिना पंचम्यादीनामलुग्विधानात् । नापि कपः पकारेण प्रत्याहारः ।
तद्धितानां विधानसामर्थ्यात् अन्यथा तद्धितान्तस्य प्रातिपदिकत्वात्तेषामेव सर्वस्यैव तद्धितस्य लुक् स्यात् । द्विगोर्लुगनपत्ये इत्येतच्चानर्थकं स्यात्
अतः सुशब्दादारभ्य सुपः पकारेण प्रत्याहार इत्याह सुपो विभक्तेरिति । धातुप्रातिपदिकयोरिति परसप्तमी स्यात् धातुप्रातिपदिकयोः परतः
सुपो लुक् स्यात् काष्ठैः पचति शोभनैः काष्ठैरिति तन्मात्स्यष्ठीयमित्याह सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञाया इति । धातोः संज्ञापरा

॥सुपो धातुप्रातिपदिकयोः॥ ॥सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञायाश्च लुग्भवति । तदन्तर्गतास्त
द्ग्रहणेन गृह्यंते । धातोस्तावत् । पुत्रीयति । घटीयति । प्रातिपदिकस्य । कष्टश्रितः । राजपुरुषः । धातुप्रातिपदि
कयोरिति किं । वृक्षः प्लक्षः ॥ ॥अदिप्रभृतिभ्यः शपः॥ ॥अदिप्रभृतिभ्य उत्तरस्य शपो लुग्भवति । अ
त्ति द्वेष्टि ॥ ॥बहुलं छन्दसि ॥ छन्दसि विषये शपो बहुलं लुग्भवति । अदिप्रभृतिभ्य उक्तः ततो न भवत्यपि च
वृत्रं हनति । अहिः शयते । अन्येभ्यश्च भवति । त्राध्वं नो देवाः २४ ॥

तस्याः इत्यर्थः । कथं पुनर्विभक्तिर्धातुसंज्ञाप्रातिपदिकसंज्ञाना भवति तत्राह तदन्तर्गता इति । एवमनयोर्धातुप्रातिपदिकयोरवयवभूताः वि
भक्तयः सुबन्ताः संज्ञाः । नैष दोषः समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते । धातुप्रातिपदिकयोरवयवस्य सुप इत्याख्यानेन कश्चि
द्दोषः । प्रत्युत सुप इत्यस्य द्विवचनान्ते न संबंधो न तु उपपादो भवेदिति तथा तु न व्याख्यातमित्येव ॥ ॥अदिप्र॥ ॥कथं न विश्वसेद्विश्वस्तोऽविश्वस्ते
ष्विन विश्वसेत इति । तथा भट्टिकाव्ये । आश्वसेयुर्निशाचरा इति तथा न विश्वसेत्पूर्वविरोधितस्येति । निरंकुशाः कवयः । अपर आह स्म पूर्वमह
नो घटादित्वात्र घटादयः षित इति सिद्धे षित्करणं ज्ञापकं अनित्यं गणकार्यमिति । तेनैवमादिप्रयोगोपपत्तिरिति । नात्र किंचिदपभाषितमस्ति

॥ ॥२४॥ ॥

का॰ प॰८० ।।यङोऽचि च।। ।।अचि प्रत्यये परत इति। पचाद्यच्परीत्यर्थः एतदेव ज्ञापकं सर्वधातुभ्यः पचाद्यच् भवतीति मत्वाहार्यग्रहणं तु न भवति। तथाहि सत्य
९८ णीत्येवं क्रमम अन्यजादेः प्रत्ययस्यासंभवात्। ननु छंदसीति। कुष्कगोः सार्वधातुक इत्यत्र वार्तिकं। कुष्कुग्रहणम अनर्थकम अन्यस्याग्रहा याति वाती
त्यङ्क्तीत्यधिकारान्न भविष्यति। यातः वातः आचीत्यनुवर्तते। यांति वांति। श्रीरिति। युवंति स्वं ति। अनेकाच इति वर्तते। अयुवन् अरुवन् अ उ आगमोऽ
सिद्धः। श्रोर्गुवंति। असंयोगपूर्वस्येति वर्तते। यङ् लुङ्निवृत्त्यर्थं तर्हि कुष्कग्रहणं। योयुवति। रोरुवति। यङ् लुगर्थमिति चेदार्धधातुकत्वात्सिद्धं। छं
दसो यङ् लुक् तत्र छंदस्युभयथेत्यार्धधातुकत्वादेव न भविष्यति। तदेवं यङ् लुक् छांदसत्वम अभ्युपगम्य कुष्कुग्रहणं प्रत्याख्यानं वार्तिककारेणास

।।यङोऽचि च।। यङोऽलुग्भवति अचि प्रत्यये परतः। चकारेणैव बहुलग्रहणम अनुकृष्यते तेन तु छंदसीतीतेन
छंदसि भाषायां च यङोऽलुग्भवति। लोलुवः पोपुवः। सनीस्रंसो दनीध्वंसः। बहुलग्रहणादन्यत्रापि भव
ति। शकुनिकोलालपीति। दुंदुभिर्वावदीति।। ।।छ।। ।।श्रीः।। ।।छ।। ।।श्रीः।।

मन्यते चकारेणात्र बहुलं छंदसीति सर्वम अनुकृष्यते तेनाचि प्रत्यये यातः छंदसि भाषायां यङो लुङ् भवतीत्येके वाक्यं छंदसि बहुलमनेमि
त्तिको लुगिति दिङ्गीयं प्रसिद्धिश्च तथा छांदसो यङ् लुगिति प्रयोगश्च चिरंतनः पयोगयेव कामस्यापि काटोविकटपटोयन्या सप्रधानैरिष्टिक राम॰
त्रिभिः नहतोद्दृश्यते भाष्यकारस्तु कुष्कुवोरिति विवक्षति एवं तन्तर्येति ज्ञापयति भाषामपि यङ् लुगिति तेन चेचिरीति चेछिरीति योयवीति रित्यादि सिद्धं भ
वति। वृत्तिकारस्तु मन्यते यदि ज्ञापकेनापि तावद्भाषायामपि यङ् लुकः प्रयोगो भवति हंते वमत्रैव छंदो ग्रहणमानुवृत्तम् प्रयोगस्तु ज्ञापकाश्रये तो ९८
वपथा विधानं भवस्यास्ते इति अतो न भाष्यवार्तिकविरोधो हन्तेः ऊंकनीपः।। ।।६ ६।। ।।

।जुहोत्या॥ ॥शबनुवर्त्ततेनयङिति। श्लाविति द्विर्वचनविधानात्। यङनुवृत्तौ हि श्लुनातत्र लुमेविसिन्यङोरितिषष्ठ्याश्रयणाद्द्विर्वचनसिद्धेरन
र्थकं तत्स्यात्। विभक्तीति। भृञामित्त्वमभ्यासस्येत्ते। नेनेक्तीति। णिजिरशौचपोषणयोः। निजांत्रयाणां गुणः श्लौ॥ ॥गातिस्था॥ ॥अभूदिति।
भूसुवोस्तिङीतिगुणप्रतिषेधः। लुगनुवर्त्ततेनश्लुरिति। व्याख्यानात्। इणपिबत्योर्ग्रहणमिति। इणादेशो गाइति णोपुक्तः। तत्र गातीत्या
द्यक्षिकस्येणोयआदेशस्तदनुकरणो गातिपिबतीत्युक्तानिर्दिष्टःस्थानिवद्भावात्प्रत्ययवदनुकरणं भवतीति व। तेनगामादाग्रहणेष्वविशेषइति

॥जुहोत्यादिभ्यः श्लुः। शबनुवर्त्ततेनयङ्। जुहोत्यादिभ्यउत्तरस्यशपः श्लुर्भवति। लुकिप्रकृते श्लुविधानं द्विर्व
चनार्थं। जुहोति। बिभर्त्ति। नेनेक्ति॥ ॥बहुलं छन्दसि॥ छन्दसि विषये बहुलं शपः श्लुर्भवति। यत्रोक्तस्तत्र न भ
वति। अन्यत्र भवति जुहोत्यादिभ्यस्तावत् न भवति। दाति प्रियाणि धाति प्रियाणि। अन्येभ्यश्च भवति। पूर्णां वि
वष्टि। जनिमा विवक्ति॥ ॥गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु लुगनुवर्त्तते। न श्लुः। गाति स्था घु पा भू इ
त्येतेभ्यः परस्मैपदेषु परतः सिचो लुग्भवति। अगात्। अस्थात्। घु। अदात्। अधात्। अपात्। अभूत्। गाणो
र्ग्रहणे इणपिबत्योर्ग्रहणं। गायतेः पातेश्च न भवति। अगासीन्नटः। अपासीन्नयः। परस्मैपदेष्विति किं। अगा
सातां ग्रामौ देवदत्तेन॥ २५ ॥

त्वाश्रयणिकत्यापिगात्रूपस्यपिबपियग्रहणं प्राप्तं तथापिगातीतिनिर्देशादेवजनस्यनिवृत्तिः। तथा लुग्विकरणालुग्विकरणयोर्लुग्विकरणस्ये
वग्रहणमिति पिबतेर्वै ग्रहणं। अगासीदपासीदिति। कैगैरैशब्दे। पारक्षणे। यमरमनमातांसक्चेतिसगागमासिचश्चेट्। अस्तिसिचोपृक्त इती
ट्। इटईटिपैओवैशोषणेइत्यस्यलाक्षणिकंपारूपमितिग्रहणाभावः। अगासातामितिकर्मण्यात्मनेपदं॥ ॥२५॥ ॥

विभाषाघ्रा।धेटः सानुबंधकस्य निर्देश आत्वपरिहारार्थः।धाङ्स्तु अग्रहणं प्रतिपदोक्तत्वाद्धाज एव ग्रहणं स्यात्।ननु सत्यप्यनुबंधोच्चारणे ऽनुबंधानामनेकांतत्वान्नानुबंधकृतमनेजंतत्वमित्युदीचांमाङ इत्विदात्वं प्राप्नोति।सत्यं अपमेव निर्देशो ज्ञापयति सानुबंधानुकारणे नाव ययक मात्वमिति।
तेन सूत्राद्धि हिरविवेजो धेरोटैपरस्मादिप्रयोगोपपत्तिः।अघ्रासातातिकर्म्मणि आत्मनेपदमात्।। सुमनसाविति।स्त्रियः सुमनसः पुष्पमित्यमरसिंहः।

।विभाषाघ्राधेट्छाशासः।। घ्रा।धेट्।शा।छा।सा।इत्येतेभ्य उत्तरस्य सिचः परस्मैपदेषु विभाषा लुग्भवति।धेटः पूर्वेण प्राप्ते विभाषार्थं वचनं।परिशिष्टानामप्राप्ते।अघ्रात्।अघ्रासीत्।अधात्।अधासीत्।अशात्।अशासीत्।अच्छात्।अच्छासीत्।असात्।असासीत्।परस्मैपदे इत्येव।अघ्रासातां सुमनसौ देवदत्तेन।। ।।तनादिभ्यस्तथासोः।। ।।तनादिभ्य उत्तरस्य सिचस्तथासोः परतो विभाषा लुग्भवति।अतत।अतथाः।अतनिष्ट।अतनिष्ठाः।असात।असाथाः।असनिष्ट।असनिष्ठाः।जनमसनखनान्यामित्यात्वं।थासा साहचर्यात् आत्मनेपदस्य तशब्दस्य ग्रहणं।परस्मैपदे न भवति।अतनिष्ट यूयं।। ।।श्रीः।। ।।श्रीः।। ।।

अपसुमनःप्रभृतिकत्ता समभावबलिनां बहुत्वं चेति पाणिनीयं सूत्रं।तद्बहुत्वं प्रायिकं मन्यते।एकावधिकिनस्तेलदानेसमर्थेति भाष्ये प्रयोगात्।। ।।
तनादि।। ।।उदाहरणेषु स्वरितेत्वादात्मनेपदं।थासा साहचर्यादिति।यद्यपि तावदयं तशब्दो हृष्टापचारः।।अस्त्यात्मनेपदमस्ति च परस्मैपदं।अस्ति चैकवचनमस्ति च बहुवचनं।अयं तु खलु थाःशब्दो ऽहृष्टापचारः आत्मनेपदमेकवचनं च।तस्यास्य कोन्यः सहायो भवितुमर्हत्यस्य हृत आत्मनेपदादेकवचनाच्चेति भावः।आत्मनेपदस्येति।उपलक्षणमेतत्।एकवचनस्येत्यपि द्रष्टव्यं।। ।।छ।। ।।छ।। ।।

॥मंत्रेघ॥ ॥ह्वरेरत्रग्रहणमिष्यते न लिङादीनां तदर्थं सिचश्च लुगनुवर्त्यते। सिचो यो लिः स्यानिभूतस्तस्येति आचष्टे। सिचि प्रकृते लिग्रहणमादिः सिचोऽनन्तर
स्य। सिसारिसिचकार्यमा भूदिति। एवं च हि माहिदाता मिति सिचस्त्रो भवत्येव कृ रे ति विहितगुणस्यानुकरणं अकारश्चायमनुकरणार्थः। अश्वन्निति लुङि मनोर्यं ल
गमहने सुपधा लोपः शाः सिचमीति षत्वं प्राणा इति। वृश्चादिना षत्वे जश्त्वचर्त्वे। प्राणागिति णत्वे नशेर्वेति कुत्वं। आपादिति। प्रापत्तेर्ऋत्वाद्. पूर्वः। अत्र तेति जनीभ्रा
दुर्भावे मन्तुदात्ते न। बहुवचनस्यात्मनेपदे घनतः स्यदादेशः। पूर्ववदुपधालोपः। वृक्तं। ब्राह्मणेऽप्रयोगोपलमिति। मंत्र च्छन्दसि ऋक्वेदभागो ब्राह्मणं। प्रथाह भगवान्जै
मिनिस्तच्चोदकेषु मंत्राख्येति मंत्रलक्षणानन्तरं शेषे ब्राह्मणशब्द इति। व हूनामं ह्यश्वं ब्राह्मणे ऽदृश्यं ऽमन्तिव हृणस्येत दूको। अन्तत वा अस्य दंताः इति। कथं पुन
र्मन्त्रग्रहणे ब्राह्मणस्य ग्रहणं भवति तत्राह मंत्रग्रहणं हि ति। मंत्रस्य छेदो त्र शो ताते न तदुपलक्षते। वाङ्गत्वेन तु मंत्रे दर्शनात् मंत्रग्रहणं कृतं॥ ॥आमः॥ ॥आमउत्तर
स्य लेर्लुग्भवतीति। यद्यपि सिचा लिर्विशेषितस्तथापि इह लेः सिचानुवर्तनं इति भावः। विहामकालिदां कुर्वन्तित्यत्र लुङ् लोरे निपातनाल्लुग्भवति। तरवादीनां वा मंत्रा

॥मंत्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः॥ मंत्रविषये घस। ह्वर। णश। वृ। दह। आत्। वृच्। कृ। गमि। जनि इत्येतेभ्य उत्तरस्य ले
र्लुग्भवति। अघत्। अघ तां। अक्षन्नमीमदन्त पितरः। ह्वरेति ह्वृ कौटिल्ये। मा ह्वर्मित्रस्य त्वं। नश। प्रणग् मर्त्यस्य। वृ इति वृङ् वृञोः सामान्ये
न ग्रहणं। सुरुचो वेन आवः। दह। मा न आधक्। आ दिति आकारान्तग्रहणं। आप्राद्यावा पृथिवी अन्तरिक्षं। वृज। मा नो अ
स्मिन्महाधने परा वर्क्। कृ। अक्रन्कर्म कर्मकृतः। गमि। अग्मन्। जनि। अज्ञत वा अस्य दन्ताः। ब्राह्मणे प्रयोगोऽयं। मंत्रग्रहणं तु छन्द
स उपलक्षणार्थं॥ ॥आमः॥ ॥आमः परस्य लेर्लुग्भवति। ईहांचक्रे। ऊहांचक्रे। ईसांचक्रे॥ ८१ ॥

इत्युसन्निरेवत स्यानभिव्यक्तपदार्थत्वात्। अयं च लुक् प्राप्तेषु तिबादिषु विधीयमानत्वाल्लादेशानामपवादः। तेनाम तस्यां तिङ्. तत्वाच्च सुः कामं धजयांच
कोलत्वति दुतिङ् इति तस्य वा निघातस्तस्माच्च निघातः। सिद्धो भवति। कथमामतस्य पदत्वं। सुबन्तत्वात्। लकारस्य लुक् त्वात् प्रातिपदिकत्वात् तिङ् भाविनो हिलका
रस्यातिदिः तिप्रतिषेधः न चायं तिङ् भावी। सुपः अवर्णाऽस्मात्र भवति। आमः स्वरादिषु पाठादव्ययत्वात्। तद्धितेन अमा साहचर्येण पितद्धितस्य एव नप
स्त्वेनेऽपि तु आमेरतद्धितोऽपि न त्रेवेत्तु समासप्रसंगः नकारयां नहारयां। नञ्सुवन्तेन समस्यत इति समासः प्राप्नोति। नैष दोषः। अभिव्यक्तपदार्थानां हिया
जयांचकारेति नञः सामर्थ्यं नित्यमनभिव्यक्तपदार्थेनामन्तमात्रेण। आमन्ते प्रोपालल: प्रतिषेधः। शाश्यमतताम। ह्लोक्ततापांह्लानिवडावेनरालो
लिग्रहणे न ग्रहणे लुक् प्राप्नोति। अर्थवद्ग्रहणात् सिद्धं। अर्थवल्लक्षामन्तस्य ग्रहणं न चैषोऽर्थवान्। एवमथ मग्रसादिषु। नियोराल आमन्त्र प्रा
प्नोति। अर्थवत्त्वात्। लक्षणप्रतिपदोक्तयोः॥ प्रतिपदोक्तस्यैव ग्रहणामित्यत्र न भविष्यति॥ ८१ ॥ ॥

का॰ वृ॰
१००

॥ अव्ययात् ॥ ॥ तत्र शालायामिति। शालाशब्दसंनिधौ स्त्रीत्वयुक्तद्रव्यगतकारकशक्त्यभिधानात् तस्यामिति वक्तव्ये त्रलप्यपि दिक्स्त्रीप्रत्ययः स्यात् तदोरेव
स्त्रीत्वं प्रतीयेतेति व्यामोहः। निरर्थकं स्व्यर्थं यथोल्लुग्वक्तव्यः यथा षट्संज्ञके षष्ठ प्रतिषेधश्चेति भाष्यः। वार्त्तिककारस्त्वाह अव्ययादायो लुग्वचनानर्थक्यं लिं-
गाभावादिति। कृत्वा हृत्वेति। यदा बहुषु बहुत्ववचनमित्यादेः स्वादिविधिवाक्येनैकवाक्यता तदा विः संख्येयाभावे कारकेष्वव्ययेभ्यः स्वादिर्न लुग्वि-
धानाल्लिङ्गात्वाद्यो भवंति। भिन्नभासतायामपि नियमपक्षे तुल्यजातीयस्य नियमेनाशङ्कितः बहुष्वेव बहुवचनं न तु योनैकस्मिन् द्वयोरेव द्विवचनं नै-
कस्मिन् न बहुषु एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु इत्यव्ययेभ्यः स्वादीनां संभवः। त्रिकपक्षे तु यत्र संख्या संभवति तत्रैव सा वाच्यत्वेन विधीयते अव्य-
येभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विधीयंत एवेति सर्वथाव्ययेभ्यः सुबुत्पत्तिरेषितव्या प्रत्ययलक्षणेन पदसंज्ञा यथा स्यादिति। सुपिति

॥ अव्ययादाप्सुपः ॥ ॥ अव्ययादुत्तरस्याऽऽपः सुपश्च लुग्भवति। तत्र शालायाम्। सुपः खल्वपि। कृत्वा। हृत्वा
॥ ॥ नाव्ययीभावादतोऽम्त्वपञ्चम्याः ॥ पूर्वेण लुक् प्राप्तः प्रतिषिध्यते। अदन्तादव्ययीभावात् उत्तरस्य सुपो न लुग्भ-
वति अमादेशस्तु तस्य सुपो भवत्यपञ्चम्याः। तस्मिन् प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवति। उपकुम्भं तिष्ठति। उप-
कुम्भं पश्य। उपमणिकं तिष्ठति। उपमणिकं पश्य। अत इति किम्। अधिस्त्रि। अधिकुमारि। अपञ्चम्या इति किम्। उपकुं-

वत्सप्तमीबहुवचनस्य पकारेण प्रत्याहारः न रूपम्। आपः पृथगुपादानात् ॥ ॥ नाव्ययी ॥ ॥ किमर्थः प्रतिषेधः पूर्वसूत्रेण लुङ् मा भूदिति। अमत्र
विधीयते मनाप्राप्ते लुक्यारभ्यमाणस्तस्य बाधको भविष्यति यत्र तर्हि प्रतिषिध्यते पञ्चम्यास्तत्र लुक् प्राप्नोति। प्रतिषेधे तु सति तत्सामर्थ्याद्भवत्यसौ
भवतः। नाव्ययीभावादित्येकं अम्त्वपञ्चम्या इति द्वितीयं। अत्र चातस्त्वपे स्वने। तत्रापञ्चम्या इत्यनेनोत्तरस्य विधिर्वा लवति प्रतिषेधो वेति पञ्चम्या
आदेशः प्रतिषिध्यते न स्वविधानविहितः प्रतिषेधः। इममेवार्थं तु शब्देन द्योतयति। अविशेषेण प्रतिषेधः अम त्वपञ्चम्या इति। तदेतदुक्तं। तस्मि-
न्प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवतीति। गमकमेव स्त्र तत्रावेवयशः उपकुम्भादिति। समीपभूताल्कुंभादित्यर्थे कुंभस्य समीपादित्यपरे। उत्तरत्वाभा-
दिस्यपदार्थप्रधानः सत्त्ववाच्यव्ययीभावः क्रियासंबंधसद्भावात् पञ्चम्यां न तत्त्पञ्चम्यामुखमुदाहरणं ॥

राम॰
१००

का॰ प॰ २॰
१०१

॥तृतीया॥ ॥सुमद्रमिति। मद्राणां समृद्धिः अव्ययीभावः। ततः सप्तमी। तस्या नित्यममभावः। एकविंशतिभारद्वाजमिति एकविंशतिर्भारद्वाजा वं-
श्याः इति संख्यावंश्येनेति समासः। तत्र वर्तिपदार्थानां स्वार्थोपसर्जनार्थाभिधायित्वात् भारद्वाजशब्द एकवद्विशिष्टार्थं निरपेक्षो तस्य तत्रो लुग्भाक्
नेति वंशे। गार्ग्याणां कुलं गार्गकुलमित्यादावपि प्रसङ्गात्॥ तस्माज्ज्ञाप्यकाऽप्रयोगात् अत्र लुगभावः॥ ॥लुटः प्र॥ ॥परस्मैपदस्य चात्मनेपदस्य चेति।
यथासंख्यं परस्मैपदे त्रयः प्रथमपुरुषसंज्ञकास्तिप्तस्झयः आत्मनेपदे त्वपि त्रयस्तातांझ इति षट्स्थानिनस्त्रय आदेशाः इति वैषम्यात्संख्यातानुदेशो न प्राप्नोति।
मा भूत्संख्यातानुदेशः आन्तर्यतो व्यवस्था भविष्यति। अर्थतश्चान्तर्यम्। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थः। कथं पुनर्डादीनामेकार्थ्या-
ध्यवसायः। यावता यस्तिपः स्थाने स एकार्थः यस्तसः स्थाने स द्व्यर्थः यो झेः स्थाने स बह्वर्थः नैतदस्ति प्रयोगदर्शनादेषैकार्थ्यादिकमध्यवसातुं शक्यम्

॥तृतीयासप्तम्योर्बहुलम्॥ ॥पूर्वेण नित्यममभावे प्राप्ते वचनमिदम्। तृतीयासप्तम्योर्विभक्त्योर्बहुलममादेशो भवति अव्ययीभा-
वे। उपकुम्भेन कृतम् उपकुम्भं कृतम्। उपकुम्भे निधेहि। उपकुम्भं निधेहि। सप्तम्या ऋद्धिनदीसमासे संख्यावयवेभ्यो नित्यममिति वक्त-
व्यम्। सुमद्रम्। सुमगधम्। उन्मत्तगङ्गं लोहितगङ्गम्। एकविंशतिभारद्वाजम्। बहुलवचनात्सिद्धम्॥ ॥लुटः प्रथमस्य डारौरसः॥ लुडादेशस्य
प्रथमपुरुषस्य परस्मैपदस्यात्मनेपदस्य च डा रौ रस्। इत्येते आदेशा भवन्ति यथासंख्यम्। कर्ता कर्तारौ कर्तारः। आ-
त्मनेपदस्य। अध्येता अध्येतारौ अध्येतारः। प्रथमस्येति किम्। कर्तासि॥ ॥इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयाध्या-

यवादेशात्रापि षडेव निर्दिश्यन्ते। कथमेकशेषनिर्देशात्। डा रौ रसश्च डारौरस इति कृते द्वन्द्वे नानेकशेषः। यदि तु डाश्च डाश्च डाः। रौ च रौ च रौ। रस् च रस्
रसः। डाश्च रौ च रसश्च डारौरस इति कृते एकशेषाणां द्वन्द्वे स्यादेवं निर्देशः संख्यातानुदेशः प्राप्नोति। तिप्तसोर्डाः। झितसोरौ। आतांझयोरिति। कर्तेति। लुटः ति-
पस्तस्य डा इत्ययमादेशः। नानुबन्धकृतमनेकाल्त्वम्। अस्य तत्र डित्त्वसामर्थ्यादिति पक्षे टेर्लोपो भवति। ननु तेकारान्तत्वात् न भवति। डित्करणात्
पूर्वटेर्नं गस्याभिभविष्यति। यथा मित्वोते। अथवा अनुपस्थितिरेव। कथम्। अत्र पस्यापदस्थानेपदत्वम् अस्य यः स्यात्। असत्त्वप्रत्ययसंज्ञायां
कालेऽत्र संज्ञा नास्ति। अत्र सर्वेषु संज्ञा यामनेकाल। येऽत्र नेकाल तत्र सर्वदेशः। यदा सर्वादेशस्तदा प्रत्ययः यदा प्रत्ययस्तदा तस्य तद्य संज्ञा नतरां लोप
स्ततेकान्त्। न चेदानीं प्रत्ययस्य सोऽनादेशो भवितुमर्हति। नदेत तदानुपस्थितिरेव कर्ता पैक त्तौरेति। रिचान्तेनास्य लोपः। अध्येतेति। इङ् अध्य
यने अध्ययने। अथात्र डो लो सुकृतेषु टेरेत्वे कस्मान्न भवति। सर्वमेनाम्नि योगेष्वनिषु प्रत्यात्मालात्। इह हि तत्र टेरेत्वं प्राप्तोऽतिडार्टेशोऽस्त्वोपि
देशात्तेषां टेरेत्वं न भवतीति। अस्मद्यथाय्यसः सस्येतयाः संस्थाता कर्तासि इति। तासस्त्योरिति सलोपः॥ ॥इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां द्वि-

राम॰
१०१

4000